सः He (Virāj) अबिभेत् was frightened तस्मात् therefore एकाकी when alone बिभेति one is frightened; सः ह अयम् he ईक्षाम् reflection चक्रे made, यत् since मत् अन्यत् anything other than myself न not अस्ति there is कस्मात् नु of what बिभेमि am (I) afraid इति; ततः from that एव alone अस्य his भयम् fear वीयाय departed; कस्मात् of what हि for अभेष्यत् should (he) be afraid; द्वितीयात् from a second (entity) वै only भयम् fear भवति comes.

2. He was frightened. Therefore one is (still) frightened when one is alone. He

reflected, 'Since there is nothing besides myself, what am I afraid of?' From that alone his fear departed, for what should he afraid of? Fear comes only from a second entity.

स वै नैव रेमे, तस्मादेकाकी न रमते; स द्वितीयमैच्छत्। स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ; स इममेवात्मानं द्वेधापातयत्, ततः पतिश्च पत्नी चाभवताम्; तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यः, तस्मादयमाकाशः स्त्रिया पूर्यत एव; तां समभवत्, ततो मनुष्या अजायन्त ॥ ३ ॥

सः He वै verily न not एव at all रेमे felt happy, तस्मात् therefore एकाकी when alone न not रमते feels happy; सः he द्वितीयम् a mate ऐच्छत् desired. सः ह He एतावान् as large as आस became यथा as स्त्री-पुमांसौ man and wife संपरिष्वक्तौ embracing each other; सः he इमम् this एव very आत्मानम् body द्वेधा into two अपातयत् divided, ततः from that पतिः च husband पत्नी wife च and अभवताम् came into being; तस्मात् therefore इदम् this (body) स्वः of oneself अर्धबृगलम् half of a two-celled seed इव (is) like इति so याज्ञवल्क्यः Yājña valkya आह स्म said; तस्मात् therefore अयम् this आकाशः void स्त्रिया by the wife पूर्यते is filled एव verily; ताम् with her समभवत् (he) united, ततः from that मनुष्याः men अजायन्त were born.

3. Verily he did not at all feel happy. Therefore one (still) does not feel happy when alone. He desired a mate. He became[1] of the size of a man and wife embracing each other. He divided this very body into two.[2] From that husband and wife came into being. 'Therefore this body (of a man) is one-half of himself, like half of a two-celled seed', so said Yājñavalkya. Hence this void is verily filled by the wife. He united with her. From that men were born.

[[1] He produced this form without changing his own.
[2] As the progenitor Manu and his wife S'atarūpā.]

सो हेयमीक्षां चक्रे, कथं नु मात्मन एव जनयित्वा सम्भवति ? हन्त तिरोऽसानीति ; सा गौरभवत्, ऋषभ इतरः, तां समेवाभवत्, ततो गावोऽजायन्त ; वडवेतराभवत्, अश्ववृष इतरः, गर्दभीतरा, गर्दभ इतरः, तां समेवाभवत्, तत एकशफमजायत ; अजेतराभवत्, वस्त इतरः, अविरितरा, मेष इतरः, तां समेवाभवत्, ततोऽजावयोऽजायन्त ; एवमेव यदिदं किञ्च मिथुनम् आ पिपीलिकाभ्यः तत्सर्वमसृजत ॥ ४ ॥

सा She उ ह on her part इयम् this ईक्षाम् reflection चक्रे made, मा me आत्मनः from himself एव alone जनयित्वा

having created कथं नु how सम्भवति does (he) unite with, हन्त well तिरः असानि let me disappear इति; सा she गौः a cow अभवत् became, इतरः the other ऋषभः a bull, ताम् her समभवत् एव did unite with, ततः from that गावः cows अजायन्त were born; इतरा the one वडवा a mare अभवत् became, इतरः the other अश्ववृषः a stallion, इतरा गर्दभी a she-ass, इतरः गर्दभः a he-ass, तां समभवत् एव, ततः एकशफम् the class of one-hoofed animals (horses, mules and asses) अजायत; इतरा अजा a she-goat अभवत्, इतरः वस्तः a he-goat, इतरा अविः a ewe, इतरः मेषः a ram, तां समभवत् एव, ततः अज-अवयः goats and sheep अजायन्त; एवम् एव in this very way आ पिपीलिकाभ्यः down to ants यत् किं च इदम् whatever here मिथुनम् (exists in) couples तत् that सर्वम् all असृजत (he) created.

-032240

4. She on her part reflected, 'How can he unite with me after creating me from his own self? Well, let me disappear'. She became a cow. The other became a bull and did unite with her. From that cows were born. The one became a mare, the other a stallion; the one a she-ass, the other a he-ass, and he did unite with her. From that one-hoofed animals were born. The one became a she-goat, the other a he-goat; the one a ewe, the other a ram; and he did unite with her. From that goats and sheep were born. In this very

way he created whatever exists as couples, down to ants.[1]

[[1] All this was in conformity with the past work of the animals to be produced.]

सोऽवेत्, अहं वाव सृष्टिरस्मि, अहं हीदं सर्वमसृक्षीति; ततः सृष्टिरभवत्; सृष्ट्यां हास्यैतस्यां भवति य एवं वेद ॥ ५ ॥

सः He (Virāj) अवेत् knew, अहम् I वाव indeed सृष्टिः creation अस्मि am, अहम् I हि because इदं this सर्वम् all असृक्षि created इति; ततः hence सृष्टिः Creation अभवत् (he) became (known as); यः who एवम् thus वेद knows अस्य of Virāj एतस्यां सृष्ट्याम् in this creation भवति (he) becomes (a creator) ह indeed.

5. He knew, 'I am indeed the creation, because I created all this'. Hence he became known as Creation. He who knows thus becomes (a creator) in this creation of Virāj.

अथेत्यभ्यमन्थत्, स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत; तस्मादेतदुभयमलोमकमन्तरतः, अलोमका हि योनिरन्तरतः। तद्यदिदमाहुः, अमुं यजामुं यजेति, एकैकं देवम्, एतस्यैव सा विसृष्टिः, एष उ ह्येव सर्वे देवाः। अथ यत्किञ्चेदमार्द्रं तद्रेतसोऽसृजत, तदु सोमः; एतावद्वा

इदं सर्वम्, अन्नं चैवान्नादश्च; सोम एवान्नम्, अग्निरन्नादः; सैषा ब्रह्मणोऽतिसृष्टिः। यच्छ्रेयसो देवानसृजत, अथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिः; अतिसृष्ट्यां हास्यैतस्यां भवति य एवं वेद ॥ ६ ॥

अथ Then इति thus अभ्यमन्थत् (he) churned, सः he योनेः from (its) source मुखात् च from the mouth हस्ताभ्यां from the hands च and अग्निम् fire असृजत created; तस्मात् therefore एतत् this उभयम् both (are) अन्तरतः within अलोमकम् hairless. तत् There (in sacrifices) अमुम् to this यज sacrifice अमुम् to the other यज इति, इदं यत् what एकैकम् each separate देवम् god आहुः (the priests) speak of, एतस्य of him एव alone (is) सा that विसृष्टिः multiple projection, एषः he (Virāj) हि for उ एव himself (is) सर्वे all देवाः the gods. अथ Now यत् किं च इदम् whatever here आर्द्रम् (is) liquid तत् that रेतसः from the seed असृजत (he) created, तत् उ that सोमः (is) the moon; इदं this सर्वम् all एतावत् (is) this much वै verily, अन्नम् च food अन्नादः the eater of food च and एव only; सोमः the moon एव indeed (is) अन्नम् food, अग्निः fire अन्नादः (is) the eater of food; सा that एषा this ब्रह्मणः of Brahman (Virāj) अतिसृष्टिः surpassing creation यत् that श्रेयसः greater (than he) देवान् gods असृजत (he) created; अथ well यत् because मर्त्यः mortal सन् being अमृतान् the immortals असृजत created तस्मात् therefore अतिसृष्टिः (this is) a surpassing creation; यः who एवम् thus वेद knows अस्य of Virāj एतस्याम्

अतिसृष्ट्याम् in this surpassing creation भवति (he) becomes (a creator) ह indeed.

6. Then he churned (his mouth) thus. He created fire[1] from its source—the mouth and hands. Therefore both of them are hairless within. When people say, 'Sacrifice to this god', 'Sacrifice to that god', considering them as separate gods, (they are mistaken, since) they are but the multiple projection of him alone. For he himself is all the gods. Now whatever is liquid in this world, he created from his seed. That is the moon.[2] This Universe is verily this much—food and the eater of food only. The moon indeed is food, and fire the eater of food. This is a surpassing creation of Brahman (Virāj), because he created the gods, who are even better than he. Inasmuch as, being himself mortal, he created the immortals, therefore this is a surpassing creation. He who knows thus becomes (a creator) in this creation of Virāj.

[[1] The ruler of the Brāhmaṇas. Similarly he created Indra and other gods, rulers of the Kṣatriyas, from his arms; the Vasus etc., rulers of the Vais'yas, from his thighs; and Pūṣan, the ruler of the S'ūdras, from his feet.

[2] Who is possessed of a liquid body.]

तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नामरूपाभ्यामेव व्याक्रियत, असौनामायमिदंरूप इति; तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियते, असौनामायमिदंरूप इति; स एष इह प्रविष्टः। आ नखाग्रेभ्यः, यथा क्षुरः क्षुरधानेऽवहितः स्यात्, विश्वम्भरो वा विश्वम्भरकुलाये; तं न पश्यन्ति। अकृत्स्नो हि सः, प्राणन्नेव प्राणो नाम भवति। वदन् वाक्, पश्यंश्चक्षुः, शृण्वन् श्रोत्रम्, मन्वानो मनः; तान्यस्यैतानि कर्मनामान्येव। स योऽत एकैकमुपास्ते न स वेद, अकृत्स्नो ह्येषोऽत एकैकेन भवति; आत्मेत्येवोपासीत, अत्र ह्येते सर्व एकं भवन्ति। तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा, अनेन ह्येतत्सर्वं वेद। यथा ह वै पदेनानुविन्देदेवम्; कीर्तिं श्लोकं विन्दते य एवं वेद ॥ ७ ॥

तर्हि Then इदम् this तत् ह that अव्याकृतम् unmanifested आसीत् was, तत् it अयम् it असौनामा called so and so इदंरूपः of such and such form इति thus नामरूपाभ्याम् as name and form एव only व्याक्रियत manifested itself ; तत् so एतर्हि now अपि even इदम् it असौनामा (is) of such and such name, अयम् it इदंरूपः (is) of such and such form इति thus नामरूपाभ्याम् as name and form एव only व्याक्रियते is manifested ; सः that एषः this (Self) इह here, into all bodies आ up to नखाग्रेभ्यः the nail-ends प्रविष्टः has penetrated, यथा just as क्षुरधाने in the razor case क्षुरः a razor अवहितः स्यात्

may lie, विश्वम्भरः fire which sustains the universe वा or विश्वम्भर-कुलाये in the source (wood etc.) of the fire ; तम् It न not पश्यन्ति (people) realise ; सः It (viewed piecemeal) हि for अकृत्स्नः (is) incomplete ; प्राणन् performing breathing etc. एव only प्राणः नाम called the vital force भवति (It) is, वदन् speaking वाक् speech (speaker), पश्यन् seeing चक्षुः the eye (seer), शृण्वन् hearing श्रोत्रम् the ear (listener), मन्वानः thinking मनः the mind (thinker) ; तानि those एतानि these अस्य its कर्मनामानि names due to functions एव merely. सः He यः who अतः of this (totality) एकैकम् each (aspect) उपास्ते meditates upon सः he न not वेद knows, अतः of this (totality) हि because एकैकेन (qualified) by each aspect एषः It अकृत्स्नः incomplete भवति is ; आत्मा the (Supreme) Self इति as एव only उपासीत (one) should meditate upon (It), अत्र in it हि because एते these सर्वे all एकम् one भवन्ति become. अस्य Of this सर्वस्य all तत् that एतत् this यत् which (is) अयम् this आत्मा Self पदनीयम् (is) to be known, अनेन through it हि because एतत् this सर्वम् all वेद (one) knows, यथा ह वै just as पदेन through (its) footprints अनुविन्देत् (one) traces (a missing animal) एवम् similarly ; यः who एवम् thus वेद knows कीर्तिम् reputation, knowledge of unity श्लोकम् (and) company (of relatives), liberation विन्दते attains.

7. This universe was then[1] unmanifested. It manifested itself only as name and form— it got such and such name and such and such

form. So even now the universe is manifested only as name and form—it gets such and such name and such and such form. This (Supreme) Self has penetrated[2] into all these bodies up to the nail-ends—just as a razor lies in its case, or as fire lies in its source. People do not realise It, for It is incomplete (when viewed as doing particular functions). When It only performs breathing etc., It is called the vital force; when It speaks, the vocal organ (*i.e.*, speaker); when It sees, the eye (seer); when It hears, the ear (listener); when It thinks, the mind (thinker); (and so on). These are but Its names due to functions. He who meditates upon each aspect of this totality does not know, because, being qualified by each aspect of the totality, It is incomplete. One should meditate upon It only as the (Supreme) Self, because in It all these become one. Of all these, this entity called the Self alone is to be known, because one knows all these through It—just as one can find (a missing animal) through its footprints. He who knows thus attains reputation and company (of his relatives) (or, the knowledge of unity and liberation).

[[1] Before what we call creation, that is, in its undifferentiated state.

[2] The penetration of the Self into all bodies from that of Hiraṇyagarbha down to the tiniest clump of grass is like the reflection of the sun in water.]

तदेतत्प्रेयः पुत्रात्, प्रेयो वित्तात्, प्रेयोऽन्यस्मात्सर्वस्मात् अन्तरतरम्, यदयमात्मा । स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्, प्रियं रोत्स्यतीति, ईश्वरो ह, तथैव स्यात्; आत्मानमेव प्रियमुपासीत; स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ ८ ॥

तत् एतत् This above-mentioned entity पुत्रात् than a son प्रेयः (is) dearer, वित्तात् than wealth प्रेयः, अन्यस्मात् सर्वात् than all other (objects) प्रेयः अन्तरतरम् inner, यत् which (is) अयम् this आत्मा Self. सः He यः who आत्मनः than Self अन्यम् anything else प्रियम् as dear ब्रुवाणम् to one describing ब्रूयात् may say, प्रियम् (his) dear (object) रोत्स्यति will perish इति, तथा like that एव certainly स्यात् (it) will be, ईश्वरः (he is) capable (of saying so) ह indeed; आत्मानम् upon the Self एव alone प्रियम् (as) dear उपासीत (one) should meditate; सः he यः who आत्मानम् upon the Self एव alone प्रियम् as dear उपास्ते meditates अस्य his प्रियम् dear (object) न not ह certainly प्रमायुकम् short-lived भवति is.

8. This Self is dearer than a son, dearer than wealth, dearer than all other objects,

being nearer (than everything). If any one (holding the Self as dearest) says to a person describing anything other than the Self as dear, 'What is dear to you will perish', it will certainly be like that, for he is indeed capable of saying so. (Therefore) one should meditate upon the Self alone as dear. Of him who meditates upon the Self alone as dear, no dear object is short-lived.

तदाहुः, यत् 'ब्रह्मविद्यया सर्वं भविष्यन्तः' मनुष्या मन्यन्ते। किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ॥ ९ ॥

तत् This आहु: (seekers) say, ब्रह्मविद्यया through the knowledge of Brahman सर्वम् all, the universe भविष्यन्त: (we) shall become, shall attain identity with (इति this) मनुष्या: men यत् that मन्यन्ते think, तत् that ब्रह्म Brahman किम् what उ indeed अवेत् knew यस्मात् by which तत् It सर्वम् all, the universe अभवत् became इति.

9. (Some seekers) say, 'Men think, "Through the knowledge of Brahman we shall attain identity with the universe". Well, what did that Brahman know by which It attained identity with the universe?'

ब्रह्म वा इदमग्र आसीत्, तदात्मानमेवावेत्। अहं ब्रह्मास्मीति। तस्मात्तत्सर्वमभवत्; तद्यो यो देवानां प्रत्य-

बुध्यत स एव तदभवत्, तथर्षीणाम्, तथा मनुष्याणाम्; तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे, अहं मनुरभवं सूर्यश्चेति। तदिदमप्येतर्हि य एवं वेद, अहं ब्रह्मास्मीति, स इदं सर्वं भवति, तस्य ह न देवाश्चनाभूत्या ईशते। आत्मा ह्येषां स भवति; अथ योऽन्यां देवतामुपास्ते, अन्योऽसावन्योऽहमस्मीति, न स वेद, यथा पशुरेवं स देवानाम्। यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युः, एवमेकैकः पुरुषो देवान् भुनक्ति; एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति, किमु बहुषु? तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः॥ १०॥

इदम् This (self perceived in the body) अग्रे at first ब्रह्म Brahman वै verily आसीत् was, तत् that आत्मानम् itself एव only अहम् I ब्रह्म Brahman अस्मि am इति thus अवेत् knew. तस्मात् Because of that तत् it सर्वम् all अभवत् became; तत् regarding this देवानाम् among the gods यः यः whosoever प्रत्यबुध्यत realized सः he एव alone तत् That (Brahman) अभवत् became, तथा similarly ऋषीणाम् among the sages, तथा similarly मनुष्याणाम् among men; एतत् this (self) तत् (as) That पश्यन् realizing ऋषिः the sage वामदेवः Vāmadeva प्रतिपेदे knew ह indeed अहम् I मनुः Manu सूर्यः the sun च and अभवम् became इति. एतर्हि Now अपि even यः whoever एवम् thus तत् it इदम् this अहम् I ब्रह्म Brahman अस्मि am इति as वेद knows सः he इदं सर्वम् all this (universe) भवति becomes. देवाः चन even the gods तस्य

his अभूत्यै to bring about not becoming न not ईशते are able ह indeed, सः he हि because एषाम् their आत्मा self भवति becomes; अथ on the other hand यः who अन्याम् another देवताम् god उपास्ते adores, असौ he अन्यः (is) different (from me), अहम् I अन्यः different (from him) अस्मि am इति, सः he न not वेद knows; यथा as पशुः an animal (is to men) एवम् so सः (is) he देवानाम् to the gods. यथा ह As वै verily बहवः many पशवः animals मनुष्यम् man भुञ्ज्युः serve, एवम् so एकैकः each पुरुषः man देवान् gods भुनक्ति serves; एकस्मिन् a single एव only पशौ animal आदीयमाने being taken away अप्रियम् unpleasantness भवति there is, किमु what (to speak) बहुषु of many; तस्मात् therefore एषाम् to them तत् it (is) न not प्रियम् pleasant यत् that मनुष्याः men एतत् this (Self) विद्युः should know.

10. This (self) was verily Brahman at first.[1] It knew only itself as, 'I am Brahman'. Because of that it became all (the universe). And whosoever among the gods realised It became Brahman. Similarly among the sages, and among men. The sage Vāmadeva, realising his own self as That (Brahman), knew, 'I was Manu, and the sun'.[2] And even now whoever knows That in a similar way, *viz.*, as 'I am Brahman', becomes this universe. Even the gods are powerless to prevent his becoming the universe, for he becomes their

self. On the other hand, he who adores another god thinking, 'He is different from me, and I am different from him', does not know. As is an animal (to man), so is he to the gods. As many animals serve a man, so does each man serve the gods. If even one animal is taken away, it causes unpleasantness, what should one say of many animals? Therefore it is not pleasant to the gods that men should realise this Self.

[[1] Before the realisation of its eternal identity with It.
[2] *Ṛg-Veda* IV. xxvi. 1.]

ब्रह्म वा इदमग्र आसीदेकमेव; तदेकं सन्न व्यभवत्। तच्छ्रेयोरूपमत्यसृजत क्षत्रं, यान्येतानि देवत्रा क्षत्राणि—इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति। तस्मात्क्षत्रात्परं नास्ति; तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये, क्षत्र एव तद्यशो दधाति; सैषा क्षत्रस्य योनिर्यद्ब्रह्म। तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिम्; य उ एनं हिनस्ति स्वां स योनिमृच्छति, स पापीयान् भवति, यथा श्रेयांसं हिंसित्वा॥ ११॥

अग्रे At first इदम् this (Kṣatriya and other castes) ब्रह्म Brahman, Virāj as a Brāhmaṇa वै verily आसीत् was एकम्

alone एव just; तत् he एकम् alone सत् being न not व्यभवत् prospered. तत् He श्रेयः noble रूपम् a form क्षत्रम् the Kṣatriya अत्यसृजत created: एतानि who (are) यानि these देवत्रा among the gods क्षत्राणि Kṣatriyas—इन्द्रः Indra (the king of the gods) वरुणः Varuṇa (king of the aquatic animals) सोमः the moon (king of the Brāhmaṇas) रुद्रः Rudra (king of the beasts) पर्जन्यः Parjanya (king of lightning etc.) यमः Yama (king of the manes) मृत्युः Death (king of diseases) ईशानः (and) Is'āna (king of luminaries) इति namely. तस्मात् Therefore क्षत्रात् to the Kṣatriyas परम् superior न not अस्ति there is; तस्मात् hence राजसूये in the Rājasūya (sacrifice) ब्राह्मणः the Brāhmaṇa क्षत्रियम् the Kṣatriya अधस्तात् from below उपास्ते adores; तत् that यशः prestige क्षत्रे on the Kṣatriya एव alone दधाति bestows; यत् (that) which ब्रह्म (is) the Brāhmaṇa क्षत्रस्य of the Kṣatriya सा that एषा this योनिः (is) source. तस्मात् Therefore यदि अपि although राजा the king परमताम् pre-eminence गच्छति attains, अन्ततः at the end स्वाम् his योनिम् source ब्रह्म the Brāhmaṇa एव alone उपनिःश्रयति places himself under; यः उ who एनम् him हिनस्ति insults सः he स्वाम् his योनिम् source ऋच्छति destroys; सः he पापीयान् more vicious भवति becomes, यथा as (one does) श्रेयांसम् (one's) superior हिंसित्वा by injuring.

11. At first[1] the Kṣatriya and other castes were verily Brahman,[2] who was just alone. Being alone,[3] he did not prosper. He created a noble form, the Kṣatriya—consisting of those

who are Kṣatriyas among the gods: Indra, Varuṇa, the Moon, Rudra, Parjanya, Yama, Death, and Īs'āna. Therefore there is none superior to the Kṣatriya. Hence, in the Rājasūya sacrifice[4], the Brāhmaṇa adores the Kṣatriya from a lower seat. He bestows that prestige on the Kṣatriya alone. It is the Brāhmaṇa who is the source of the Kṣatriya. Therefore, although the king attains pre-eminence (in that sacrifice), at the end he places himself under the Brāhmaṇa alone, who is his source. He who insults the Brāhmaṇa destroys his own source. He becomes more vicious (by doing this), as one does by insulting one's superior.

[[1] Before the creation of castes other than the Brāhmaṇa.

[2] Virāj in the form of fire, who is a Brāhmaṇa among the gods. He is called Brahman (a Brāhmaṇa), because he identified himself with that caste.

[3] Without the protecting Kṣatriyas and other helpers.

[4] When the king, anointed for the Rājasūya sacrifice, addresses the priest as Brahman, the later replies, 'You, O King, are Brahman'.]

स नैव व्यभवत्, स विशमसृजत, यान्येतानि देवजातानि गणश आख्यायन्ते—वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति ॥ १२ ॥

सः He (Virāj) न not एव still व्यभवत् prospered, सः he विशम् Vais′ya असृजत created : एतानि these देवजातानि classes of gods यानि who गणशः in groups आख्यायन्ते are described — वसवः the (eight) Vasus रुद्राः the (eleven) Rudras आदित्याः the (twelve) Ādityas विश्वेदेवाः the (thirteen) Vis′vadevas मरुतः (and) the (forty-nine) Maruts इति namely.

12. He did not prosper[1] still.[2] He created the Vais′yas — those classes of gods that are described in groups: the Vasus, the Rudras, the Ādityas, the Vis′vadevas, and the Maruts.

[[1] For want of somebody to secure wealth for them.
[2] Even after the creation of the Kṣatriyas.]

स नैव व्यभवत्, स शौद्रं वर्णमसृजत पूषणम्; इयं वै पूषा, इयं हीदं सर्वं पुष्यति यदिदं किञ्च ॥ १३ ॥

सः He न not एव still व्यभवत् prospered, सः he शौद्रम् the S′ūdra वर्णम् caste पूषणम् Pūṣan असृजत created ; इयम् this (earth) वै verily पूषा (is) Pūṣan, इयम् this (earth) हि because यत् किं च whichever इदम् (is) here, इदम् this सर्वम् all पुष्यति nourishes.

13. He did dot prosper[1] still. He created the S′ūdra caste, *viz.*, Pūṣan.[2] This earth indeed is Pūṣan; for it nourishes all this that exists.

[[1] For want of servants.
[2] Lit. the nourisher.]

स नैव व्यभवत्, तच्छ्रेयोरूपमत्यसृजत धर्मम्; तदेतत् क्षत्रस्य क्षत्रं यद्धर्मः, तस्माद्धर्मात्परं नास्ति; अथो अबलीयान् बलीयांसमाशंसते धर्मेण, यथा राज्ञैवम्; यो वै स धर्मः सत्यं वै तत्, तस्मात् सत्यं वदन्तमाहुः, धर्मं वदतीति, धर्मं वा वदन्तं सत्यं वदतीति, एतद्ध्येवैतदुभयं भवति ॥ १४ ॥

सः He न not एव still व्यभवत् prospered, तत् that श्रेयः noble रूपम् a form धर्मम् righteousness अत्यसृजत created; यत् (that) which धर्मः (is) righteousness तत् that एतत् this क्षत्रस्य of the Kṣatriya क्षत्रम् (is) the Kṣatriya or ruler, तस्मात् therefore धर्मात् than righteousness परम् (anything) greater न not अस्ति there is; अथो so अबलीयान् a weak person बलीयांसम् one who is stronger धर्मेण through righteousness आशंसते wishes (to defeat), यथा as राज्ञा through the king एवम् similarly; यः वै which (is) सः that धर्मः righteousness तत् that वै verily सत्यम् (is) truth, तस्मात् hence सत्यम् the truth वदन्तम् of one speaking आहुः (people) say, धर्मम् what is righteous वदति (he) speaks इति, धर्मम् what is righteousness वा or वदन्तम् of one speaking सत्यम् what is true वदति (he) speaks इति, एतत् this उभयम् couple हि because एतत् this (righteousness) एव only भवति is.

14. He did not prosper still. He created a noble form, righteousness. It is righteousness

which is the ruler of (even) the Kṣatriyas. Therefore there is nothing greater than righteousness. So even a weak person wishes (to defeat) one who is stronger through righteousness, as one does through the king. What is righteousness is indeed truth.[1] Hence people say of one speaking what is true, that he speaks what is righteous, or of one speaking what is righteous, that he speaks what is true, because both of them are but righteousness.

[[1] Truth is the theoretical knowledge of a thing according to the Scriptures. When the same knowledge is put into practice, it is called righteousness.]

तदेतद्ब्रह्म क्षत्रं विट् शूद्रः ; तदग्निनैव देवेषु ब्रह्माभवत् ; ब्राह्मणो मनुष्येषु, क्षत्रियेण क्षत्रियो, वैश्येन वैश्यः, शूद्रेण शूद्रः ; तस्मादग्नावेव देवेषु लोकमिच्छन्ते, ब्राह्मणे मनुष्येषु, एताभ्यां हि रूपाभ्यां ब्रह्माभवत् । अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति, स एनमविदितो न भुनक्ति, यथा वेदो वाननूक्तः, अन्यद्वा कर्माकृतम्; यदिह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति, तद्धास्यान्ततः क्षीयत एव ; आत्मानमेव लोकमुपासीत ; स य आत्मानमेव लोकमुपास्ते, न हास्य कर्म क्षीयते । अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते ॥ १५ ॥

तत् That एतत् this (fourfold caste was created): ब्रह्म the Brāhmaṇa क्षत्रम् the Kṣatriya विट् the Vais'ya शूद्रः (and) the S'ūdra; तत् that (Virāj) देवेषु among the gods अग्निना as fire एव only ब्रह्म Brāhmaṇa अभवत् became, मनुष्येषु among men ब्राह्मणः as the Brāhmaṇa, क्षत्रियेण through the (divine) Kṣatriya क्षत्रियः a Kṣatriya, वैश्येन through the (divine) Vais'ya वैश्यः a Vais'ya, शूद्रेण through the (divine) S'ūdra शूद्रः a S'ūdra; तस्मात् therefore देवेषु among the gods अग्नौ through fire (by performing rites) एव only लोकम् objective इच्छन्ते (people) wish to attain, मनुष्येषु (and) among men ब्राह्मणे as the Brāhmaṇa, ब्रह्म Virāj हि because एताभ्यां रूपाभ्याम् of these two forms अभवत् became. अथ But यः ह वै whoever स्वम् his own लोकम् objective (the Self) अदृष्ट्वा not realizing अस्मात् लोकात् from this world प्रैति goes out, सः it अविदितः being unknown एनम् him न not भुनक्ति protects, यथा as वा either अननूक्तः unread वेदः the Vedas, अन्यत् any other (secular) वा or अकृतम् not performed कर्म work (do not help); अनेवंवित् one not knowing thus इह in the world यदि वै if महत् plentiful पुण्यम् meritorious कर्म work अपि even करोति does, अस्य his तत् ह that अन्ततः at the end क्षीयते is exhausted एव undoubtedly; आत्मानम् the Self एव only लोकम् upon the objective उपासीत (one) should meditate; सः he यः who आत्मानम् the Self एव only लोकम् upon the objective उपास्ते meditates अस्य his कर्म work न ह never क्षीयते is exhausted. यत् यत् Whatever हि for कामयते (he)

desires तत् तत् that अस्मात् from this आत्मनः Self एव alone सृजते (he) creates.

15. (Thus) this (fourfold caste was created): the Brāhmaṇa, the Kṣatriya, the Vais'ya and the S'ūdra. Virāj became a Brāhmaṇa among the gods only as fire, and among men as the Brāhmaṇa; (he became) a Kṣatriya (among men) through[1] the (divine) Kṣatriyas, a Vais'ya through the (divine) Vais'yas and a S'ūdra through the (divine) S'ūdra. Therefore people wish to attain their objective among the gods only through fire, and among men through (birth as) a Brāhmaṇa,[2] since Virāj assumed these two forms. But if any one goes out of this world without realising the objective of their own Self, the latter, being unknown, does not protect him, just as the Vedas unread, or any other work not performed, (do not help). Even if a person who lacks such knowledge does plenty of meritorious work in the world, that work of his is undoubtedly exhausted at the end. One should (therefore) meditate only upon the objective that is the Self. The work of one who meditates only upon the objective of the Self is never exhausted. For he creates whatever he desires from this very Self.

[[1] As presided over by.

[2] A Brāhmaṇa can attain the ends of human life without performing rites connected with fire, simply through prayer. Only if he wants to go to heaven, he has to resort to them.]

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः; स यज्जुहोति, यद्यजते, तेन देवानां लोकः; अथ यदनुब्रूते तेन ऋषीणाम्; अथ यत्पितृभ्यो निपृणाति, यत्प्रजामिच्छते तेन पितृणाम्; अथ यन्मनुष्यान्वासयते, यदेभ्योऽशनं ददाति, तेन मनुष्याणाम्; अथ यत्पशुभ्यस्तृणोदकं विन्दति, तेन पशूनाम्; यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य उपजीवन्ति, तेन तेषां लोकः; यथा ह वै स्वाय लोकायारिष्टिमिच्छेत्, एवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति; तद्वा एतद्विदितं मीमांसितम् ॥ १६ ॥

अथो Now अयम् this आत्मा self (the householder) वै verily सर्वेषां भूतानाम् of all beings लोकः (is) the support; सः he यत् that जुहोति offers libations (in the fire), यत् that यजते (he) sacrifices, तेन by that देवानाम् of the gods लोकः the support; अथ now यत् that अनुब्रूते (he) repeats, recites (the Vedas) तेन by that ऋषीणाम् (the support) of the sages; अथ then यत् that पितृभ्यः to the manes निपृणाति (he) makes offerings, यत् (and) that प्रजाम् offspring इच्छते desires, obtains, तेन by that पितृणाम् (the support) of the

manes ; अथ then यत् that मनुष्यान् men वासयते (he) lodges, यत् (and) that एभ्य: to them अशनम् food ददाति (he) gives तेन by that मनुष्याणाम् (the support) of men ; अथ then यत् that पशुभ्य: for animals तृणोदकम् fodder and water विन्दति (he) provides तेन by that पशूनाम् (the support) of animals ; यत् that अस्य गृहेषु in his houses श्वापदा: beasts वयांसि birds आ पिपीलिकाभ्य: (and) even ants उपजीवन्ति feed, तेन by that तेषाम् their लोक: support ; यथा ह just as वै verily स्वाय लोकाय to one's own body अरिष्टिम् welfare इच्छेत् (one) wishes एवं ह so सर्वाणि all भूतानि beings एवंविदे to him who knows thus अरिष्टिम् welfare इच्छन्ति wish ; तत् that एतत् this वै indeed विदितम् known मीमांसितम् (and) discussed.

16. Now this self (the householder) is verily the support of all beings. It is by offering libations in the fire and performing sacrifices that he becomes a support to the gods. By reciting the Vedas he acts as a support to the sages. By making offerings to the manes and desiring offspring he is a support of the manes. By lodging men and giving food to them he becomes a support of men. By providing fodder and water for animals he becomes their support. And as beasts and birds and even ants feed in his houses, he is thereby their support. Just as

one wishes welfare to one's body, so do all beings wish welfare to him who knows thus. All this (fivefold duty) has verily been known,[1] and discussed.[2]

[[1] In *S'a. Brā.* I. VII. ii. 6.
[2] *Ibid.* I. VII. ii. 1.]

आत्मैवेदमग्र आसीदेक एव ; सोऽकामयत — जाया मे स्यात्, अथ प्रजायेय ; अथ वित्तं मे स्यात्, अथ कर्म कुर्वीयेति ; एतावान् वै कामः, नेच्छंश्चनातो भूयो विन्देत् ; तस्मादप्येतर्ह्येकाकी कामयते — जाया मे स्यात्, अथ प्रजायेय ; अथ वित्तं मे स्यात्, अथ कर्म कुर्वीयेति ; स यावदप्येतेषामेकैकं न प्राप्नोति, अकृत्स्न एव तावन्मन्यते ; तस्यो कृत्स्नता — मन एवास्यात्मा, वाग्जाया, प्राणः प्रजा, चक्षुर्मानुषं वित्तम्, चक्षुषा हि तद्विन्दते ; श्रोत्रं दैवम् ; श्रोत्रेण हि तच्छृणोति ; आत्मैवास्य कर्म, आत्मना हि कर्म करोति ; स एष पाङ्क्तो यज्ञः, पाङ्क्तः पशुः, पाङ्क्तः पुरुषः, पाङ्क्तमिदं सर्वं यदिदं किञ्च ; तदिदं सर्वमाप्नोति य एवं वेद ॥ १७ ॥ इति चतुर्थं ब्राह्मणम् ॥

इदम् This (variety of covetable objects) अग्रे in the beginning आत्मा the self (the unenlightened bachelor) एव

only आसीत् was एकः single एव just; सः he अकामयत desired, मे to me जाया a wife स्यात् let there be, अथ so that प्रजायेय (I) may be born (as the child); अथ and मे to me वित्तम् wealth स्यात् let there be, अथ so that कर्म rites कुर्वीय (I) may perform इति; कामः desire एतावान् (is) this much वै verily; इच्छन् wishing चन even अतः than this भूयः more न not विन्देत् (one) can attain; तस्मात् therefore एतर्हि now अपि even एकाकी (being) single कामयते (one) desires, मे जाया स्यात्, अथ प्रजायेय; अथ मे वित्तं स्यात्, अथ कर्म कुर्वीय इति (as above); सः he यावत् as long एतेषाम् of these एकैकम् each अपि even न not प्राप्नोति gets तावत् so long अकृत्स्नः (he is) incomplete एव only मन्यते (he) thinks; तस्य his कृत्स्नता completeness उ too (takes place in this way): मनः the mind एव itself (is) अस्य his आत्मा self, वाक् speech जाया wife, प्राणः vital force प्रजा progeny, चक्षुः the eye मानुषम् human वित्तम् wealth, चक्षुषा by the eye हि since तत् it विन्दते (he) obtains, श्रोत्रम् the ear दैवम् (is) divine (wealth), श्रोत्रेण by the ear हि since तत् it शृणोति (he) hears of, आत्मा the body एव itself अस्य his कर्म rite, आत्मना through the body हि since कर्म rite करोति (he) performs; सः that एषः this पाङ्क्तः having five factors यज्ञः (is) sacrifice; पशुः an animal पाङ्क्तः (has) five factors, पुरुषः man पाङ्क्तः (has) five factors, यत् किं च इदम् whatever there is इदम् this सर्वम् all पाङ्क्तम् (has) five factors; यः who एवम् thus वेद knows तत् that इदम् this सर्वम् all आप्नोति (he) attains.

17. In the beginning[1] this (variety of covetable objects) was but the self[2]—just a single entity. He desired, 'Let me have a wife, so that I may be born (as the child), and let me have wealth, so that I may perform rites'. Desire verily comprises this much. One cannot attain more than this even if one wishes. Therefore even now a man being single desires, 'Let me have a wife, so that I may be born, and let me have wealth, so that I may perform rites'. So long as he does not get each of these, he thinks he is but incomplete. His completeness (may take place in this way) too:[3] The mind verily is his self,[4] speech his wife,[5] the vital force his progeny,[6] the eye his human wealth—since he attains it with the help of the eye, the ear his divine wealth[7]—since he hears it through the ear, and the body itself his rite, since he performs rites through the body. (So) this is a (mental) sacrifice consisting of five factors. For an animal has five factors, man has five factors,[8] and whatever exists consists of five factors. He who knows thus[9] attains all this (universe).

[[1] Before marriage.

[2] As identified with the body and organs, that is, an unenlightened bachelor.

[3] Through meditation.

[4] Standing for the sacrificer, the head of the family, since the mind directs the body and organs.

[5] Being subservient to the mind. 'Speech' means spoken words, scriptural or secular.

[6] For the mind, after considering utterances, stimulates activity, which is the function of the vital force.

[7] Meditation that helps us to attain identity with the gods.

[8] *Viz.*, the mind, speech, vital force, eye and ear. And a sacrifice is performed with the help of men and animals.

[9] He who knows the whole universe of means and ends consisting of the above five factors as one with Hiraṇyagarbha, and meditates upon him as identical with himself.]

SECTION FIVE

यत्सप्तान्नानि मेधया तपसाजनयत्पिता ।
एकमस्य साधारणं द्वे देवानभाजयत् ॥
त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् ।
तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ॥
कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा ।
यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन ॥
स देवानपिगच्छति स ऊर्जमुपजीवति ॥
इति श्लोकाः ॥ १ ॥

पिता The father यत् that मेधया through meditation तपसा (and) through rites सप्त seven अन्नानि (kinds of) food अजनयत् created (is being set forth) एकम् one अस्य of this (world) साधारणम् (is) general, द्वे two देवान् to the gods अभाजयत् (he) assigned, त्रीणि three आत्मने for himself अकुरुत (he) fixed, एकम् one पशुभ्यः to animals प्रायच्छत् (he) gave ; यत् च whatever प्राणिति lives यत् whatever च and न not सर्वम् all तस्मिन् on it (the last) प्रतिष्ठितम् rests. सर्वदा Constantly अद्यमानानि being consumed तानि they कस्मात् why न not क्षीयन्ते are exhausted ? यः वै Whoever ताम् that अक्षितिम् (the cause of) inexhaustibility वेद knows सः he प्रतीकेन prominently अन्नम् food अत्ति eats, सः he देवान् with the gods अपिगच्छति attains identity, सः he ऊर्जम् nectar उपजीवति lives on ; इति these श्लोकाः (are) the Mantra verses.

1. That the father[1] created seven kinds of food through meditation and rites (is being set forth): One was the general food of all beings; two he assigned to the gods; three he fixed for himself; and one he gave to animals. Whatever lives and whatever does not all rest on this (last). Why are the foods not exhausted, though they are constantly being consumed? Whoever knows (the cause of) this inexhaustibility eats food prominently. He attains identity with the gods, he lives on nectar. These are the Mantra verses.

[1 Although Hiraṇyagarbha is the creator of the universe, yet every being who performs meditation and work is a determining factor in the creation of the environment in which he is to find himself in the next cycle. Hence he, like Hiraṇyagarbha, is here spoken of as the father of the objects of enjoyment he will then come across, which are here designated as food, divided into seven kinds for the purpose of meditation.]

'यत्सप्तान्नानि मेधया तपसाजनयत्पिता' इति मेधया हि तपसाजनयत्पिता। 'एकमस्य साधारणम्' इतीदमेवास्य तत्साधारणमन्नं यदिदमद्यते। स य एतदुपास्ते न स पाप्मनो व्यावर्तते, मिश्रं ह्येतत्। 'द्वे देवानभाजयत्' इति हुतं च प्रहुतं च, तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वति; अथो आहुर्दर्शपूर्णमासाविति। तस्मान्नेष्टियाजुकः स्यात्। 'पशुभ्य एकं प्रायच्छत्' इति तत्पयः। पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति; तस्मात् कुमारं जातं घृतं वै वाग्रे प्रतिलेहयन्ति, स्तनं वानुधापयन्ति; अथ वत्सं जातमाहुरतृणाद इति। 'तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न' इति पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न। तद्यदिदमाहुः, संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति, न तथा विद्यात्; यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान्,

सर्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति । 'कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा' इति पुरुषा वा अक्षितिः, स हीदमन्नं पुनः पुनर्जनयते । 'यो वैतामक्षितिं वेद' इति पुरुषो वा अक्षितिः, स हीदमन्नं धिया धिया जनयते कर्मभिः; यद्धैतन्न कुर्यात्क्षीयेत ह; 'सोऽन्नमत्ति प्रतीकेन' इति मुखं प्रतीकम्, मुखेनेत्येतत् । 'स देवानपिगच्छति स ऊर्जमुपजीवति' इति प्रशंसा ॥ २ ॥

पिता यत् मेधया तपसा सप्त अन्नानि अजनयत् (see above) इति this (means): पिता मेधसा तपसा हि verily अजनयत्. एकम् अस्य साधारणम् (As before) इति this (means): 'यत् which इदम् this (food) अद्यते is eaten इदम् this (is) एव indeed अस्य of all beings साधारणम् general अन्नम् food. सः He यः who एतत् this उपास्ते adores सः he पाप्मनः from sin न never व्यावर्तते is away, एतत् this हि for मिश्रम् (is) common (food). द्वे देवान् अभाजयत् (As before) इति this (means): हुतं च making libations in the fire प्रहुतम् giving (other) offerings to the gods च and, तस्मात् therefore देवेभ्यः to the gods जुह्वति च (they) make libations प्रजुह्वति gives offerings च and; अथो however आहुः (some say) दर्श-पूर्णमासौ the new-moon and full-moon sacrifices इति. तस्मात् Therefore इष्टि-याजुकः Iṣṭi-sacrificer for material results न not स्यात् (one) should be. एकं पशुभ्यः प्रायच्छत् (As before) (means): तत् it (is) पयः milk. मनुष्याः च Men पशवः animals च and अग्रे at first पयः milk एव only हि for उपजीवन्ति live on;

तस्मात् therefore जातम् new-born कुमारम् a child अग्रे at first घृतम् melted butter एव only वा either प्रतिलेहयन्ति (men) make lick, स्तनम् the breast वा or अनुधापयन्ति make suckle ; अथ and जातम् new-born वत्सम् a calf आहुः (they) say of, अतृणादः not eating grass इति. यत् च प्राणिति यत् च न तस्मिन् सर्वं प्रतिष्ठितम् (As before) इति this (means) : यत् च whatever प्राणिति is animate यत् whatever च and न (is) not इदम् this सर्वम् all पयसि on milk हि indeed प्रतिष्ठितम् rests. तत् On this point इदं यत् what आहुः (some Brāhmaṇa texts) say, पयसा with milk संवत्सरम् for a year जुह्वत् making offerings (in the fire) पुनर्मृत्युम् further death अपजयति conquers इति, तथा like that न not विद्यात् (one) should understand ; एवम् as above विद्वान् one who knows यत् अहः which day जुहोति (he) makes offering तत् that अहः day एव very पुनर्मृत्युम् अपजयति, देवेभ्यः to the gods हि for सर्वम् all अन्न-अद्यम् eatable food प्रयच्छति (he) offers. सर्वदा अद्यमानानि तानि कस्मात् न क्षीयन्ते (As before) इति this (means) : पुरुषः man (the eater) वै verily अक्षितिः (is the cause of their) inexhaustibility, सः he हि because इदम् this अन्नम् food पुनः पुनः again and again जनयते creates. यः वै एताम् अक्षितिं वेद (As before) इति this (means) ; पुरुषः वै अक्षितिः, सः हि इदम् अन्नम् (as before) धिया धिया through meditations for the time being कर्मभिः (and) through activities जनयते creates ; यत् ह if perchance एतत् this न not कुर्यात् (he) does क्षीयेत (it) is exhausted ह surely. सः प्रतीकेन अन्नम् अत्ति (As before) इति this (means) : प्रतीकम् Pratika मुखम् (is) mouth (prominence), मुखेन as the

mouth (prominently) इति एतत् that is to say. स: देवान् अपिगच्छति, स: ऊर्जम् उपजीवति (As before) इति this प्रशंसा (is) eulogy.

2. 'That the father created seven kinds of food through meditation and rites' means that the father verily created them through meditation and rites. 'One was the general food of all beings' means that this food which is eaten (by all) is indeed that general food of all beings. He who adores (appropriates) this food is never away from sin, for this is the common food (of all). 'Two he assigned to the gods' means making libations in the fire and giving other offerings to the gods. Therefore people make libations to the gods in the fire and give them other offerings. Some, however, hold that these two mean the new-moon and full-moon sacrifices. Therefore one should not be (chiefly) occupied with the Iṣṭi sacrifice for material results.[1] 'One he gave to animals' means—it is milk. For men and animals at first live on milk only. Therefore people either make a new-born child lick only melted butter or suckle it. And they say of a new-born calf that it is not yet eating grass. 'Whatever lives and whatever does

not all rest on this' means whatever is animate and inanimate indeed rests on milk.[2] On this point it is said[3] that by making offerings of milk in the fire for a year one overcomes further death. One should not understand like that. He who knows as above overcomes[4] further death on that very day on which he makes that offering. For he offers all eatable food to the gods. 'Why are the foods not exhausted, though they are constantly being consumed?' means that the eater is verily the cause of their inexhaustibility, because he creates this food again and again. 'Whoever knows (the cause of) this inexhaustibility' means that the eater is indeed the cause of their inexhaustibility, because he creates this food through meditations for the time being and through activities.[5] If perchance he does not do this, it will surely be exhausted. In the sentence, 'He eats food prominently (Pratīkena)', 'Pratīka' means front (prominence). So the meaning is, prominently.[6] 'He attains identity with the gods, he lives on nectar' is eulogy.

[[1] The Kāmyeṣṭi sacrifice, which leads to heaven etc.
[2] The universe has been created as a result of the

offerings made in the Agnihotra and other rites. See *S'a. Brā.* XI. vi. ii. 6-7 and *Manu Saṁ.* III. 76.

[3] In some other Brāhmaṇas. In the Agnihotra (fire-offering) three hundred and sixty oblations are offered in one year, taking morning and evening oblations as one. The bricks, called Yājuṣmatī, by which the altar for the Agnihotra is built have the same number. The oblations are imagined as these bricks, and so also are the days of the year. Through this meditation one attains identity with Fire, the Prajāpati called the Year, and thus overcomes further death. This is the view of those Brāhmaṇas.

[4] After death he becomes identified with Hiraṇya-garbha and has no more birth to make further death possible.

[5] Even while experiencing the results of past work, a person engages himself in new meditations and work, thereby ensuring continuity of the foods.

[6] Unlike an ignorant man, he is always an eater of food and never food.]

'त्रीण्यात्मनेऽकुरुत' इति मनो वाचं प्राणम्, तान्यात्मनेऽकुरुत; 'अन्यत्रमना अभूवम्, नादर्शम्', 'अन्यत्रमना अभूवम्, नाश्रौषम्' इति, मनसा ह्येव पश्यति, मनसा शृणोति। कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव; तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति; यः कश्च शब्दो वागेव सा।

एषा ह्यन्तमायत्ता, एषा हि न; प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एव; एतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥

त्रीणि आत्मने अकुरुत (As before) इति this (means): मनः the mind वाचम् the organ of speech प्राणम् (and) the vital force, तानि these आत्मने for himself अकुरुत (he) fixed; (they say) अन्यत्रमनाः absent-minded अभूवम् (I) was, न not अदर्शम् (I) saw, अन्यत्रमनाः अभूवम्, न not अश्रौषम् (I) heard इति, मनसा through the mind हि for एव alone पश्यति (one) sees, मनसा through the mind शृणोति (one) hears. कामः Desire सङ्कल्पः resolution विचिकित्सा doubt श्रद्धा faith अश्रद्धा want of faith धृतिः patience अधृतिः impatience ह्रीः modesty धीः intelligence भीः fear इति etc. एतत् this सर्वम् all मनः (is) the mind एव only; तस्मात् therefore पृष्ठतः from behind अपि even उपस्पृष्टः being touched मनसा through the mind विजानाति (one) discerns; यः कः च whatever शब्दः sound (is there) सा वाक् (is) the well-known speech एव indeed. एषा It हि because अन्तम् decision (revelation about everything) आयत्ता underlies, एषा it (is) हि न not; प्राणः Prāṇa अपानः Apāna व्यानः Vyāna उदानः Udāna समानः Samāna अनः Ana इति एतत् this सर्वम् all प्राणः (is) the vital force एव only; अयम् this आत्मा body (miscalled self by the ignorant) वै verily एतन्मयः (is) composed of these — वाङ्मयः composed of speech मनोमयः composed of the mind प्राणमयः composed of the vital force.

3. 'Three he fixed for himself' means the mind, the organ of speech and the vital force; these he fixed for himself. (They say), 'My mind was elsewhere, so I did not see', 'My mind was elsewhere, so I did not hear'. For everybody sees, and hears, through the mind alone.[1] Desire,[2] resolution,[3] doubt, faith, want of faith, patience, impatience, modesty, intelligence and fear—all these are simply (forms of) the mind. Therefore if one is touched even from behind, one discovers[4] it through the mind. And whatever sound is there is indeed speech; because it underlies the revelation of objects, but it is not itself subject to revelation. The Prāṇa,[5] Apāna,[6] Vyāna, Udāna,[8] Samāna[9] and Ana[10]—all these are only the vital force. This body is verily composed of these three. It is composed of these—of speech, the mind and the vital force.

[[1] Even when the organ is joined to its object, perception is impossible without the help of the mind.

[2] Sex attraction etc.

[3] Decision about a thing lying in front of us that it is white or blue, big or small, and so on.

[4] As a touch of the hand or the knee, for instance, which the skin alone cannot do

[5] The nerve function connected with the heart, which moves to the mouth and nostrils and issues in front.

[6] Which functions between the heart and the navel and helps excretion.

[7] Which regulates the Prāṇa and Apāna and causes actions that require strength.

[8] Which permeates the whole body and causes nutrition, rising up and departure from the body.

[9] Which is seated in the belly and helps digestion and assimilation.

[10] Which is the general form of these functions and is concerned with all activities of the body.]

त्रयो लोका एत एव; वागेवायं लोकः, मनोऽन्तरिक्ष-लोकः, प्राणोऽसौ लोकः ॥ ४ ॥

एते These (are) एव indeed त्रयः the three लोकाः worlds; वाक् the organ of speech एव itself अयं लोकः (is) this world (the earth), मनः the mind अन्तरिक्षलोकः the sky, प्राणः (and) the vital force असौ लोकः that world (heaven).

4. These are indeed the three worlds. The organ of speech itself is the earth, the mind is the sky, and the vital force is heaven.

त्रयो वेदा एत एव; वागेवर्ग्वेदः, मनो यजुर्वेदः, प्राणः सामवेदः ॥ ५ ॥

एते These (are) एव indeed त्रयः the three वेदाः Vedas; वाक् the organ of speech एव itself ऋग्वेदः (is) the Ṛg Veda,

मनः the mind यजुर्वेदः the Yajur-Veda प्राणः (and) the vital force सामवेदः the Sāma-Veda.

5. These are indeed the three Vedas. The organ of speech itself is the Ṛg-Veda, the mind is the Yajur-Veda, and the vital force is the Sāma-Veda.

देवाः पितरो मनुष्या एत एव; वागेव देवाः, मनः पितरः, प्राणो मनुष्याः ॥ ६ ॥

एते These (are) एव indeed देवाः the gods पितरः the manes मनुष्याः (and) men; वाक् the organ of speech एव itself देवाः (is) the gods, मनः the mind पितरः the manes प्राणः (and) the vital force मनुष्याः men.

6. These are indeed the gods, the manes and men. The organ of speech itself is the gods, the mind is the manes, and the vital force is men.

पिता माता प्रजैत एव; मन एव पिता, वाङ्माता, प्राणः प्रजा ॥ ७ ॥

एते These (are) एव indeed पिता the father माता the mother प्रजा (and) the child; मनः the mind एव itself पिता (is) the father, वाक् the organ of speech माता the mother प्राणः (and) the vital force प्रजा the child

7. These are indeed the father, mother and child. The mind itself is the father, the organ of speech is the mother, and the vital force is the child.

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव ; यत्किञ्च विज्ञातं वाचस्तद्रूपम्, वाग्घि विज्ञाता ; वागेनं तद्भूत्वावति ॥८॥

एते These (are) एव indeed विज्ञातम् the known विजिज्ञास्यम् what is to be known अविज्ञातम् (and) the unknown ; यत् किं च whatever विज्ञातम् (is) known तत् that वाचः of speech रूपम् (is) a form, वाक् the organ of speech हि because विज्ञाता (is) the knower ; वाक् the organ of speech एनम् him तत् that भूत्वा by becoming अवति protects.

8. These are indeed what is known, what is to be known, and what is unknown. Whatever is known is a form of the organ of speech, because speech is the knower.[1] The organ of speech protects him (who knows this) by becoming[2] what is known.

[[1] Being self-luminous, it brings other objects to light.
[2] By becoming the object of his enjoyment in that form. Similarly in the other two cases.]

यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपम्, मनो हि विजिज्ञास्यम् ; मन एनं तद्भूत्वावति ॥ ९ ॥

यत् किं च Whatever विजिज्ञास्यम् (is) to be known तत् that मनसः of the mind रूपम् (is) a form, मनः mind हि because विजिज्ञास्यम् (is) what is to be known ; मनः एनं तत् भूत्वा अवति (as before).

9. Whatever is to be known is a form of the mind; because the mind is what is to be known.[1] The mind protects him (who knows this) by becoming what is to be known.

[[1] Being deliberative, it takes the form of a thing the pros and cons of which are being weighed.]

यत्किञ्चाविज्ञातं प्राणस्य तद्रूपम्, प्राणो ह्यविज्ञातः; प्राण एनं तद्भूत्वावति ॥ १० ॥

यत् किं च Whatever अविज्ञातम् (is) completely unknown तत् that प्राणस्य of the vital force रूपम् (is) a form, प्राणः the vital force हि because अविज्ञातः (is) the unknown ; प्राणः एनं तत् भूत्वा अवति (as before).

10. Whatever is unknown is a form of the vital force; because the vital force is what is unknown. The vital force protects him (who knows this) by becoming what is unknown.

तस्यै वाचः पृथिवी शरीरम्, ज्योतीरूपमयमग्निः; तद्यावत्येव वाक्, तावती पृथिवी, तावानयमग्निः ॥११॥

तस्यै (तस्याः) वाचः Of that organ of speech पृथिवी the earth शरीरम् (is) the body, अयम् this अग्निः fire ज्योतीरूपम् (is) the luminous form (organ); तत् now यावती as far as एव just वाक् the organ of speech (extends), तावती so far पृथिवी the earth, तावान् so far अयम् this अग्निः fire.

11. The earth is the body of that organ of speech, and this fire is its luminous form (organ). And as far as the organ of speech extends, so far does the earth, and so far this fire.

अथैतस्य मनसो द्यौः शरीरम्, ज्योतीरूपमसावादित्यः; तद्यावदेव मनः, तावती द्यौः, तावानसावादित्यः; तौ मिथुनं समैताम्, ततः प्राणोऽजायत; स इन्द्रः, स एषोऽसपत्नः, द्वितीयो वै सपत्नः; नास्य सपत्नो भवति य एवं वेद ॥१२॥

3. On this subject there is this Mantra verse: There is a bowl with its opening below and bulging above; in it manifold knowledge has been placed: seven sages sit by its side; and the organ of speech, which utters words, is the eighth. The 'bowl with its opening below and bulging above' is this head (of ours), for it is a bowl with its opening below and bulging above. 'In it manifold knowledge has been placed', refers to the organs, which verily represent manifold knowledge.[1] 'Seven sages sit by its side', refers to the organs, which are verily the sages. 'The organ of speech, which utters words, is the eighth'—

because the organ of speech, the eighth one,[2] utters words.

[[1] Knowledge of sense-objects, which leads to glory, which is the word used in the text. Sense-objects are cognised by the organs.

[2] The tongue, being the organ of both taste and speech, counts as two. Here it is described as the latter, and in the next paragraph as the former.]

इमावेव गोतमभरद्वाजौ, अयमेव गोतमः, अयं भरद्वाजः; इमावेव विश्वामित्रजमदग्नी, अयमेव विश्वामित्रः, अयं जमदग्निः; इमावेव वसिष्ठकश्यपौ, अयमेव वसिष्ठः, अयं कश्यपः; वागेवात्रिः, वाचा ह्यन्नमद्यते, अत्तिर्ह वै नामैतद्यदत्रिरिति; सर्वस्यात्ता भवति, सर्वमस्यान्नं भवति य एवं वेद ॥ ४ ॥ इति द्वितीयं ब्राह्मणम् ॥

इमौ These two (ears) एव indeed गोतम-भरद्वाजौ (are) Gotama and Bharadvāja, अयम् this एव indeed गोतमः (is) Gotama, अयम् this भरद्वाजः (is) Bharadvāja; इमौ these two (eyes) एव indeed विश्वामित्र-जमदग्नी (are) Vis'vāmitra and Jamadagni, अयम् this एव indeed विश्वामित्रः (is) Vis'vāmitra, अयम् this जमदग्निः (is) Jamadagni; इमौ these two (nostrils) एव indeed वसिष्ठ-कश्यपौ Vasiṣṭha and Kas'yapa, अयम् this एव indeed वसिष्ठः (is) Vasiṣṭha, अयम् this कश्यपः (is) Kas'yapa; वाक् the tongue एव indeed अत्रिः (is) Atri, वाचा through the tongue हि for अन्नम् food अद्यते is eaten;

यत् which अत्रिः (is) Atri इति एतत् this अत्तिः (is) Atti ह वै indeed नाम the name ; यः who एवम् thus वेद knows सर्वस्य of all (food) अत्ता the eater भवति (he) becomes, सर्वम् everything अस्य his अन्नम् food भवति becomes.

4. These two (ears) are indeed Gotama and Bharadvāja: this[1] is Gotama, and this Bharadvāja. These two (eyes) are indeed Vis'vāmitra and Jamadagni: this one is Vis'vāmitra, and this one Jamadagni. These two (nostrils) are indeed Vasiṣṭha and Kas'yapa: this one is Vasiṣṭha, and this one Kas'yapa. The tongue[2] is indeed Atri, for through it food is eaten. 'Atri' is only the familiar name 'Atti'.[3] He who knows thus[4] becomes the eater of all food,[5] and everything becomes his food.[6]

[Here are given the names of the sages sitting by the side of the bowl.

[1] Either of the two. So in the other cases.

[2] Which is the seventh organ.

[3] Indirectly referred to.

[4] Knows the true nature of the vital force as also the derivation of the word 'Atri'.

[5] Belonging to the vital force, because of his identification with the latter.

[6] He never becomes anybody's food.]

SECTION THREE

द्वे वाव ब्रह्मणो रूपे—मूर्तं चैवामूर्तं च, मर्त्यं चामृतं च, स्थितं च यच्च, सच्च त्यच्च ॥ १ ॥

ब्रह्मणः Of Brahman द्वे two वाव only रूपे forms (there are)—मूर्तं च gross अमूर्तं subtle च and, मर्त्यं च mortal अमृतं (relatively) immortal च and, स्थितं च limited यत् unlimited च and, सत् च perceptible त्यत् imperceptible च and.

1. Brahman has only two forms[1]—gross and subtle, mortal and immortal, limited and unlimited, perceptible and imperceptible.

[[1] Limiting adjuncts superimposed through ignorance.]

तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्च; एतन्मर्त्यम्, एतत्स्थितम्, एतत्सत्; तस्यैतस्य मूर्तस्य, एतस्य मर्त्यस्य, एतस्य स्थितस्य, एतस्य सत एष रसो य एष तपति, सतो ह्येष रसः ॥ २ ॥

यत् Which वायोः च than air अन्तरिक्षात् than the ether च and अन्यत् (is) other तत् that एतत् (is) this मूर्तम् gross, एतत् it मर्त्यम् (is) mortal, एतत् it स्थितम् (is) limited, एतत् it सत् (is) perceptible; तस्य that above-mentioned एतस्य this मूर्तस्य of gross, एतस्य मर्त्यस्य of this mortal, एतस्य स्थितस्य of this limited, एतस्य सतः of this perceptible (form) रसः the essence एषः (is) this—यः which एषः this

(sun) तपति shines, एष: it हि for सत: of the (above) three elements रस: (is) the essence.

2. The gross form is that which is other than air and the ether.[1] It is mortal, it is limited, and it is perceptible.[2] The essence of that form which is gross, mortal, limited and perceptible is the shining sun,[3] for it is the essence of those three elements.

[[1] That is, earth, water and fire.
[2] These four attributes are interdependent.
[3] The solar orb, not the deity.]

अथामूर्तम्—वायुश्चान्तरिक्षं च; एतदमृतम्, एतद्यत्, एतत्त्यत्; तस्यैतस्यामूर्तस्य, एतस्यामृतस्य, एतस्य यतः, एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषः, त्यस्य ह्येष रसः—इत्यधिदैवतम् ॥ ३ ॥

अथ Now अमूर्तम् the subtle—वायु: च air अन्तरिक्षम् the ether च and; एतत् it अमृतम् (is) immortal, एतत् it यत् (is) unlimited, एतत् it त्यत् (is) imperceptible; तस्य that, above-mentioned एतस्य this अमूर्तस्य of subtle (form), एतस्य अमृतस्य of this immortal, एतस्य यत: of this unlimited, एतस्य त्यस्य of this imperceptible (form) रस: essence एष: (is) this—य: which एष: this एतस्मिन् मण्डले in this solar orb पुरुष: (is) the principle, एष: this हि because त्यस्य of the (above) two elements रस: (is) the essence; इति अधिदैवतम् this (is) with reference to the deities.

3. Now the subtle form—it is air and the ether. It is immortal, it is unlimited, it is imperceptible.[1] The essence of that form which is subtle, immortal, unlimited and imperceptible is the principle[2] that is in the solar orb, for it is the essence of those two elements. This is with reference to the deities.

[[1] As before, these four attributes are interdependent.
[2] The subtle body of Hiraṇyagarbha, not the sentient being we call by that name. The use of the word Puruṣa (being) is not unusual in such contexts in the S'ruti.]

अथाध्यात्मम्—इदमेव मूर्तं यदन्यत्प्राणाच्च, यश्चाय-मन्तरात्मन्नाकाशः; एतन्मर्त्यम्, एतत्स्थितम्, एतत्सत्; तस्यैतस्य मूर्तस्य, एतस्य मर्त्यस्य, एतस्य स्थितस्य, एतस्य सत एष रसो यच्चक्षुः, सतो ह्येष रसः ॥ ४ ॥

अथ Now अध्यात्मम् with reference to the body: मूर्तम् The gross (form) इदम् (is) this एव verily—यत् which प्राणात् च than the (corporeal) air, यः which (is) च and अयम् this अन्तरात्मन् in the body आकाशः ether (तस्मात् than that) अन्यत् (is) other; यत् which चक्षुः (is) the eye. (Rest as in paragraph 2.)

4. Now with reference to the body: The gross form is verily this—what is other than

(the corporeal) air and the ether that is in the body.[1] It is mortal, it is limited, it is perceptible. The essence of that form which is gross, mortal, limited and perceptible is the eye, for it is the essence of those three elements.

[[1] That is, corporeal earth, water and fire.]

अथामूर्तम्—प्राणश्च यश्चायमन्तरात्मन्नाकाशः; एतदमृतम्, एतद्यत्, एतत्त्यत्; तस्यैतस्यामूर्तस्य, एतस्यामृतस्य, एतस्य यतः, एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषः, त्यस्य ह्येष रसः ॥ ५ ॥

अथ Now अमूर्तम् the subtle (form)—प्राणः च the (corporeal) air यः which च and अयम् (is) this अन्तरात्मन् in the body आकाशः ether; यः which (is) अयम् this दक्षिणे अक्षन् in the right eye पुरुषः principle. (Rest as in paragraph 3.)

5. Now the subtle form—it is (the corporeal) air and the ether that is in the body. It is immortal, it is unlimited, it is imperceptible. The essence of that form which is subtle, immortal, unlimited, and imperceptible is this principle[1] that is in the right eye, for it is the essence of those two elements (in the body).

[[1] The subtle body.]

तस्य हैतस्य पुरुषस्य रूपम् । यथा माहारजनं वासः, यथा पाण्ड्वाविकम्, यथेन्द्रगोपः, यथाग्न्यर्चिः, यथा पुण्डरीकम्, तथा सकृद्विद्युत्तम्; सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेद; अथात आदेशः—नेति नेति, न ह्येतस्मादिति नेत्यन्यत्परमस्ति; अथ नामधेयम्—सत्यस्य सत्यमिति; प्राणा वै सत्यम्, तेषामेष सत्यम्॥ ६ ॥
इति तृतीयं ब्राह्मणम् ॥

तस्य ह Of that एतस्य this पुरुषस्य principle रूपम् the form (is as follows): यथा As माहारजनम् dyed with turmeric वासः a cloth (is), यथा as पाण्डु grey आविकम् sheep's wool (is), यथा as इन्द्रगोपः the (deep red) insect called Indragopa (is), यथा as अग्नि-अर्चिः a tongue of fire (is), यथा as पुण्डरीकम् a white lotus (is), यथा as सकृत्-विद्युत्तम् sudden lightening (is); यः who एवम् thus वेद knows अस्य to him सकृत्-विद्युत्ता sudden lightening इव like श्रीः fame ह वै verily भवति comes; अथ now अतः therefore आदेशः the specification (of Brahman)—इति this न not इति this न not; इति this न not इति एतस्मात् than this हि for अन्यत् other परम् better (specification) न not अस्ति there is; अथ now नामधेयम् (its) name—सत्यस्य of truth सत्यम् the Truth इति; प्राणाः the vital force वै verily सत्यम् (is) truth, एषः It तेषाम् of them सत्यम् (is) the Truth.

6. The form of that principle (the subtle body[1]) is as follows: As is a cloth dyed with

turmeric, or grey sheep's wool, or the (deep red) insect called Indragopa, or a tongue of fire, or a white lotus,[2] or a flash of lightning.[3] He who knows thus[4] verily attains fame like a flash of lightning. Now,[5] therefore, the specification (about Brahman): 'Not this, not this.'[6] For there is no other or better specification than this. Now Its sacred name—'the Truth of truth'. The vital force is truth, and It is the Truth of that.

[[1] The typical forms described here, consisting of the impressions of gross and subtle objects, belong only to the subtle body, and not the self.

[2] The colouring of impressions is due either to the objects presented to the mind or to its own tendencies.

[3] This refers to the subtle body of Hiraṇyagarbha. As lightning suddenly illumines all around, so does Hiraṇyagarbha, as he emerges from the Unmanifested, bring to light all things.

[4] Knows the above form of Hiraṇyagarbha's subtle body.

[5] After the nature of truth has been ascertained.

[6] These two negative particles eliminate not only the two limiting adjuncts—the gross and the subtle forms—but also all possible specifications about Brahman, which, having no distinguishing mark whatsoever, is free from all differentiations due to limiting adjuncts.]

SECTION FOUR

मैत्रेयीति होवाच याज्ञवल्क्यः, उद्यास्यन्वा अरेऽहम-स्मात्स्थानादस्मि, हन्त तेऽनया कात्यायन्यान्तं करवा-णीति ॥ १ ॥

याज्ञवल्क्यः Yājñavalkya उवाच ह said, मैत्रेयि O Maitreyī इति, अरे my dear अहम् I अस्मात् स्थानात् from this (householder's) life उद्यास्यत् about to step up वै verily अस्मि am, हन्त well अनया कात्यायन्या with this Kātyāyanī ते (of) your (relationship) अन्तम् an end करवाणि let me make इति.

1. 'Maitreyī', said Yājñavalkya, 'I am about to renounce this life, my dear. Well, let me end your relationship with this Kātyāyanī.'

सा होवाच मैत्रेयी । यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्यामिति; नेति होवाच याज्ञवल्क्यः, यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात्, अमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ २ ॥

सा That मैत्रेयी Maitreyī उवाच ह said, भगोः venerable sir यत् if नु indeed वित्तेन with wealth पूर्णा replete इयम् this सर्वा whole पृथिवी earth मे mine स्यात् be, तेन through that कथम् how अमृता immortal स्याम् shall (I) be इति; याज्ञवल्क्यः

Yājñavalkya उवाच ह said, न no इति, यथा as एव just उपकरणवताम् of those having (plenty of) materials जीवितम् (is) the life, तथा so एव exactly ते your जीवितम् life स्यात् will be, वित्तेन through wealth तु but अमृतत्वस्य of immortality आशा prospect न not अस्ति is इति.

2. At this Maitreyī said, 'Even if this whole earth replete with wealth be mine, venerable sir, will it make me immortal?' 'No', said Yājñavalkya, 'your life will be exactly like that of people well provided with materials, but there is no prospect of immortality through wealth.'

सा होवाच मैत्रेयी, येनाहं नामृता स्यां किमहं तेन कुर्याम्? यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ३ ॥

सा That मैत्रेयी Maitreyī उवाच ह said, येन through which अहम् I अमृता immortal न not स्याम् can be तेन with that अहम् I किम् what कुर्याम् shall do, यद् एव whatever भगवान् your venerable self वेद knows तत् that एव alone मे me ब्रूहि tell इति.

3. Maitreyī replied, 'What shall I do with that through which I cannot be immortal? Tell me, venerable sir, of that alone which you know (to be the means of immortality)'.

स होवाच याज्ञवल्क्यः, प्रिया बतारे नः सती प्रियं भाषसे, एहि, आस्स्व, व्याख्यास्यामि ते, व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥

सः That याज्ञवल्क्यः Yājñavalkya उवाच ह said, अरे my dear नः to me प्रिया dear बत ah सती having been प्रियम् (what is) dear (to me) भाषसे (you) say ; एहि come, आस्स्व sit down, ते to you व्याख्यास्यामि (I) shall explain, व्याचक्षाणस्य तु मे but while I explain (it) निदिध्यासस्व concentrate (upon it) इति.

4. Yājñavalkya said, 'Ah, you have (always) been dear to me, my beloved, and now you say what is dear to my heart. Come, sit down, I shall explain it to you. But while I explain it, concentrate upon it'.

स होवाच, न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवति, आत्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति, आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति, आत्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे

ब्रह्मणः कामाय ब्रह्म प्रियं भवति, आत्मनस्तु कामाय ब्रह्म प्रियं भवति। न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति, आत्मनस्तु कामाय क्षत्रं प्रियं भवति। न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति, आत्मनस्तु कामाय लोकाः प्रिया भवन्ति। न वा अरे देवानां कामाय देवाः प्रिया भवन्ति, आत्मनस्तु कामाय देवाः प्रिया भवन्ति। न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति, आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति। न वा अरे सर्वस्य कामाम सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि, आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्॥ ५॥

सः He उवाच ह said, अरे my dear पत्युः of the husband कामाय for the sake (need) पतिः the husband प्रियः dear न not भवति is वै verily, आत्मनः of (the wife's) own self तु but कामाय for the sake पतिः the husband प्रियः dear भवति is. जायायै Of the wife जाया the wife; पुत्राणाम् of sons, पुत्राः sons; वित्तस्य of wealth, वित्तम् wealth; ब्रह्मणः of the Brāhmaṇa, ब्रह्म the Brāhmaṇa; क्षत्रस्य of the Kṣatriya, क्षत्रम् the Kṣatriya; लोकानाम् of the worlds, लोकाः worlds;

देवानाम् of the gods, देवा: gods; भूतानाम् of beings, भूतानि beings; सर्वस्य of all सर्वम् all. (The rest is similar.) अरे My dear मैत्रेयि Maitreyī आत्मा the Self वै verily द्रष्टव्य: should be realised श्रोतव्य: should be heard of मन्तव्य: should be reflected on निदिध्यासितव्य: should be meditated upon; अरे my dear श्रवणेन through hearing मत्या through reflection विज्ञानेन (and) through meditation आत्मन: of the Self वै alone दर्शनेन by the realisation इदम् this सर्वम् all विदितम् (is) known.

5. Yājñavalkya said, 'Verily the husband is dear (to the wife) not for the sake of the husband, my dear, but it is for her own sake that he is dear. Verily the wife is dear (to the husband) not for the sake of the wife, my dear, but it is for his own sake that she is dear. Verily sons are dear (to parents) not for the sake of the sons, my dear, but it is for the sake of the parents themselves that they are dear. Verily wealth is dear not for the sake of wealth, my dear, but it is for one's own sake that it is dear. Verily the Brāhmaṇa is dear not for the sake of the Brāhmaṇa, my dear, but it is for one's own sake that he is dear. Verily the Kṣatriya is dear not for the sake of the Kṣatriya, my dear, but it is for one's own sake that he is dear. Verily worlds

are dear not for the sake of worlds, my dear, but it is for one's own sake that they are dear. Verily the gods are dear not for the sake of the gods, my dear, but it is for one's own sake that they are dear. Verily beings[1] are dear not for the sake of beings, my dear, but it is for one's own sake that they are dear. Verily all[2] is dear not for the sake of all, my dear, but it is for one's own sake that all is dear. The Self, my dear Maitreyī, should verily be realised: should be heard of, reflected on and meditated upon. By the realisation of the Self alone, my dear, through hearing, reflection and meditation, all this is known.

[The whole of this section recurs with minor variations in IV. iv.

In I. iv. 8 it has been said that the Self is dearer than a son etc. Here is an elaboration of that theme, showing that in truth our love for the Self is primary, and that for other objects secondary.

[1] The enumeration is in the order of the pleasurableness of the objects to us, because they must be shunned first.

[2] It includes everything that has been and has not been mentioned.]

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद, लोकास्तं परादुर्योऽन्यत्रा-

त्मनो लोकान् वेद, देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद, भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद; इदं ब्रह्म, इदं क्षत्रम्, इमे लोकाः, इमे देवाः, इमानि भूतानि, इदं सर्वं यदयमात्मा ॥ ६ ॥

ब्रह्म The Brāhmaṇa तम् him परादात् rejects यः who ब्रह्म the Brāhmaṇa आत्मनः from the Self अन्यत्र different वेद knows, परादुः reject. (The rest is similar.) इदम् This ब्रह्म Brāhmaṇa, इदं क्षत्रम् Kṣatriya, इमे these लोकाः worlds, इमे देवाः gods, इमानि these भूतानि beings, इदम् this सर्वम् all यत् (are) that अयम् which (is) this आत्मा Self.

6. 'The Brāhmaṇa rejects him who knows the Brāhmaṇa to be different from the Self. The Kṣatriya rejects him who knows the Kṣatriya to be different from the Self. Worlds reject him who knows worlds to be different from the Self. The gods reject him who knows the gods to be different from the Self. Beings reject him who knows beings to be different from the Self. All rejects him who knows all to be different from the Self. This Brāhmaṇa, this Kṣatriya, these worlds, these gods, these beings and this all are only the Self.

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्-ग्रहणाय, दुन्दुभेस्तु ग्रहणेन—दुन्दुभ्याघातस्य वा—शब्दो गृहीतः ॥ ७ ॥

सः यथा As हन्यमानस्य that is beaten दुन्दुभेः of a drum बाह्यान् शब्दान् particular notes ग्रहणाय to grasp न not शक्नुयात् (one) is able, दुन्दुभेः of the (general note of the) drum तु only दुन्दुभि-आघातस्य of the (general effect of the) strokes on the drum वा or ग्रहणेन by the grasping (knowledge) शब्दः the particular note गृहीतः (is) grasped.

7. 'As one is not able to grasp by themselves the particular notes of a drum that is being beaten, but it is only by grasping the general note of the drum, or the general effect of particular strokes on it, that those notes are grasped;

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नु-याद्ग्रहणाय, शङ्खस्य तु ग्रहणेन—शङ्खध्मस्य वा—शब्दो गृहीतः ॥ ८ ॥

ध्मायमानस्य That is blown शङ्खस्य of the conch, शङ्खस्य of the (general note of the) conch शङ्खध्मस्य of the (general effect of the) blowings on the conch. (The rest is similar.)

8. 'As one is not able to grasp by themselves the particular notes of a conch that is

being blown, but it is only by grasping the general note of the conch, or the general effect of particular blowings on it, that those notes are grasped;

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय, वीणायै तु ग्रहणेन—वीणावादस्य वा—शब्दो गृहीतः ॥ ९ ॥

वाद्यमानायै (वाद्यमानायाः) That is played वीणायै (वीणायाः) of the lute, वीणायै of the (general note of the) lute वीणावादस्य of the (general effect of the) playings on the lute. (The rest is similar.)

9. 'As one is not able to grasp by themselves the particular notes of a lute that is being played on, but it is only by grasping the general note of the lute, or the general effect of particular playings on it, that those notes are grasped;

[As the particular notes of a drum, conch or lute have no separate existence from the general note of those instruments, so the particular knowledge of the existing universe in the waking and dream states has no validity of its own apart from the Intelligence (Brahman) which pervades it.]

स यथार्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्ति, एवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजु-

वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि; अस्यैवैतानि निश्वसितानि ॥ १० ॥

सः यथा As अभ्याहितात् kindled आर्द्र-एध-अग्नेः from a fire with damp fuel पृथक्-धूमाः various kinds of smoke विनिश्चरन्ति proceed, एवं वै even so अरे my dear यत् which ऋग्वेदः *Ṛg-Veda* यजुर्वेदः *Yajur-Veda* सामवेदः *Sāma-Veda* अथर्वाङ्गिरसः *Atharvāṅgirasa* इतिहासः history पुराणम् mythology विद्याः arts उपनिषदः Upaniṣads श्लोकाः Mantra verses सूत्राणि aphorisms अनुव्याख्यानानि elucidations व्याख्यानानि (and) explanations एतत् all this अस्य this महतः limitless भूतस्य of Reality निश्वसितम् (is) the breath ; एतानि they अस्य of It एव alone निश्वसितानि (are) breaths.

10. 'As various kinds of smoke proceed from a fire[1] kindled with damp fuel, even so, my dear (Maitreyī), the *Ṛg-Veda*, *Yajur-Veda*, *Sāma-Veda*, *Atharvāṅgirasa*,[2] history,[3] mythology,[4] arts,[5] Upaniṣads, Mantra verses, aphorisms,[6] elucidations[7] and explanations[8] are the breath[9] (as it were) of this limitless Reality. They are (like) the breath of It alone.

[[1] As before their separation, the smoke, sparks, etc. are nothing but fire, so this differentiated universe is, before its origin, nothing but Brahman.

[2] *The Atharva-Veda.*

[3] Such as the dialogue between the nymph Urvaśī and Purūravas (*Śa. Brā.* XI. iv. iv. 1). All the subsequent items are parts of Brāhmaṇas only.

[4] Such as, 'This universe was in the beginning unmanifested' (*Tai. U.* II. 7).

[5] Which treat of music, dancing, etc. *e.g.*, 'This also is Veda' etc. (*Śa. Brā.* XIII. iv. iii. 10-14).

[6] Pithy statements of Truth, such as, 'One should meditate upon It as only the Supreme Self' (I. iv. 7 *ante*).

[7] Of Mantras or of aphorisms.

[8] Of Mantras, or corroborative statements (Arthavāda).

[9] As breaths come out of a man without any thought or effort, so do the eternally existing Vedas with their various sub-divisions as above issue spontaneously out of Brahman.]

स यथा सर्वासामपां समुद्र एकायनम्, एवं सर्वेषां स्पर्शानां त्वगेकायनम्, एवं सर्वेषां गन्धानां नासिके एकायनम्, एवं सर्वेषां रसानां जिह्वैकायनम्, एवं सर्वेषां रूपाणां चक्षुरेकायनम्, एवं सर्वेषां शब्दानां श्रोत्रमेकायनम्, एवं सर्वेषां सङ्कल्पानां मन एकायनम्, एवं सर्वासां विद्यानां हृदयमेकायनम्, एवं सर्वेषां कर्मणां हस्तावेकायनम्, एवं सर्वेषामानन्दानामुपस्थ एकायनम्, एवं सर्वेषां विसर्गाणां पायुरेकायनम्,

एवं सर्वेषामध्वनां पादावेकायनम्, एवं सर्वेषां वेदानां वागेकायनम् ॥ ११ ॥

स: यथा As सर्वासाम् अपाम् of all water समुद्र: the sea एक-अयनम् (is) the one merging place, एवम् similarly सर्वेषाम् all स्पर्शानाम् of touch त्वक् the skin (touch in general), गन्धानाम् of odours नासिके the nostrils (odour in general), रूपाणाम् of savours जिह्वा the tongue (taste in general), रसानाम् of colours चक्षु: the eye (colour in general), शब्दानाम् of sounds श्रोत्रम् the ear (sound in general), सङ्कल्पानाम् of deliberations मनः the mind, विद्यानाम् of knowledge हृदयम् the heart, intellect, कर्मणाम् of activities हस्तौ the hands, आनन्दानाम् of pleasures उपस्थ: the organ of generation, विसर्गाणाम् of excretions पायु: the anus, अध्वनाम् of walking पादौ the feet, वेदानाम् of the Vedas वाक् the organ of speech. (The rest is similar.)

11. 'As[1] the sea is the one merging place of all sorts of water, as the skin is the one merging place of all kinds of touch, as the nostrils[2] are the one merging place of all odours, as the tongue is the one merging place of all savours, as the eye is the one merging place of all colours, as the ear is the one merging place of all sounds, as the mind is the one merging place of all deliberations, as the intellect is the one merging place of all kinds

of knowledge, as the hands are the one merging place of all actions, as the organ of generation is the one merging place of all pleasures, as the anus is the one merging place of all excretions, as the feet are the one merging place of all kinds of walking, as the organ of speech is the one merging place of all Vedas.

[[1] The examples given are illustrative of unification or dissolution. They are meant to show that not only before and at the time of its origin and during its continuance but also at the time of dissolution and after, the universe is nothing but Brahman. Varieties of touch, smell, taste, colour and sound merge in their respective general forms. These in their turn merge in the general deliberation by the mind. The latter again merges in the general determination by the intellect. And this last merges in the Supreme Self, which is absolute Intelligence. Similarly the organs of action together with their objects also merge in the Self through the vital force. Thus, in the absence of all objects and organs, only the Self, the One without a second, remains.

[2] That is, odour in general. Similarly with the other organs.]

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत, न हास्योद्ग्रहणायेव स्यात्। यतो यतस्त्वाददीत लवणमेव, एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञान-

घन एव। एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति, न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥

सः यथा As उदके into water प्रास्तः thrown सैन्धव-खिल्यः a lump of salt उदकम् into the water एव only अनुविलीयेत dissolves, अस्य its उद्ग्रहणाय इव for picking up न not ह at all स्यात् (one) is (able), यतः यतः whencesoever तु but आददीत (one) takes लवणम् (it tastes) saline एव only, एवं वै even so अरे my dear अनन्तम् endless अपारम् infinite इदम् this महत् great भूतम् Reality विज्ञानघनः (is) a mass of intelligence एव only. एतेभ्यः भूतेभ्यः On account of these elements समुत्थाय standing out (separately) तानि them एव only अनु after विनश्यति is destroyed, प्रेत्य after attaining (isolation) संज्ञा (particular) consciousness (the separate existence of the self) न not अस्ति there is इति this अरे my dear ब्रवीमि (I) say इति so याज्ञवल्क्यः Yājñavalkya उवाच ह said.

12. 'As a lump of salt thrown into water only dissolves into the water, and none can at all pick it up, but from whichever part one takes the water, it has only a saline taste, even so, my dear, this great, endless, infinite Reality is only homogeneous[1] Intelligence. On account of these elements,[2] (the self) stands out[3] (separately), and as soon as these

are destroyed,[4] (its separate existence) is also destroyed.[5] After attaining (isolation) it has no (particular) consciousness. This is what I say, my dear', so said Yājñavalkya.

[[1] Free from all foreign substances.
[2] Constituting the human body and organs.
[3] Appears as an individualised entity.
[4] By the realisation of Brahman.
[5] As the reflection of the sun is destroyed when the reflecting medium is destroyed.]

सा होवाच मैत्रेयी, अत्रैव मा भगवानमूमुहत्, न प्रेत्य संज्ञास्तीति; स होवाच न वा अरेऽहं मोहं ब्रवीमि, अलं वा अर इदं विज्ञानाय ॥ १३ ॥

सा That मैत्रेयी Maitreyī उवाच ह said, अत्र here एव just भगवान् your reverence मा me अमूमुहत् has confused, (saying), प्रेत्य after attaining (isolation) संज्ञा consciousness न not अस्ति there is इति; सः ह he उवाच said, अरे my dear अहम् I मोहम् anything confusing न not वै of course ब्रवीमि am saying, अरे my dear इदम् this (Reality) वै certainly विज्ञानाय to know अलम् (is) competent.

13. Maitreyī said, 'Just here, venerable sir, you have confused me, saying that after attaining (isolation, the self) has no consciousness'.[1] Yājñavalkya replied, 'Of course I am

not saying anything confusing, my dear. This (great Reality) is certainly competent to know'.[2]

[[1] Maitreyī understood the word 'consciousness' without its implied qualifying epithet 'particular'. Hence she found it difficult to harmonise it with the character of the Self as Pure Intelligence, spoken of by Yājñavalkya.

[2] For It is Knowledge Itself. It has particular consciousness only when It joins Itself to limiting adjuncts—the body and organs—that are the creation of nescience.]

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरं शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते, तदितर इतरं विजानाति; यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्, तत्केन कं पश्येत्, तत्केन कं शृणुयात्, तत्केन कमभिवदेत्, तत्केन कं मन्वीत, तत्केन कं विजानीयात्? येनेदं सर्वं विजानाति तं केन विजानीयात्? विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥ इति चतुर्थं ब्राह्मणम् ॥

यत्र When हि for द्वैतम् duality इव as it were भवति there is तत् then इतरः one इतरम् another, something else जिघ्रति smells, इतरः इतरं पश्यति sees, शृणोति hears, अभिवदति speaks of, मनुते thinks, विजानाति knows; यत्र वै when सर्वम्

everything अस्य of him (the knower) आत्मा the self एव alone अभूत् has become तत् then केन through what कम् what जिघ्रेत् should (one) smell, तत् केन कं पश्येत् should see, शृणुयात् should hear, अभिवदेत् should speak of, मन्वीत should think of, विजानीयात् should know? येन (Being pervaded) by which इदम् this सर्वम् all विजानाति (one) knows तत् that केन through what विजानीयात् should (one) know? अरे My dear विज्ञातारम् the knower केन through what विजानीयात् should (one) know? (The rest is similar.)

14. For when[1] there is[2] duality, as it were,[3] then one smells another,[4] one sees another, one hears another, one speaks of another, one thinks of another, one knows another. When (however) all has become the very self of the knower of Brahman, then what should one smell and through what?[5] What should one see and through what? What should one hear and through what? What should one speak of and through what? What should one think of and through what? What should one know and through what? Through what should one know That[6] because of which all this is known? Through what, my dear, should one know the Knower?[7]

[[1] That is, in the state of ignorance.

[2] In Brahman, the Absolute

[3] There seems to be anything other than the Self.

[4] One entity, separated from the Supreme Self through ignorance—that is, the individual self—smells another entity different from itself.

[5] The words 'what' and 'through what', denoting respectively the object and the instrument, suggest the utter futility, in the state of Realisation, of the other factors of an action as well.

[6] The Immutable Intelligence, the Witness, whose reflection alone makes all phenomenal knowledge possible.

[7] As fire cannot burn itself, so the Self, the Eternal Subject, does not know Itself as an object.]

SECTION FIVE

इयं पृथिवी सर्वेषां भूतानां मधु, अस्यै पृथिव्यै सर्वाणि भूतानि मधु; यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ १ ॥

इयम् This पृथिवी earth सर्वेषां भूतानाम् of all beings मधु (is) honey (effect, helper), सर्वाणि all भूतानि beings अस्यै पृथिव्यै of this earth मधु (are) honey; अस्यां पृथिव्याम् in this earth यः च which (is) अयम् also this तेजोमयः bright

अमृतमयः immortal पुरुषः being, entity यः च अयम् अध्यात्मम् with reference to the body शारीरः associated with the body तेजोमयः अमृतमयः पुरुषः, अयम् this एव indeed सः (is) that यः which (is) अयम् this आत्मा self; इदम् this (Self-knowledge) अमृतम् (is the means of) immortality, इदम् this (substratum of the above four) ब्रह्म (is) Brahman, इदम् this (knowledge of Brahman) सर्वम् (is the means of becoming) all.

1. This earth is honey[1] to all beings, and all beings are honey to this earth. (So with) the bright, immortal being[2] who is in this earth, and, with reference to the body, the bright, immortal being[3] who is associated with the body.[4] These[5] four are only the Self.[6] This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[[1] Like honey, that is, effect, being the result of their past work. The word also connotes that which is helpful.

[2] The reference is to the subtle body consisting of the organs, mind, etc., which reveals objects and lasts till the realisation of the Self.

[3] The self as identified with the subtle body, or the individual self, in so far as it is associated with the earthy portion of that body.

[4] That is, they too are helpful to all beings, and all beings are helpful to them.

The interaction of these four leads to the conclusion that they spring from a common source, which is Brahman. It alone is real, and everything else is an effect, a mere name.

[5] Referred to in II. iv. 6.]

इमा आपः सर्वेषां भूतानां मधु, आसामपां सर्वाणि भूतानि मधु; यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं रैतसस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ २ ॥

इमाः आपः This water, आसाम् अपाम् of this water; आसु अप्सु in this water, रैतसः identified with the seed.*

2. This water is honey to all beings, and all beings are honey to this water. (So with) the bright, immortal being who is in this water, and, with reference to the body, the bright, immortal being who is identified with the seed.[1] These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

* The latter portion of each paragraph up to paragraph 14 is similar to its preceding portion.

[1 Because, in the body, water exists especially in the seed.]

अयमग्निः सर्वेषां भूतानां मधु, अस्याग्नेः सर्वाणि भूतानि मधु, यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ ३ ॥

अयम् This अग्निः fire, अस्य अग्नेः of this fire; अस्मिन् अग्नौ in this fire, वाङ्मयः identified with the organ of speech.

3. This fire is honey to all beings, and all beings are honey to this fire. (So with) the bright, immortal being who is in this fire, and, with reference to the body, the bright, immortal being who is identified with the organ[1] of speech. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[1 Because fire exists especially in the organ of speech.]

अयं वायुः सर्वेषां भूतानां मधु, अस्य वायोः सर्वाणि भूतानि मधु; यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ ४ ॥

अयम् This वायुः air, अस्य वायोः of this air; अस्मिन् वायौ in this air, प्राणः the vital force.

4. This air is honey to all beings, and all beings are honey to this air. (So with) the bright, immortal being[1] who is in this air, and, with reference to the body, the bright, immortal being who is identified with the vital force. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[[1] Air and the other elements are called honey, because they furnish materials for the body, while the beings dwelling in them are so called, because they function as the organs.]

अयमादित्यः सर्वेषां भूतानां मधु, अस्यादित्यस्य सर्वाणि भूतानि मधु; यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ ५ ॥

अयम् This आदित्यः sun, अस्य आदित्यस्य of this sun; अस्मिन् आदित्ये in this sun, चाक्षुषः identified with the eye.

5. This sun is honey to all beings, and all beings are honey to this sun. (So with) the bright, immortal being who is in this sun, and, with reference to the body, the bright, immortal being who is identified with the eye. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

इमा दिशः सर्वेषां भूतानां मधु, आसां दिशां सर्वाणि भूतानि मधु; यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ ६ ॥

इमाः These दिशः directions, आसां दिशाम् of these directions; आसु दिक्षु in these directions, श्रौत्रः identified with the ear प्रातिश्रुत्कः identified with each occasion of hearing.

6. These directions[1] are honey to all beings, and all beings are honey to these directions. (So with) the bright, immortal being who is in these directions, and, with reference to the body, the bright, immortal

being who is identified with the ear and each occasion of hearing. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[[1] Though, in the body, the ear is the counterpart of the directions, yet the being who is identified with each occasion of hearing is mentioned on account of his being especially manifest at that time.]

अयं चन्द्रः सर्वेषां भूतानां मधु, अस्य चन्द्रस्य सर्वाणि भूतानि मधु; यश्चायमस्मिंश्चन्द्रे तेजोमयोऽमृतमयः पुरुषः यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ ७ ॥

अयम् This चन्द्रः moon, अस्य चन्द्रस्य of this moon ; अस्मिन् चन्द्रे in this moon, मानसः identified with the mind.

7. This moon is honey to all beings, and all beings are honey to this moon. (So with) the bright, immortal being who is in this moon, and, with reference to the body, the bright, immortal being who is identified with the mind. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above

four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

इयं विद्युत् सर्वेषां भूतानां मधु, अस्यै विद्युतः सर्वाणि भूतानि मधु; यश्चायमस्यां विद्युति तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ ८ ॥

इयम् This विद्युत् lightning, अस्यै विद्युतः of this lightning; अस्यां विद्युति in this lightning, तैजसः identified with light (manifest in the skin).

8. This lightning is honey to all beings, and all beings are honey to this lightning. (So with) the bright, immortal being who is in this lightning, and, with reference to the body, the bright, immortal being who is identified with light (manifest in the skin). These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

अयं स्तनयित्नुः सर्वेषां भूतानां मधु, अस्य स्तनयित्नोः सर्वाणि भूतानि मधु; यश्चायमस्मिन् स्तनयित्नौ

तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं शाब्दः सौवर-स्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा ; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ ९ ॥

अयम् This स्तनयित्नुः thunder-cloud, अस्य स्तनयित्नोः of this thunder-cloud ; अस्मिन् स्तनयित्नौ in this thunder-cloud, शाब्दः identified with sound सौवरः identified with the voice.

9. This thunder-cloud is honey to all beings, and all beings are honey to this thunder-cloud. (So with) the bright, immortal being who is in this thunder-cloud, and, with reference to the body, the bright, immortal being who is identified with sound and the voice. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

अयमाकाशः सर्वेषां भूतानां मधु, अस्याकाशस्य सर्वाणि भूतानि मधु ; यश्चायमस्मिन्नाकाशे तेजोमयो-ऽमृतमयः पुरुषः, यश्चायमध्यात्मं हृद्याकाशस्तेजोमयोऽमृत-मयः पुरुषः, अयमेव स योऽयमात्मा ; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ १० ॥

अयम् This आकाश: ether, अस्य आकाशस्य of this ether; अस्मिन् आकाशे in this ether, हृदि in the heart आकाश: identified with the ether.

10. This ether is honey to all beings, and all beings are honey to this ether. (So with) the bright, immortal being who is in this ether, and, with reference to the body, the bright, immortal being who is identified with the ether in the heart. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

अयं धर्मः सर्वेषां भूतानां मधु, अस्य धर्मस्य सर्वाणि भूतानि मधु; यश्चायमस्मिन् धर्मे तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥११॥

अयम् this धर्म: righteousness, अस्य धर्मस्य of this righteousness; अस्मिन् धर्मे in this righteousness, धार्म: identified with righteousness.

11. This righteousness[1] is honey to all beings, and all beings are honey to this righteousness. (So with) the bright, immortal being

who is identified with this righteousness, and, with reference to the body, the bright, immortal being who is identified with righteousness. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[[1] Which, though imperceptible, is inferred from its effects—earth etc., and is also practised by people. In paragraph I. iv. 14, righteousness has been mentioned as identical with truth. But in this and the next paragraph they are separately stated, because righteousness produces its effects invisibly, while truth does so visibly. Both produce effects in a general and a particular form. In its general form, righteousness controls the five elements, and in its particular form, the body and organs. The next sentence refers to the two beings identified with these two forms.]

इदं सत्यं सर्वेषां भूतानां मधु, अस्य सत्यस्य सर्वाणि भूतानि मधु ; यश्चायमस्मिन् सत्ये तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं सात्यस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा ; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥१२॥

इदम् This सत्यम् truth, अस्य सत्यस्य of this truth ; अस्मिन् सत्ये in this truth, सात्यः identified with truth.

12. This truth[1] is honey to all beings, and all beings are honey to this truth. (So with) the bright, immortal being who is in this truth, and, with reference to the body, the bright, immortal being who is identified with truth. These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[[1] Which is righteousness in its visible form as good conduct. Its general form is inherent in the elements, and its particular form in the body and organs.]

इदं मानुषं सर्वेषां भूतानां मधु, अस्य मानुषस्य सर्वाणि भूतानि मधु; यश्चायमस्मिन् मानुषे तेजोमयोऽमृतमयः पुरुषः, यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥१३॥

इदम् This मानुषम् human species, अस्य मानुषस्य of this human species; अस्मिन् मानुषे in this human species, मानुषः identified with the human species (in the body).

13. This human[1] species is honey to all beings, and all beings are honey to this human species. (So with) the bright, immortal being

who is in this human species, and, with reference to the body, the bright, immortal being who is identified with the human species.[2] These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[[1] This is suggestive of the other species also. All beings help one another only as particular species.

[2] The same species can be looked at from the standpoint of the speaker as well as from that of others, thus giving rise to the above twofold division.]

अयमात्मा सर्वेषां भूतानां मधु, अस्यात्मनः सर्वाणि भूतानि मधु; यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषः, यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषः, अयमेव स योऽयमात्मा; इदममृतम्, इदं ब्रह्म, इदं सर्वम् ॥ १४ ॥

अयम् This आत्मा (cosmic) body, अस्य आत्मन: of this (cosmic) body; अस्मिन् आत्मनि in this (cosmic) body, अयम् this च and यः which आत्मा (is) the (individual) self.

14. This (cosmic) body[1] is honey to all beings, and all beings are honey to this (cosmic) body. (So with) the bright, immortal being[2] who is in this (cosmic) body, and the bright,

immortal being who is this (individual) self.[3] These four are only the Self. This (Self-knowledge) is (the means of) immortality. This (substratum of the above four) is Brahman. This (knowledge of Brahman) is (the means of becoming) all.

[[1] The aggregate of all bodies and organs without any distinction. In II. v. 1, only a portion of it, *viz.*, that relating to earth, was referred to as the being associated with the body.

[2] It refers to the cosmic mind, which is the essence of the subtle (II. iii. 3). Since it has no limitation pertaining to the body, there is no mention of it here.

[3] That is, Hiraṇyagarbha, for whom is this aggregate of gross and subtle bodies.]

स वा अयमात्मा सर्वेषां भूतानामधिपतिः, सर्वेषां भूतानां राजा; तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः, एवमेवास्मिन्नात्मनि सर्वाणि भूतानि, सर्वे देवाः, सर्वे लोकाः, सर्वे प्राणाः, सर्व एत आत्मानः समर्पिताः ॥ १५ ॥

सः That वै verily अयम् this आत्मा Self (the sage identified with the Supreme Self) सर्वेषां भूतानाम् of all beings अधिपतिः (is) the ruler, सर्वेषां भूतानाम् of all beings राजा (and) the king; तत् यथा just as रथनाभौ च in the nave of a

chariot-wheel रथनेमौ च and in the felloe of a chariot-wheel सर्वे all अराः spokes समर्पिताः (are) fixed, एवम् एव even so सर्वाणि all भूतानि beings, सर्वे all देवाः gods, सर्वे all लोकाः worlds, सर्वे all प्राणाः organs (and) सर्वे all एते these आत्मानः (individual) selves अस्मिन् आत्मनि in this Self समर्पिताः (are) fixed.

15. This same Self[1] is the ruler of all beings and the king of all beings.[2] Just as all spokes are fixed in the nave and the felloe of a chariot-wheel, even so are all beings, all gods, all worlds, all organs and all these (individual) selves fixed in this Self.

[[1] The man of realisation identified with the Supreme Self by shedding all apparent limitations, as stated in II. IV. 12.

[2] That is, a ruling monarch—not a subordinate governor, nor one holding the courtesy title of 'king'.]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् ।

तद्वां नरा सनये दंस उग्र-
माविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वा-
मश्वस्य शीर्ष्णा प्र यदीमुवाच ॥ इति ॥ १६ ॥

इदम् This वै verily तत् (is) that मधु meditation on mutual aids (यत् which) दध्यङ् Dadhyac आथर्वणः versed in the *Atharva-Veda* अश्विभ्याम् to the two As'vins उवाच imparted. ऋषिः The seer तत् that एतत् this (deed) पश्यन् observing अवोचत् said, नरा: O As'vins in human form तन्यतुः a cloud न as (Vedic use) वृष्टिम् (reveals) rain, वाम् of you both सनये for gain तत् that उग्रम् fearful दंसः deed called Daṁsa आविष्कृणोमि (I) will reveal, यत् (and how you acquired that) which मधु (was the meditation on) honey (mutual aids) यत् ईम् (and) which दध्यङ् Dadhyac आथर्वणः versed in the *Atharva-Veda* वाम् to you both अश्वस्य of a horse शीर्ष्णा through the head प्रोवाच ह imparted इति.

16. This is verily that meditation on mutual aids which Dadhyac,[1] versed in the *Atharva-Veda*, imparted to the two As'vins. Observing this deed, the seer said, 'O As'vins in human form, that fearful deed of yours for the sake of gain, called Daṁsa, I will reveal as a cloud does rain, (and how you acquired) that meditation on mutual aids which Dadhyac, versed in the *Atharva-Veda*, imparted to you through a horse's head'.[2]

[[1] The story is given in the *S'atapatha-Brāhmaṇa* as follows: It was a favourite subject to the As'vins. So Dadhyac came to them (and proposed to teach them)

(XIV. I. iv. 13). He said, 'Indra has threatened to cut off my head the moment I teach it to anybody. Hence I am afraid of him. If he does not behead me, then I can teach it to you'. 'We will save you', replied the As'vins. Dadhyac wanted to know how. The As'vins said, 'When you proceed to teach us, we shall behead you and preserve your head in a safe place. Then we shall fix a horse's head on you, through which you will teach us. And when Indra cuts that off, we shall bring back your own head and replace it on you'. Dadhyac agreed. Then everything went smoothly (XIV. I. i. 22-24).

[2] The Mantras occurring in paragraphs 16, 17 and 19 are taken from the *Ṛg-Veda* I. CXVI. 12, I. CXVII. 22 and VI. XLVII. 18 respectively. The seer of the first two was Kakṣīvat.]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् ।

आथर्वणायाश्विना दधीचे-
ऽश्व्यं शिरः प्रत्यैरयतम् ।
स वां मधु प्रवोचदृतायन्
त्वाष्ट्रं यदस्रावपि कक्ष्यं वाम् ॥ इति ॥ १७ ॥

अश्विना O As'vins आथर्वणाय versed in *Atharva-Veda* दधीचे on Dadhyac अश्व्यम् equine शिर: a head प्रत्यैरयतम् (you) fixed; दस्रौ O destroyers of enemy forces स: he ऋतायन् in fulfilment of his promise त्वाष्ट्रम् relating to the

sun मधु the meditation on mutual aids वाम् to you both प्रवोचत् imparted, अपि (that) also यत् which कक्ष्यम् (was) the secret meditation (relating to the Self) वाम् (he imparted) to you both इति. (Rest as before.)

17. This is verily that meditation on mutual aids which Dadhyac, versed in the *Atharva-Veda*, imparted to the two As'vins. Observing this deed, the seer said, 'O As'vins, you fixed an equine head on (the shoulders of) Dadhyac, who was versed in the *Atharva-Veda*. O destroyers of enemy forces, in fulfilment of his promise he imparted to you the meditation on mutual aids relating to the sun,[1] as also the secret meditation on them (relating to the Self)'.[2]

[[1] The following story occurs in *S'a. Brā.* XIV. I. i. 6-10 as also *Tai. Ā.* V. I. 3-6: Once Viṣṇu, feeling proud of his superiority to the other gods, stood resting his chin on the end of a bow. These gods maliciously got some termites to eat the bow-string, with the result that Viṣṇu's head was struck off. This became the sun. Then the gods asked the As'vins, who were their doctors to restore the head, for Viṣṇu represented sacrifices. To do this the rite called Pravargya was commenced. The, meditation on the above episode, which is a part of the rite, is the meditation on mutual aids relating to the sun.

[2] This will be set forth in the next two paragraphs.]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् ।

पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् ॥ इति ।

स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः; नैनेन किञ्चनानावृतम्, नैनेन किञ्चनासंवृतम् ॥ १८ ॥

द्विपदः With two feet पुरः cities, bodies चक्रे (He) created, चतुष्पदः with four feet पुरः bodies चक्रे (He) created; सः that पुरुषः Supreme Being पुरः first पक्षी a bird (the subtle body) भूत्वा becoming पुरः the bodies आविशत् entered इति; सः that वै verily अयम् this सर्वासु पूर्षु in all bodies पुरिशयः on account of dwelling in the bodies पुरुषः (is called) Puruṣa; एनेन by him किञ्चन anything अनावृतम् not enveloped न (is) not, एनेन by him किञ्चन anything असंवृतम् not pervaded न (is) not. (Rest as before.)

18. This is verily that meditation on mutual aids which Dadhyac, versed in the *Atharva-Veda*, imparted to the two As'vins. Observing this deed, the seer said, '(The Lord) created bodies[1] with two feet and bodies with four feet.[2] That Supreme Being, first entered the the bodies as the subtle body'.[3] As He dwells in all bodies, He is called Puruṣa. There is

nothing that is not enveloped by Him, nothing that is not pervaded by Him.[4]

[[1] Lit. cities. Human and bird bodies are meant.
[2] That is, animal bodies.
[3] Lit. a bird.
[4] The Supreme Being permeates the universe through and through. Because of this also He is Puruṣa.]

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् ।

रूपं रूपं प्रतिरूपो बभूव
तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते
युक्ता ह्यस्य हरयः शता दश ॥ इति ।

अयं वै हरयः, अयं वै दश च सहस्राणि, बहूनि चानन्तानि च ; तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्, अयमात्मा ब्रह्म सर्वानुभूः, इत्यनुशासनम् ॥ १९ ॥ इति पञ्चमं ब्राह्मणम् ॥

रूपं रूपम् To each form प्रतिरूप: similar बभूव (He) became, अस्य His तत् that रूपम् form प्रतिचक्षणाय (is) for (His) revelation ; इन्द्र: the Supreme Being मायाभि: through Māyā or false notions पुरुरूप: manifold ईयते is perceived

अस्य to him हि for दश ten शता: hundreds हरय: organs युक्ता: (are) yoked इति ; अयम् He वै verily हरय: (is) the organs, अयम् He (is) वै verily दश ten च and सहस्राणि thousands, बहूनि च numerous अनन्तानि countless च and ; तत् that एतत् this ब्रह्म Brahman अपूर्वम् (is) without antecedent (cause) अनपरम् without consequent (effect) अनन्तरम् without interior अबाह्यम् without exterior, अयम् this सर्व-अनुभू: all-experiencing आत्मा self ब्रह्म (is) Brahman, इति this अनुशासनम् (is) the instruction. (Rest as before.)

19. This is verily that meditation on mutual aids which Dadhyac, versed in the *Atharva-Veda*, imparted to the two As'vins. Observing this deed, the seer said, '(The Supreme Being) assumed the likeness of each form. That form of His is for His revelation.[1] On account of false notions the Supreme Being is perceived as manifold, for to Him are yoked ten organs,[2] nay hundreds[3] of them'. He indeed is the organs ; He indeed is ten and thousands, numerous and countless. That Brahman is without antecedent and without consequent, without interior and without exterior. This self, which experiences everything, is Brahman. This is the instruction (of all Vedānta).

[[1] But for the manifested universe of name and form, which includes the Scriptures, the relation between the

teacher and the disciple, etc., it would be impossible to know the transcendent Brahman.

[2] Called 'Hari', because they draw us away from the Self to sense-objects.

[3] Because there are many individual selves.]

SECTION SIX

अथ वंशः । पौतिमाष्यो गौपवनात्, गौपवनः पौतिमाष्यात्, पौतिमाष्यो गौपवनात्, गौपवनः कौशिकात्, कौशिकः कौण्डिन्यात्, कौण्डिन्यः शाण्डिल्यात्, शाण्डिल्यः कौशिकाच्च गौतमाच्च, गौतमः ॥ १ ॥

अथ Now **वंश:** the line (of teachers). (Rest as in the translation.)

1. Now the line[1] (of teachers): Pautimāṣya (received this knowledge) from Gaupavana, Gaupavana from (another) Pautimāṣya, (this) Pautimāṣya from (another) Gaupavana, (this) Gaupavana from Kaus'ika, Kaus'ika from Kauṇḍinya, Kauṇḍinya from S'āṇḍilya, S'āṇḍilya from Kaus'ika and Gautama, Gautama—

[[1] It is called *vaṁsa*, because it consists of sections like a bamboo. Here is the succession of teachers of the first four chapters of the last book of the *S'atapatha-Brāhmaṇa*, of which the first two chapters of this

Upaniṣad form the latter half. The names in the nominative case belong to the disciples, and those in the ablative to the teachers.]

आग्निवेश्यात्, आग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्च, आनभिम्लात आनभिम्लातात्, आनभिम्लात आनभिम्लातात्, आनभिम्लातो गौतमात्, गौतमः सैतवप्राचीनयोग्याभ्याम्, सैतवप्राचीनयोग्यौ पाराशर्यात्, पाराशर्यो भारद्वाजात्, भारद्वाजो भारद्वाजाच्च गौतमाच्च, गौतमो भारद्वाजात्, भारद्वाजः पाराशर्यात्, पाराशर्यो बैजवापायनात्, बैजवापायनः कौशिकायनेः, कौशिकायनिः ॥ २ ॥

(See the translation.)

2. From Āgnives'ya, Āgnives'ya from Sāṇḍilya and Ānabhimlāta, Ānabhimlāta from (another) Ānabhimlāta, (this) Ānabhimlāta from (a third) Ānabhimlāta, (this) Ānabhimlāta from Gautama, Gautama from Saitava and Prācīnayogya, Saitava and Prācīnayogya from Pārās'arya, Pārās'arya from Bhāradvāja, Bhāradvāja from (another) Bhāradvāja and Gautama, Gautama from (another) Bhāradvāja, (this) Bhāradvāja from (another) Pārās'arya, (this) Pārās'arya from Baijavāpāyana, Baijavāpāyana from Kaus'ikāyani, Kaus'ikāyani —

घृतकौशिकात्, घृतकौशिकः पाराशर्यायणात्, पाराशर्यायणः पाराशर्यात्, पाराशर्यो जातूकर्ण्यात्, जातूकर्ण्य आसुरायणाच्च यास्काच्च, आसुरायणस्त्रैवणेः, त्रैवणिरौपजन्धनेः, औपजन्धनिरासुरेः, आसुरिर्भारद्वाजात्, भारद्वाज आत्रेयात्, आत्रेयो माण्टेः, माण्टिर्गौतमात्, गौतमो गौतमात्, गौतमो वात्स्यात्, वात्स्यः शाण्डिल्यात्, शाण्डिल्यः कैशोर्यात्काप्यात्, कैशोर्यः काप्यः कुमारहारितात्, कुमारहारितो गालवात्, गालवो विदर्भीकौण्डिन्यात्, विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवात्, वत्सनपाद्बाभ्रवः पथः सौभरात्, पन्थाः सौभरोऽयास्यादाङ्गिरसात्, अयास्य आङ्गिरस आभूतेस्त्वाष्ट्रात्, आभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्रात्, विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम्, अश्विनौ दधीच आथर्वणात्, दध्यङ्ङाथर्वणोऽथर्वणो दैवात्, अथर्वा दैवो मृत्योः प्राध्वंसनात्, मृत्युः प्राध्वंसनः प्रध्वंसनात्, प्रध्वंसन एकर्षेः, एकर्षिर्विप्रचित्तेः, विप्रचित्तिर्व्यष्टेः, व्यष्टिः सनारोः, सनारुः सनातनात्, सनातनः सनगात्, सनगः परमेष्ठिनः, परमेष्ठी ब्रह्मणः; ब्रह्म स्वयम्भु, ब्रह्मणे नमः॥
॥ ३ ॥ इति षष्ठं ब्राह्मणम् ॥

सनगः Sanaga परमेष्ठिन: from Parameṣṭhin (Virāj); परमेष्ठी Parameṣṭhin (Virāj) ब्रह्मण: from Brahman

(Hiraṇyagarbha); ब्रह्म (the Supreme) Brahman स्वयम्भु (is) self-born, eternal; ब्रह्मणे to (the Supreme) Brahman नमः salutation. (Rest as in the translation.)

3. From Ghṛtakaus'ika, Ghṛtakaus'ika from Pārās'aryāyaṇa, Pārās'aryāyaṇa from Pārās'arya, Pārās'arya from Jātūkarṇya, Jātūkarṇya from Asurāyaṇa and Yāska, Āsurāyaṇa from Traivaṇi, Traivaṇi from Aupajandhani, Aupajandhani from Āsuri, Āsuri from Bhāradvāja, Bhāradvāja from Ātreya, Ātreya from Māṇṭi, Māṇṭi from Gautama, Gautama from (another) Gautama, (this) Gautama from Vātsya, Vātsya from S'āṇḍilya, S'āṇḍilya from Kais'orya Kāpya, Kais'orya Kāpya from Kumārahārita, Kumārahārita from Gālava, Gālava from Vidarbhīkauṇḍinya, Vidarbhīkauṇḍinya from Vatsanapāt Bābhrava, Vatsanapāt Bābhrava from Pathin Saubhara, Pathin Saubhara from Ayāsya Āṅgirasa, Ayāsya Āṅgirasa from Ābhūti Tvāṣṭra, Ābhūti Tvāṣṭra from Vis'varūpa Tvāṣṭra, Vis'varūpa Tvāṣṭra from the two As'vins, the As'vins from Dadhyac Ātharvaṇa, Dadhyac Ātharvaṇa from Atharvan Daiva, Atharvan Daiva from Mṛtyu Prādhvaṁsana, Mṛtyu Prādhvaṁsana from Pradhvaṁsana, Pradhvaṁsana from Ekarṣi, Ekarṣi

from Vipracitti, Vipracitti from Vyaṣṭi, Vyaṣṭi from Sanāru, Sanāru from Sanātana, Sanātana from Sanaga, Sanaga from Parameṣṭhin (Virāj), Parameṣṭhin from Brahman (Hiraṇya-garbha).[1] Brahman[2] is eternal. Salutation to Brahman.

[[1] Beyond him there was no teacher, for the Vedas, which are but another form of the Supreme Brahman, were spontaneously revealed through Its grace in his mind.

[2] The Supreme Brahman.]

CHAPTER THREE

SECTION ONE

ॐ। जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे; तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुः; तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव, कः स्विदेषां ब्राह्मणानामनूचानतम इति; स ह गवां सहस्रमवरुरोध; दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ १ ॥

ॐ Om. जनकः Janaka वैदेहः Emperor of Videha ह so goes the story बहु-दक्षिणेन attended with a profusion of gifts यज्ञेन through a sacrifice ईजे sacrificed; तत्र ह there कुरुपञ्चालानाम् of Kuru and Pañcāla ब्राह्मणाः Brāhmaṇas अभिसमेताः assembled बभूवुः were; तस्य ह that जनकस्य वैदेहस्य of Janaka, the Emperor of Videha विजिज्ञासा the desire to know बभूव arose, एषां ब्राह्मणानाम् among these Brāhmaṇas कः स्वित् which one अनूचानतमः (is) most learned इति; सः ह he गवाम् of cows सहस्रम् a thousand अवरुरोध confined; एकैकस्याः of each (cow) शृङ्गयोः on the horns दश दश ten पादाः Pādas (of gold) आबद्धाः attached बभूवुः were.

1. Om. Janaka, Emperor of Videha, performed a sacrifice in which there was a profusion of gifts. Brāhmaṇas from Kuru and Pañcāla were assembled there. A desire arose in the mind of Emperor Janaka of Videha to know who was the most learned among those Brāhmaṇas. He had a thousand cows confined (in a place), and on the horns of each cow was attached gold weighing ten Pādas.[1]

[The preceding chapter consisted mainly of scriptural testimony, whereas this one mainly draws upon reasoning. When both are combined, the oneness of the Self can be easily set forth.

[1] A Pāda is a quarter of a Pala, or about one-third of an ounce.]

तान्होवाच, ब्राह्मणा भगवन्तः, यो वो ब्रह्मिष्ठः स एता गा उदजतामिति । ते ह ब्राह्मणा न दधृषुः; अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाच, एताः सोम्योदज सामश्रवा३ इति; ता होदाचकार; ते ह ब्राह्मणाश्चुक्रुधुः, कथं नो ब्रह्मिष्ठो ब्रुवीतेति; अथ ह जनकस्य वैदेहस्य होताश्वलो बभूव; स हैनं पप्रच्छ, त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति; स होवाच, नमो वयं

ब्रह्मिष्ठाय कुर्मः, गोकामा एव वयं स्म इति ; तं ह तत एव प्रष्टुं दध्रे होताश्वलः ॥ २ ॥

तान् To them उवाच ह (he) said, भगवन्तः venerable ब्राह्मणाः O Brāhmaṇas यः who वाम् amongst you ब्रह्मिष्ठः (is) the greastest Vedic scholar सः he एताः these गाः cows उदजताम् conduct (home) इति. ते ह Those ब्राह्मणाः Brāhmaṇas न not दधृषुः dared ; अथ ह then याज्ञवल्क्यः Yājñavalkya स्वम् एव his own ब्रह्मचारिणम् to pupil उवाच said, सोम्य gentle, dear सामश्रवा३ Sāmas'ravas एताः these (cows) उदज conduct (home) इति ; ताः them उदाचकार ह (he) conducted ; ते ह those ब्राह्मणाः Brāhmaṇas चुक्रुधुः were angry (thinking), कथम् how नः amongst us ब्रह्मिष्ठः '(I am) the greatest Vedic scholar' ब्रुवीत can (he) assert इति ; जनकस्य of Janaka वैदेहस्य Emperor of Videha होता an invoking priest अश्वलः (named) As'vala बभूव there was ; अथ ह now सः he एनम् him (Yājñavalkya) पप्रच्छ ह asked, याज्ञवल्क्य Yājñavalkya त्वं नु you खलु indeed नः amongst us ब्रह्मिष्ठः the greatest Vedic scholar असी३ (असि) are इति ; सः ह he उवाच said, वयम् we ब्रह्मिष्ठाय to the greatest Vedic scholar नमः कुर्मः make salutations, वयम् we गोकामाः desirous of the cows एव only स्म are इति ; ततः एव ह thereupon होता the invoking priest अश्वलः As'vala तम् him प्रष्टुम् to question दध्रे resolved.

2. He said to them, 'Venerable Brāhmaṇas, let him who is the greatest Vedic scholar

amongst you drive these cows (home)'. The Brāhmaṇas did not dare. Then Yājñavalkya said to his own pupil, 'Sāmas'ravas, drive these cows (home), my son'. He drove them. The Brāhmaṇas were angry, thinking, 'How can he assert that he is the greatest Vedic scholar amongst us?' Janaka, Emperor of Videha, had an invoking priest[1] named As'vala. He now asked Yājñavalkya, 'Yājña-valkya, are you indeed the greatest Vedic scholar amongst us?' The other replied, 'I salute the greatest Vedic scholar, I only wish to have the cows'. Thereupon the invoking priest As'vala resolved to question him.

[[1] One who invokes the deities in a sacrifice, uttering hymns from the *Ṛg-Veda*.]

याज्ञवल्क्येति होवाच, यदिदं सर्वं मृत्युनाप्तम्, सर्वं मृत्युनाभिपन्नम्, केन यजमानो मृत्योराप्तिमतिमुच्यत इति; होत्रर्त्विजाग्निना वाचा; वाग्वै यज्ञस्य होता, तद्येयं वाक् सोऽयमग्निः, स होता, स मुक्तिः, सातिमुक्तिः ॥ ३ ॥

याज्ञवल्क्य O Yājñavalkya इति उवाच ह (As'vala) said, यत् since इदम् this सर्वम् all (accessories of this sacrifice) मृत्युना by death (ritual performed with attachment) आप्तम् (is) caught, सर्वम् all मृत्युना by death अभिपन्नम् over-powered, यजमानः the sacrificer केन through what मृत्योः

of death आप्तिम् reach अतिमुच्यते transcends इति; होत्रा ऋत्विजा through the priest called Hotṛ (the invoking priest) वाचा (and) through the organ of speech—अग्निना through (*i.e.*, looked upon as) fire; वाक् the organ of speech वै indeed यज्ञस्य of the sacrifice (*i.e.*, sacrificer) होता (is) the invoking priest; तत् now या which इयम् this वाक् (is) speech सः that (is) अयम् this अग्निः fire, सः that (fire) होता (is) the invoking priest, सः that (fire) मुक्तिः (is) liberation, सा that (liberation) अतिमुक्तिः (is) transcendence.

3. 'Yājñavalkya', said (he), 'since all this[1] is caught by death[2] and overpowered by it, through what does the sacrificer[3] transcend the reach of death?' 'Through the invoking priest (Hotṛ) and the organ of speech—looked upon as fire. The sacrificer's organ of speech is indeed the invoking priest. Now this organ of speech of the sacrificer is this fire.[4] Fire is the invoking priest.[5] That fire is (the means of) liberation,[6] and liberation is transcendence.'

[In chapter I, section III it has been briefly stated that rites combined with meditation help one to transcend death. And identity with the vital force in the mouth has been mentioned as the means. In this section certain particulars are given about that meditation.

[1] The accessories of this sacrifice, such as the priests and the fire.

[2] Ritual performed with our natural attachment.

[3] The word in the text is 'sacrifice', but it means the sacrificer, for *S'a. Brā.* XIV. II. ii. 24 says, 'The sacrifice is the sacrificer'.

[4] See I. III. 12.

[5] *S'a. Brā.* VI. IV. ii. 6 says, 'Fire is the invoking priest'.

[6] If the sacrificer meditates upon his organ of speech and the invoking priest as the deity fire, their cosmic counterpart, he is liberated from the above-mentioned death.]

याज्ञवल्क्येति होवाच, यदिदं सर्वमहोरात्राभ्यामाप्तम्, सर्वमहोरात्राभ्यामभिपन्नम्, केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इति; अध्वर्युणर्त्विजा चक्षुषादित्येन; चक्षुर्वै यज्ञस्याध्वर्युः, तद्यदिदं चक्षुः सोऽसावादित्यः, सोऽध्वर्युः, स मुक्तिः, सातिमुक्तिः ॥ ४ ॥

अहोरात्राभ्याम् By day and night, अहोरात्रयोः of day and night; अध्वर्युणा ऋत्विजा through the priest called Adhvaryu चक्षुषा (and) through the eye—आदित्येन through the sun; चक्षुः the eye अध्वर्युः (is) the Adhvaryu, इदम् this चक्षुः eye, असौ that आदित्यः sun. (Rest as before.)

4. 'Yājñavalkya', said (he), 'since all this is caught by day and night, and overpowered by them, through what does the sacrificer transcend the reach of day and night?'

'Through the priest called Adhvaryu[1] and the eye—looked upon as the sun. The eye of the sacrificer is indeed the Adhvaryu. Now this eye of the sacrificer is that sun.[2] The sun is the Adhvaryu. That sun[3] is (the means of) liberation, and liberation is transcendence.'[4]

[Time causes changes in the accessories on which rituals depend. It has two forms, one consisting of days, nights, etc., and the other of lunar days etc. Transcendence of the former is first indicated.

[1] Who keeps ready the accessories of a sacrifice and offers oblations reciting Mantras from the *Yajur-Veda*.

[2] See I. iii. 14.

[3] That is, meditation on his eye and the Adhvaryu as the Sun liberates the sacrificer.

[4] Because there is no day or night for one who is identified with the sun.]

याज्ञवल्क्येति होवाच, यदिदं सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तम्, सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नम्, केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इति; उद्गात्रर्त्विजा वायुना प्राणेन; प्राणो वै यज्ञस्योद्गाता; तद्योऽयं प्राणः स वायुः, स उद्गाता, स मुक्तिः, सातिमुक्तिः ॥५॥

पूर्वपक्ष-अपरपक्षाभ्याम् By the bright and dark halves of the month, पूर्वपक्ष-अपरपक्षयोः of the bright and dark halves of the month; उद्गात्रा ऋत्विजा through the priest called

Udgātṛ प्राणेन (and) through the vital force—वायुना through Vāyu: प्राण: the vital force, उद्गाता the Udgātṛ. (Rest as before.)

5. 'Yājñavalkya', said (Aśvala), 'since all this is caught by the bright and dark halves of the month, and overpowered by them, through what does the sacrificer transcend the reach of these?' 'Through the chanting priest (Udgātṛ)[1] and the vital force—looked upon as air. The vital force of the sacrificer is indeed the chanting priest.[2] Now this vital force of the sacrificer is Vāyu (cosmic vital force),[3] and Vāyu is the chanting priest. That Vāyu is (the means of) liberation, and liberation is transcendence.'[4]

[[1] The priest who chants Sāmans.

[2] As we know from I. iii. 24.

[3] See the note on I. v. 22.

[4] Here transcendence of time represented by lunar days etc. is indicated. Lunar days fluctuate according to the moon. Therefore identity with the moon takes one beyond the bright and dark halves of the month. Now in I. v. 13 we have seen that the moon is 'the luminous organ' of the vital force. So the vital force, Vāyu and the moon are identical. It is for this reason that the Mādhyandina recension reads 'the moon' instead of Vāyu. Moreover, the changes of the moon are caused

by Vāyu. So it goes without saying that the sacrificer who is identified with Vāyu by meditating on the chanting priest and his own vital force as that, will transcend the bright and dark halves of the month.]

याज्ञवल्क्येति होवाच, यदिदमन्तरिक्षमनारम्बणमिव, केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति; ब्रह्मणर्त्विजा मनसा चन्द्रेण; मनो वै यज्ञस्य ब्रह्मा; तद्यदिदं मनः सोऽसौ चन्द्रः, स ब्रह्मा, स मुक्तिः, सातिमुक्तिः —इत्यतिमोक्षाः; अथ सम्पदः ॥ ६ ॥

यत् Since इदम् this अन्तरिक्षम् sky अनारम्बणम् (is) without a support इव as it were, केन आक्रमेण through what prop यजमानः the sacrificer स्वर्गम् heaven लोकम् (as) result आक्रमते attains इति; ब्रह्मणा ऋत्विजा through the priest called Brahman मनसा (and) through the mind—चन्द्रेण through the moon; मनः the mind, ब्रह्मा Brahman (the superintending priest); असौ that चन्द्रः moon, इति the above अतिमोक्षाः (are) the ways of transcendence; अथ now सम्पदः meditations based on similarity. (Rest as before.)

6. 'Yājñavalkya', said (he), 'since the sky is, as it were,[1] without a support, through what prop does the sacrificer attain heaven as a result?' 'Through the superintending priest (Brahman) and the mind—looked upon as the Moon. The mind of the sacrificer is indeed

the superintending priest. Now this mind of the sacrificer is that moon.[2] The moon is the superintending priest. That moon is (the means of) liberation, and liberation is transcendence.' The above are the ways of transcendence. Now (come) meditations based on similarity.[3]

[[1] This suggests that there *is* a substratum, but it is not known.

[2] See I. III. 16.

[3] These are meditations, owing to some point of similarity, on a rite with humble results like the Agnihotra, as a rite with great results like the horse-sacrifice; or they are meditations on some item of the humble rite as those very results. Such meditations bring on those great results.]

याज्ञवल्क्येति होवाच, कतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति; तिसृभिरिति; कतमास्तास्तिस्र इति; पुरोनुवाक्या च याज्या च शस्यैव तृतीया; किं ताभिर्जयतीति; यत्किञ्चेदं प्राणभृदिति ॥ ७ ॥

याज्ञवल्क्य O Yājñavalkya इति उवाच ह said (As'vala), अयम् this होता invoking priest अद्य today अस्मिन् यज्ञे in this sacrifice कतिभिः ऋग्भिः with how many (classes of) Ṛces करिष्यति will do (his function) इति; तिसृभिः with three classes इति; कतमाः which (are) ताः those तिस्रः three

इति; पुरोनुवाक्या च the preparatory, याज्या the oblational च and शस्या the laudatory एव alone तृतीया (is) the third; ताभिः through them किम् what जयति does (he) win इति; इदं यत् किं च all this that प्राणभृत् has life इति.

7. 'Yājñavalkya', said (As'vala), 'with how many classes of Ṛc will the invoking priest do (his function) in this sacrifice today?' 'With three classes.' 'Which are those three?' 'The preparatory, the oblational[1] and, third, the laudatory hymns.' 'What does he win through them?' 'All this that has life.'[2]

[[1] Chanted at the time of offering the oblation.

[2] In the three worlds, because of the similarity in number. The living animals stand for those worlds themselves.]

याज्ञवल्क्येति होवाच, कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति; तिस्र इति; कतमास्तास्तिस्र इति; या हुता उज्ज्वलन्ति, या हुता अतिनेदन्ते, या हुता अधिशेरते; किं ताभिर्जयतीति; या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति, दीप्यत इव हि देवलोकः; या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयति, अतीव हि पितृलोकः; या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयति, अध इव हि मनुष्यलोकः ॥ ८ ॥

याज्ञवल्क्य O Yājñavalkya इति उवाच ह said (As'vala), अयम् this अध्वर्युः priest called Adhvaryu अद्य today अस्मिन् यज्ञे in this sacrifice कति how many आहुतीः (kinds of) oblations होष्यति will offer इति ; तिस्रः three इति ; कतमाः which (are) ताः those तिस्रः three इति ; याः (those) which हुताः when offered उज्ज्वलन्ति flare up, याः हुताः अतिनेदन्ते make a loud noise, याः हुताः अतिशेरते go down ; ताभिः through those किम् what जयति does (he) win इति ; याः हुताः उज्ज्वलन्ति ताभिः through those देवलोकम् the world of the gods एव verily जयति (he) wins, देवलोकः हि for the world of the gods दीप्यते shines इव as it were ; याः हुताः अतिनेदन्ते ताभिः पितृलोकम् the world of the manes एव verily जयति he wins, पितृलोकः the world of the manes हि for अति (is) too (noisy) इव as it were ; याः हुताः अतिशेरते ताभिः मनुष्यलोकम् the world of men एव verily जयति (he) wins, मनुष्यलोकः the world of men हि for अधः (is) lower इव (here) indeed.

8. 'Yājñavalkya', said (he), 'how many kinds of oblation will this priest called Adhvaryu offer in this sacrifice today?' 'Three.' 'Which are those three?' 'Those that flare up when offered, those that make a loud noise at the time of offering, and those that go down on being offered.' 'What does he win through them?' 'Through those that flare up when offered, he verily wins the world

of the gods, for that world looks like shining.[1] Through those that make a loud noise when offered, he verily wins the world of the manes, for that world seems to be too noisy.[2] And through those that go down (to the earth) he verily wins the world of men, for this world is indeed lower.'

[[1] At the time of offering, the Adhvaryu should meditate on the different articles of offering as the particular worlds to be won through them, according to their points of similarity mentioned here. Thus he should meditate on wood, melted butter, etc. as heaven, on meat etc. as the world of the manes, and on milk, Soma juice, etc. as this world. As a result of such meditation he will win those worlds.

[2] In the world of the manes there is the city of Yama (Death), where people are punished with great torture by him and howl in agony.]

याज्ञवल्क्येति होवाच, कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीति ; एकयेति ; कतमा सैकेति ; मन एवेति, अनन्तं वै मनः, अनन्ता विश्वे देवाः, अनन्तमेव स तेन लोकं जयति ॥ ९ ॥

याज्ञवल्क्य इति उवाच ह, अयम् This ब्रह्मा superintending priest कतिभिः देवताभिः through how many gods अद्य today यज्ञम् the sacrifice दक्षिणतः on the right गोपायति protects

इति; एकया through one इति; कतमा which (is) सा that एका one इति; मनः the mind एव alone इति, मनः the mind अनन्तम् (is) infinite वै verily, विश्वे देवाः the Vis'vadevas अनन्ताः (are) infinite, तेन by that (meditation) सः he अनन्तम् infinite लोकम् world एव verily जयति wins.

9. 'Yājñavalkya', said (As'vala), 'through how many gods[1] does this superintending priest protect the sacrifice (sitting) on the right today?' 'Through one.' 'Which is that god?' 'The mind[2] alone. The mind is verily infinite, and infinite are the Vis'vadevas. Through that meditation he verily wins an infinite world.'

[[1] The plural form is used in conformity with the previous questions, or for misleading the opponent.

[2] *Chā. U.* IV. XVI. 1-2 reads, 'The mind and speech are the two ways of a sacrifice. Of these, the superintending priest purifies one (speech) through the mind'.]

याज्ञवल्क्येति होवाच, कत्ययमद्योद्गातास्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति; तिस्र इति; कतमास्तास्तिस्र इति; पुरोनुवाक्या च याज्या च शस्यैव तृतीया; कतमास्ता या अध्यात्ममिति; प्राण एव पुरोनुवाक्या, अपानो याज्या, व्यानः शस्या; किं ताभिर्जयतीति; पृथिवीलोकमेव पुरोनुवाक्यया जयति, अन्तरिक्षलोकं याज्यया,

द्युलोकं शस्यया; ततो ह होताश्वल उपरराम ॥ १० ॥
इति प्रथमं ब्राह्मणम् ॥

अयम् This उद्गाता the chanting priest अद्य अस्मिन् यज्ञे कति of how many kinds स्तोत्रिया: collections of Ṛces that can be chanted स्तोष्यति will use as hymns इति; तिस्र: three kinds इति; कतमा: which (are) ता: those या: that अध्यात्मम् (are) with reference to the body इति; प्राण: the Prāṇa एव indeed पुरोनुवाक्या, अपान: the Apāna याज्या, व्यान: the Vyāna शस्या (rest as in paragraph 7); पुरोनुवाक्यया through the preparatory (collection of hymns) पृथिवीलोकम् the earth as result एव indeed जयति (he) wins, याज्यया through the oblational अन्तरिक्षलोकम् the sky as result, शस्यया through the laudatory द्युलोकम् heaven as result; तत: ह thereupon होता the invoking priest अश्वल: As'vala उपरराम kept quiet.

10. 'Yājñavalkya', said (As'vala), 'how many kinds of Ṛc collections will the chanting priest use as hymns in this sacrifice today?' 'Three.' 'Which are those three?' 'The preparatory, the oblational and, third, the laudatory collections.' 'Which are those that have reference to the body?' 'The Prāṇa is the preparatory,[1] the Apāna the oblational,[2] and the Vyāna the laudatory collection'.[3] 'What does he win through them?' 'Through the preparatory collection he wins as a result

the earth, through the oblational one the sky, and through the laudatory one heaven.' Thereupon the invoking priest As'vala kept quiet.

[[1] These two should be meditated upon as the earth (Pṛthivī), because all three begin with the letter P and come first in their group.

[2] One should look upon these two as the sky, because all three come second.

[3] The Vyāna and the laudatory collection of hymns should be meditated upon as heaven, because these hymns are recited with the help of the Vyāna (*Chā. U.* I. III. 4), and both the Vyāna and heaven come at the end of their group. For the different functions of these vital forces see notes 5-9 on I. v. 3.]

SECTION TWO

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ ; याज्ञवल्क्येति होवाच, कति ग्रहाः, कत्यतिग्रहा इति । अष्टौ ग्रहाः, अष्टावतिग्रहा इति ; ये तेऽष्टौ ग्रहाः, अष्टावतिग्रहाः, कतमे त इति ॥ १ ॥

अथ ह Then जारत्कारव: of the line of Jaratkāru आर्तभागः Ārtabhāga, son of Ṛtabhāga एनम् him पप्रच्छ asked; याज्ञवल्क्य O Yājñavalkya इति उवाच ह said (he), कति how

many ग्रहाः Grahas (organs) कति how many अतिग्रहाः Atigrahas (objects) (are there) इति. अष्टौ Eight ग्रहाः organs, अष्टौ eight अतिग्रहाः objects इति; ते those ये which (are) अष्टौ eight ग्रहाः organs अष्टौ eight अतिग्रहाः objects, कतमे which (are) ते they इति.

1. Then Ārtabhāga, of the line of Jaratkāru, asked him. 'Yājñavalkya', said (he), 'how many organs (Grahas[1]) are there, and how many objects (Atigrahas)?' 'There are eight organs and eight objects.' 'Which are those eight organs and eight objects?'

[Transcendence of death as time and rites has been explained in the previous section. Now the nature of death is being set forth. It consists of the organs and their objects, to which we are attached owing to our ignorance, and which are in every respect limited. They cover the whole range of relative existence consisting of ends and means, and it is by rising above them that one can attain liberation.

[1] 'Graha' literally means that which apprehends, hence an organ; and 'Atigraha', something greater than that, that is, an object—because it determines the apprehension.]

प्राणो वै ग्रहः, सोऽपानेनातिग्राहेण गृहीतः, अपानेन हि गन्धाञ्जिघ्रति ॥ २ ॥

प्राणः The nose वै verily ग्रहः (is) an organ, सः it अपानेन through the Apāna, odour अतिग्राहेण as its object गृहीतः

(is) dominated, अपानेन through the Apāna (the air breathed in) हि because गन्धान् odours जिघ्रति (one) smells.

2. 'The nose is verily an organ. It is dominated by its object, odour,[1] because one smells odours through the air that is breathed in.

[[1] Here called Apāna, because of its association with the incoming breath that brings odours in.]

वाग्वै ग्रहः, स नाम्नातिग्राहेण गृहीतः, वाचा हि नामान्यभिवदति ॥ ३ ॥

वाक् The organ of speech, नाम्ना by the name, वाचा through the organ of speech नामानि names अभिवदति pronounces. (Rest as before.)

3. 'The organ of speech is verily an organ. It is dominated by its object, name,[1] because one pronounces names through the organ of speech.

[[1] What is to be expressed.]

जिह्वा वै ग्रहः, स रसेनातिग्राहेण गृहीतः, जिह्वया हि रसान्विजानाति ॥ ४ ॥

जिह्वा The tongue, रसेन by taste, जिह्वया through the tongue रसान् tastes विजानाति (one) perceives. (Rest as before.)

4. 'The tongue is verily an organ. It is dominated by its object, taste, because one perceives tastes through the tongue.

चक्षुर्वै ग्रहः, स रूपेणातिग्राहेण गृहीतः, चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥

चक्षुः The eye, रूपेण by colour, चक्षुषा through the eye रूपाणि colours पश्यति (one) sees. (Rest as before.)

5. 'The eye is verily an organ. It is dominated by its object, colour, because one sees colours through the eye.

श्रोत्रं वै ग्रहः, स शब्देनातिग्राहेण गृहीतः, श्रोत्रेण हि शब्दाञ्शृणोति ॥ ६ ॥

श्रोत्रम् The ear, शब्देन by sound, श्रोत्रेण through the ear शब्दान् the sounds शृणोति (one) hears. (Rest as before.)

6. 'The ear is verily an organ. It is dominated by its object, sound, because one hears sounds through the ear.

मनो वै ग्रहः, स कामेनातिग्राहेण गृहीतः, मनसा हि कामान्कामयते ॥ ७ ॥

मनः The mind, कामेन by a covetable thing, मनसा through the mind कामान् covetable things कामयते (one) desires. (Rest as before.)

7. 'The mind is verily an organ. It is dominated by its object, a covetable thing, because one desires covetable things through the mind.

हस्तौ वै ग्रहः, स कर्मणातिग्राहेण गृहीतः, हस्ताभ्यां हि कर्म करोति ॥ ८ ॥

हस्तौ The hands, कर्मणा by work, हस्ताभ्याम् by the hands कर्म work करोति (one) does. (Rest as before.)

8. 'The hands are verily an organ. They are dominated by their object, work, because one does work through the hands.

त्वग्वै ग्रहः, स स्पर्शेनातिग्राहेण गृहीतः, त्वचा हि स्पर्शान्वेदयते—इत्येतेऽष्टौ ग्रहाः, अष्टावतिग्रहाः ॥ ९ ॥

त्वक् The skin, स्पर्शेन by touch, त्वचा by the skin स्पर्शान् touches वेदयते (one) perceives; इति एते these अष्टौ eight ग्रहाः (are) the organs, अष्टौ (and) eight अतिग्रहाः objects.

9. 'The skin is verily an organ. It is dominated by its object, touch, because one perceives touches through the skin. These are the eight organs and eight objects.'

याज्ञवल्क्येति होवाच, यदिदं सर्वं मृत्योरन्नम्, का स्वित्सा देवता यस्या मृत्युरन्नमिति; अग्निर्वै मृत्युः, सोऽपामन्नम्, अप पुनर्मृत्युं जयति ॥ १० ॥

याज्ञवल्क्य Yājñavalkya इति उवाच ह said (Ārtabhāga), यत् since इदम् this (universe) सर्वम् all मृत्यो: of death अन्नम् (is) the food, का स्वित् who (may be) सा that देवता deity यस्या: whose अन्नम् food मृत्यु: (is) death इति; अग्नि: fire वै verily मृत्यु: (is) death, स: it अपाम् of water अन्नम् (is) the food, पुन:-मृत्युम् further death अपजयति (he) overcomes.

10. 'Yājñavalkya', said (Ārtabhāga), since all this is the food of death, who may that deity be whose food is death?'[1] 'Fire verily is death; (but) it is the food of water.[2] (One who knows thus)[3] overcomes further death.'[4]

[[1] If there is none, then there will be no deliverance from the bondage of the organs and objects.

[2] Yājñavalkya answered the question indirectly by a hint. He said in effect, 'There *is* a destroyer of death (*Kaṭha. U.* I. II. 25). Look at fire. It destroys everything, but it is destroyed by water. Similarly the organs and objects are destroyed on the realisation of the identity of the self and Brahman'.

[3] Who knows the destroyer of death in the above way.

[4] See note 7 on I. II. 2.]

याज्ञवल्क्येति होवाच, यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो३ नेति; नेति होवाच याज्ञवल्क्यः, अत्रैव समवनीयन्ते, स उच्छ्वयति, आध्मायति, आध्मातो मृतः शेते ॥ ११ ॥

याज्ञवल्क्य इति उवाच ह, यत्र When अयम् this पुरुषः man (liberated through Self-knowledge) म्रियते dies अस्मात् from him प्राणाः the organs उत्क्रामन्ति depart आहो or न not इति; न no इति उवाच ह said याज्ञवल्क्यः Yājñavalkya, अत्र in him एव alone समवनीयन्ते (they) dissolve, सः it (the body) उच्छ्वयति swells, आध्मायति is bloated (by air), आध्मातः (being) bloated मृतः dead, motionless शेते lies.

11. 'Yājñavalkya', said (he), 'when this (liberated) man dies, do his organs[1] depart from him or not?' 'No', said Yājnavalkya, 'they dissolve in him alone.[2] (Only) the body swells, is bloated and lies motionless in that condition.'

[[1] As also their objects in the form of impressions that moved him to work.

[2] Their cause, like waves in the sea. See *Pras'na U.* VI. 5.]

याज्ञवल्क्येति होवाच, यत्रायं पुरुषो म्रियते किमेनं न जहातीति; नामेति, अनन्तं वै नाम, अनन्ता विश्वे देवाः; अनन्तमेव स तेन लोकं जयति ॥ १२ ॥

याज्ञवल्क्य इति उवाच ह, यत्र अयं पुरुषः म्रियते (as before) एनम् him किम् what न not जहाति leaves इति; नाम the name इति, नाम the name वै verily अनन्तम् (is) infinite, विश्वे देवाः the Vis'vadevas अनन्ताः (are) infinite; सः he तेन by that (knowledge) अनन्तम् an infinite लोकम् world एव indeed जयति wins.

12. 'Yājñavalkya', said (Ārtabhāga), 'when this man dies, what is that which does not leave him?' 'The name (only). The name verily is infinite,[1] (and) infinite are the Viśvadevas. He (who knows thus) wins indeed an infinite world through that.'

[[1] Continuing indefinitely in the mouth of people. To the man of realisation himself, even that name has no existence.]

याज्ञवल्क्येति होवाच, यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति, वातं प्राणः, चक्षुरादित्यम्, मनश्चन्द्रम्, दिशः श्रोत्रम्, पृथिवीं शरीरम्, आकाशमात्मा, ओषधीर्लोमानि, वनस्पतीन्केशाः, अप्सु लोहितं च रेतश्च निधीयते, क्वायं तदा पुरुषो भवतीति; आहर सोम्य हस्तमार्तभाग, आवामेवैतस्य वेदिष्यावः, न नावेतत् सजन इति। तौ होत्क्रम्य मन्त्रयाञ्चक्राते; तौ ह यदूचतुः कर्म हैव तदूचतुः, अथ यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः; पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेनेति। ततो ह जारत्कारव आर्तभाग उपरराम॥ १३ ॥ इति द्वितीयं ब्राह्मणम्॥

याज्ञवल्क्य इति उवाच ह, यत्र When अस्य मृतस्य पुरुषस्य of this (unenlightened) dead person वाक् the organ of

speech अग्निम् in fire अप्येति is absorbed, प्राणः the nose वातम् in air, चक्षुः the eye आदित्यम् in the sun, मनः the mind चन्द्रम् in the moon, दिशः in the directions श्रोत्रम् the ear, शरीरम् the body पृथिवीम् in the earth, आत्मा self, *i.e.*, its seat, the ether in the heart आकाशम् in the external ether, लोमानि the hair (on the body) ओषधीः in herbs, केशाः the hair (on the head) वनस्पतीन् in trees, लोहितं च the blood रेतः the seed च and अप्सु in water निधीयते are deposited, तदा then क्व where अयम् this पुरुषः person भवति stays इति; सोम्य gentle आर्तभाग Ārtabhāga हस्तम् (your) hand आहर give (me), आवाम् we two एव only एतस्य (all) about it वेदिष्यावः shall ascertain, नौ of ours एतत् this (subject) सजने in an assembly न not (to be discussed) इति; तौ ह the two उत्क्रम्य retiring मन्त्रयाञ्चक्राते discussed; तौ ह they यत् which ऊचतुः talked of तत् that कर्म work ह एव only ऊचतुः (they) talked of, अथ and यत् which प्रशशंसतुः (they) praised तत् that कर्म work ह एव only प्रशशंसतुः (they) praised; पुण्यः noble वै verily पुण्येन कर्मणा through righteous work भवति (one) becomes, पापः (and) ignoble पापेन through unrighteous (work) इति; ततः ह thereupon जारत्कारवः of the line of Jaratkāru आर्तभागः Ārtabhāga उपरराम kept quiet.

13. 'Yājñavalkya', said (Ārtabhāga), 'when the organ of speech[1] of a man is absorbed in fire, the nose in air, the eye in the sun, the mind in the moon, the ear in the directions, the body in earth, the ether of the heart in the

external ether, the hair on the body in herbs, the hair on the head in trees, and the blood and the seed are deposited[2] in water, on what does he then rest?'[3] 'Give me your hand, gentle Ārtabhāga, we two only shall ascertain it. This topic of ours is not to be decided in an assembly.' They retired and discussed it. What they talked of was only work, and what they eulogised was also work.[4] (Hence) one becomes noble through righteous work and ignoble through unrighteous work. Thereupon, Ārtabhāga, of the line of Jaratkāru, kept quiet.

[[1] That is, its presiding deity. So also in the other cases. For the organs are not absorbed before realisation. In the absence of the presiding deities, the organs become inert.

[2] This suggests that they are again utilised when the self takes a new body.

[3] Resorting to what, does he take to the body and organs, and what sets them in operation.

[4] It is past work that brings on a new body with the organs.]

SECTION THREE

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ; याज्ञवल्क्येति होवाच । मद्रेषु चरकाः पर्यव्रजाम, ते पतञ्चलस्य काप्यस्य

गृहानैम; तस्यासीद्दुहिता गन्धर्वगृहीता, तमपृच्छाम कोऽसीति; सोऽब्रवीत्सुधन्वाङ्गिरस इति; तं यदा लोकानामन्तानपृच्छाम, अथैनमब्रूम, क्व पारिक्षिता अभवन्निति; क्व पारिक्षिता अभवन्, स त्वा पृच्छामि याज्ञवल्क्य, क्व पारिक्षिता अभवन्निति ॥ १ ॥

अथ ह Then भुज्युः Bhujyu लाह्यायनिः the grandson of Lahya एनम् him पप्रच्छ questioned; याज्ञवल्क्य Yājñavalkya इति उवाच ह said (he), चरकाः observing a vow (for study) मद्रेषु in the territory called Madra पर्यव्रजाम (we) travelled, ते (we) who were such पतञ्चलस्य of Patañcala काप्यस्य of the line of Kapi गृहान् at the house ऐम: arrived; तस्य his दुहिता daughter गन्धर्व-गृहीता possessed by a Gandharva आसीत् was; तम् him अपृच्छाम (we) asked, कः who असि are (you) इति; सः he अब्रवीत् said, सुधन्वा (I am) Sudhanvan आङ्गिरसः of the line of Aṅgiras इति; तम् him यदा when लोकानाम् of worlds अन्तान् the boundaries अपृच्छाम (we) asked, अथ then एनम् to him अब्रूम (we) said क्व where पारिक्षिताः the descendants of Parikṣit अभवन् were (went) इति; याज्ञवल्क्य Yājñavalkya सः (I with) such (knowledge) त्वा you पृच्छामि ask, क्व where पारिक्षिताः the descendants of Parikṣit अभवन् were, क्व पारिक्षिताः अभवन् इति.

1. Then Bhujyu, the grandson of Lahya, questioned him. 'Yājñavalkya', said (he), 'we

travelled in Madra observing a vow, and we arrived at the house of Patañcala, of the line of Kapi. His daughter was possessed by a Gandharva.[1] We asked the Gandharva, "Who are you?" He said, "I am Sudhanvan, a descendant of Aṅgiras". When we asked him about the boundaries of worlds,[2] we said to him, "Where did the descendants of Parikṣit[3] go?" And I ask you, Yājñavalkya, where were the descendants of Parikṣit? (Say) where were the descendants of Parikṣit?'

[This section intends to show that the results of work, however good, are within the range of relative existence—that work, even if combined with meditation, cannot lead to liberation.

[1] A celestial being skilled in music.

[2] That is, the dimensions of the universe.

[3] Who had all performed the horse-sacrifice. Their names are given in *Śa. Brā.* XIII. v. iv. 1-3. By a derivative meaning the word can also be rendered as 'performers of the horse-sacrifice', in which case Bhujyu must have used this unusual word to puzzle his opponent, as he also tried to awe him by a reference to the superhuman source of his knowledge.]

स होवाच, उवाच वै सः, अगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति; क न्वश्वमेधयाजिनो गच्छन्तीति;

द्वात्रिंशतं वै देवरथाह्न्यान्ययं लोकः; तं समन्तं पृथिवी द्विस्तावत्पर्येति; तां समन्तं पृथिवीं द्विस्तावत्समुद्रः पर्येति; तद्यावती क्षुरस्य धारा, यावद्वा मक्षिकायाः पत्रम्, तावानन्तरेणाकाशः; तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्, तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेध-याजिनोऽभवन्निति; एवमिव वै स वायुमेव प्रशशंस; तस्माद्वायुरेव व्यष्टिः, वायुः समष्टिः; अप पुनर्मृत्युं जयति य एवं वेद; ततो ह भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥

इति तृतीयं ब्राह्मणम् ॥

सः He (Yājñavalkya) उवाच ह said, सः he (the Gandharva) उवाच said वै evidently, ते they तत् there वै verily अगच्छन् went यत्र where अश्वमेध-याजिनः the performers of the horse-sacrifice गच्छन्ति go इति; (Bhujyu:) क नु where अश्वमेध-याजिनः गच्छन्ति इति; (Yājña-valkya:) अयम् this लोकः world (is) वै verily द्वात्रिंशतम् thirty-two times देव-रथ-अह्न्यानि (the space traversed by) the sun's chariot in a day; तम् it समन्तम् around पृथिवी the earth द्विः twice तावत् as much पर्येति surrounds; ताम् that पृथिवीम् earth समन्तम् around समुद्रः the ocean द्विः twice तावत् as much पर्येति surrounds; तत् now यावती as (fine) क्षुरस्य of a razor धारा (is) the edge, यावत् as much वा or मक्षिकायाः of a fly पत्रम् (is) the wing, तावान् so much अन्तरेण between (the two halves of the cosmic shell)

आकाशः (is) the opening; इन्द्रः God, here, the sacrificial fire सुपर्णः a falcon भूत्वा being तान् them वायवे to Vāyu (Hiraṇyagarbha) प्रायच्छत् handed over, वायुः Vāyu तान् them आत्मनि in himself धित्वा placing तत्र there अगमयत् conveyed यत्र where अश्वमेध-याजिनः the performers of the horse-sacrifice अभवन् dwelt इति (end of the narrative); एवम् thus इव वै indeed सः he वायुम् Vāyu एव alone प्रशशंस eulogised; तस्मात् therefore वायुः Vāyu एव alone व्यष्टिः (is) the microcosm, वायुः (and) Vāyu समष्टिः (is) the macrocosm; यः who एवम् thus वेद knows पुनर्मृत्युम् further death अपजयति (he) overcomes. ततः ह Thereupon भुज्युः Bhujyu लाह्यायनिः the grandson of Lahya उपरराम kept quiet.

2. Yājñavalkya said, 'He must have told you that they went where the performers of the horse-sacrifice go'. 'Where do the performers of the horse-sacrifice go?' 'This world[1] is equal to thirty-two times the space traversed by the sun's chariot in a day. The earth surrounds it, covering double that area. The ocean[2] surrounds the earth, covering double that area. Now, as is the edge of a razor, or the wing of a fly, so (fine) is the opening[3] between (the two halves of the cosmic shell). Fire,[4] in the form of a falcon, handed them over to Vāyu.[5] Vāyu, placing them in

himself,[6] conveyed them where the (previous) performers of the horse-sacrifice dwelt.'[7] Thus did the Gandharva eulogise Vāyu alone. Therefore Vāyu alone is the microcosm, and he is also the macrocosm.[8] He who knows thus overcomes further death.[9] Thereupon Bhujyu, the grandson of Lahya, kept quiet.

[[1] Which is the body of Virāj, and where people experience the results of their past work. Hence it is called Loka. It is surrounded by a mountain, called Lokāloka, which divides this world from the Āloka.

[2] Mentioned in the Purāṇas as consisting of rain-water.

[3] Through which the performers of the horse-sacrifice went out and pervaded the universe.

[4] The word 'Indra' means the Supreme Being. But here from the context, it means the fire used in the horse-sacrifice.

[5] Hiraṇyagarbha, or Sūtrātman, the cosmic vital force.

[6] That is, making them a part of himself.

[7] That is, made them all-pervading like himself.

[8] As the microcosm he is in each individual, and as the macrocosm he pervades the whole universe. He is the limit of a person's achievement through rites and meditation. But identity with him is not liberation, which is attainable only through Self-knowledge.

[9] See note 4 on I. v. 2.]

SECTION FOUR

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ ; याज्ञवल्क्येति होवाच, यत्साक्षादपरोक्षाद्ब्रह्म, य आत्मा सर्वान्तरः, तं मे व्याचक्ष्व इति ; एष त आत्मा सर्वान्तरः ; कतमो याज्ञवल्क्य सर्वान्तरः ? यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः, योऽपानेनापानीति स त आत्मा सर्वान्तरः, यो व्यानेन व्यानीति स त आत्मा सर्वान्तरः, य उदानेनोदानिति स त आत्मा सर्वान्तरः, एष त आत्मा सर्वान्तरः ॥ १ ॥

अथ ह Then उषस्तः Uṣasta चाक्रायणः the son of Cakra एनम् him पप्रच्छ questioned; याज्ञवल्क्य Yājñavalkya इति उवाच ह, said (he) यत् which (is) साक्षात् immediate अपरोक्षात् direct ब्रह्म Brahman (lit. vastest), यः which (is) सर्वान्तरः within all आत्मा the self तम् that मे to me व्याचक्ष्व tell precisely about इति; एषः this (is) ते your आत्मा (individual) self सर्वान्तरः (that is) within all; याज्ञवल्क्य Yājñavalkya कतमः which सर्वान्तरः (is) within all? यः which प्राणेन through the Prāṇa प्राणिति moves forward सः that (is) ते your आत्मा self सर्वान्तरः (which is) within all, यः which अपानेन through the Apāna अपानीति moves downwards सः ते आत्मा सर्वान्तरः, यः which व्यानेन through the Vyāna व्यानीति pervades सः ते आत्मा सर्वान्तरः, यः which उदानेन

through the Udāna उदानिति goes out सः ते आत्मा सर्वान्तरः, एषः this (is) ते your आत्मा self सर्वान्तरः (that is) within all.

1. Then Uṣasta, the son of Cakra, questioned him. 'Yājñavalkya', said (he), 'tell me precisely about the Brahman that is immediate[1] and direct[2]—the self that is within all.'[3] 'This is your self that is within all.'[4] 'Which[5] is it that is within all, Yājñavalkya?' 'That which moves forward through the Prāṇa[6] is your self that is within all. That which moves downward through the Apāna is your self that is within all. That which pervades (the body) through the Vyāna is your self that is within all. That which passes out through the Udāna is your self that is within all. This is your self that is within all.'

[[1] Never obstructed from the seer or subject by anything.

[2] Always used in a primary sense and never figuratively.

[3] Thus it is suggested that the self and Brahman are identical.

[4] This is suggestive of the other epithets too.

[5] The body, the subtle body enclosed by it, and the self whose existence is at issue—which one of these do you mean?

* For the meanings of this and the next three terms see notes 5-7 on I. v. 3.]

स होवाचोषस्तश्चाक्रायणः, यथा विब्रूयात्, असौ गौः, असावश्व इति, एवमेवैतद्व्यपदिष्टं भवति; यदेव साक्षादपरोक्षाद्ब्रह्म, य आत्मा सर्वान्तरः, तं मे व्याचक्ष्वेति; एष त आत्मा सर्वान्तरः; कतमो याज्ञवल्क्य सर्वान्तरः? न दृष्टेर्द्रष्टारं पश्येः, न श्रुतेः श्रोतारं शृणुयात्, न मतेर्मन्तारं मन्वीथाः, न विज्ञातेर्विज्ञातारं विजानीयाः। एष त आत्मा सर्वान्तरः, अतोऽन्यदार्तम्; ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥ इति चतुर्थं ब्राह्मणम् ॥

सः That उषस्तः चाक्रायणः उवाच ह (as before), यथा as विब्रूयात् (one) may say, असौ such गौः (is) a cow, असौ such अश्वः (is) a horse इति, एवम् so एव just एतत् it व्यपदिष्टम् indicated (by you) भवति is; यत् which एव only (etc.—as before); दृष्टेः of sight द्रष्टारम् the seer न पश्येः (you) cannot see, श्रुतेः of hearing श्रोतारम् the hearer न शृणुयात् (you) cannot hear, मतेः of thought मन्तारम् the thinker न मन्वीथाः (you) cannot think, विज्ञातेः of knowledge विज्ञातारम् the knower न विजानीयाः (you) cannot know. एषः ते आत्मा सर्वान्तरः (As before), अतः than this अन्यत् any other thing आर्तम् (is) perishable. ततः Thereupon उषस्तः Uṣasta चाक्रायणः the son of Cakra उपरराम kept quiet.

2. Uṣasta, the son of Cakra, said, 'As one may say, "A cow is such, or a horse is such",[1] just so it has been indicated. Tell me precisely about that Brahman only which is immediate and direct—the self that is within all'. 'This is your self that is within all.'[2] 'Which is it that is within all, Yājñavalkya?' 'You cannot see the seer[3] of sight, you cannot hear the hearer of hearing, you cannot think the thinker of thought, you cannot know the knower of knowledge. This is your self that is within all. Everything besides this is perishable.'[4] Thereupon Uṣasta, the son of Cakra, kept quiet.

[[1] Describing a cow as something that walks, or a horse as something that runs, for example, is a very unsatisfactory way of giving an idea of those animals.

[2] He means: My answer is all right, for the self cannot be made known like a cow etc., inasmuch as the channels of perception such as seeing or hearing, through which objects are cognised, are integral with the self. So through what will you see or hear it?

[3] Sight is of two kinds—phenomenal and eternal. The former is a modification of the mind in contact with the eyes. It is influenced by the objects seen and has a beginning and an end. But the sight with which the self is endowed is its very nature, like the heat and light

of fire, and is eternal. When it appears to be joined to the phenomenal sight, which is but a limiting adjunct and a reflection of it, it is described as the seer, and is also differentiated into the seer and sight. Though it is metaphorically described as sometimes seeing and sometimes not seeing, it is ever the same. So also with hearing etc.

' So it is decided that the self exists, is within all and immutable, and it is absolute Knowledge.]

SECTION FIVE

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ; याज्ञवल्क्येति होवाच, यदेव साक्षादपरोक्षाद्ब्रह्म, य आत्मा सर्वान्तरः, तं मे व्याचक्ष्वेति; एष त आत्मा सर्वान्तरः। कतमो याज्ञवल्क्य सर्वान्तरः? योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति। एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति; या ह्येव पुत्रैषणा सा वित्तैषणा, या वित्तैषणा सा लोकैषणा, उभे ह्येते एषणे एव भवतः। तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः, अमौनं च मौनं च निर्विद्याथ ब्राह्मणः; स ब्राह्मणः केन स्यात्? येन

स्यात्तेनेदृश एव, अतोऽन्यदार्तम्; ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥ इति पञ्चमं ब्राह्मणम् ॥

काम एव यस्यायतनम्, हृदयं लोकः, मनोज्योतिः, यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्, स वै वेदिता स्याद्याज्ञवल्क्य। वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ; य एवायं काममयः पुरुषः स एषः, वदैव शाकल्य; तस्य का देवतेति; स्त्रिय इति होवाच॥११॥

कामः Lust, हृदयम् the intellect; काममयः made up of lust, स्त्रियः women. (Rest as before.)

11. 'He who knows that being whose body is verily desire, whose eye is the intellect, whose light is the mind, and who is the chief support of all bodies and organs, is indeed a knower, O Yājñavalkya.' 'I do know that being who, as you say, is the chief support of all bodies and organs. It is this being who is identified with sex desire.[1] Ask more, S'ākalya.' 'Who is his deity?' 'Women',[2] said Yājñavalkya.

[[1] Both collective and individual.

[2] As exciting the desire of men.]

रूपाण्येव यस्यायतनम्, चक्षुर्लोकः, मनोज्योतिः, यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्, स वै वेदिता स्याद्याज्ञवल्क्य। वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ; य एवासावादित्ये पुरुषः स एषः, वदैव शाकल्य; तस्य का देवतेति; सत्यमिति होवाच ॥ १२ ॥

रूपाणि Colours (in general), चक्षुः the eye; असौ that आदित्ये in the sun, सत्यम् truth (the eye). (Rest as before.)

12. 'He who knows that being whose body is verily colours (in general), whose instrument of vision is the eye, whose light is the mind, and who is the chief support of all bodies and organs, is indeed a knower, O Yājñavalkya.' 'I do know that being who, as you say, is the chief support of all bodies and organs. It is this being who is in the sun. Ask more, S'ākalya.' 'Who is his deity?' 'Truth (the eye)',[1] said Yājñavalkya.

[[1] 'The sun emanated from the eye (of Virāj)' (*Ṛg-Veda* X. xc. 13).]

आकाश एव यस्यायतनम्, श्रोत्रं लोकः, मनोज्योतिः, यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्, स वै वेदिता स्याद्याज्ञवल्क्य। वेद वा अहं तं पुरुषं सर्वस्यात्मनः

परायणं यमात्थ; य एवायं श्रोत्रः प्रातिश्रुत्कः पुरुषः स एषः, वदैव शाकल्य; तस्य का देवतेति; दिश इति होवाच ॥ १३ ॥

आकाश: The ether, श्रोत्रम् the ear; श्रोत्र: identified with the ear प्रातिश्रुत्कः identified with each occasion of hearing, दिश: the directions. (Rest as before.)

13. 'He who knows that being whose body is verily the ether, whose eye is the ear, whose light is the mind, and who is the chief support of all bodies and organs, is indeed a knower, O Yājñavalkya.' 'I do know that being who, as you say, is the chief support of all bodies and organs. It is this being who is identified with the ear and with each occasion of hearing. Ask more, S'ākalya.' 'Who is his deity?' 'The directions', said Yājñavalkya.

तम एव यस्यायतनम्, हृदयं लोकः, मनोज्योतिः, यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्, स वै वेदिता स्याद्याज्ञवल्क्य। वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ; य एवायं छायामयः पुरुषः स एषः, वदैव शाकल्य; तस्य का देवतेति; मृत्युरिति होवाच ॥ १४ ॥

तम: Darkness, हृदयम् the intellect; छायामय: identified with shadow, मृत्यु: death. (Rest as before.)

14. 'He who knows that being whose body is verily darkness, whose eye is the intellect, whose light is the mind, and who is the chief support of all bodies and organs, is indeed a knower, O Yājñavalkya.' 'I do know that being who, as you say, is the chief support of all bodies and organs. It is this being who is identified with shadow (ignorance). Ask more, S'ākalya.' 'Who is his deity?' 'Death (Hiraṇyagarbha)', said Yājñavalkya.

रूपाण्येव यस्यायतनम्, चक्षुर्लोकः, मनोज्योतिः, यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्, स वै वेदिता स्याद्याज्ञवल्क्य। वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ; य एवायमादर्शे पुरुषः स एषः, वदैव शाकल्य; तस्य का देवतेति; असुरिति होवाच ॥ १५ ॥

रूपाणि (Particular) colours, चक्षुः the eye; आदर्शे in a mirror, असुः the vital force. (Rest as before.)

15. 'He who knows that being whose body is verily (particular) colours,[1] whose instrument of vision is the eye, whose light is the mind, and who is the chief support of all bodies and organs, is indeed a knower, O Yājñavalkya.' 'I do know that being who, as you say, is the

chief support of all bodies and organs. It is this being who is in a mirror.[2] Ask more, S'ākalya.' 'Who is his deity?' 'The vital force',[3] said Yājñavalkya.

[[1] *Viz.*, those that reflect. In paragraph 12 colours in general were referred to.

[2] Any reflecting object is meant.

[3] Reflection depends on rubbing, which requires strength. Hence the vital force is said to be the cause of the being identified with reflection.]

आप एव यस्यायतनम्, हृदयं लोकः, मनोज्योतिः, यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्, स वै वेदिता स्याद्याज्ञवल्क्य। वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ; य एवायमप्सु पुरुषः स एषः, वदैव शाकल्य; तस्य का देवतेति; वरुण इति होवाच ॥ १६ ॥

आपः Water (in general), हृदयम् the intellect; अप्सु in (particular volumes of) water, वरुणः Varuṇa (the rain-god here, rain). (Rest as before.)

16. 'He who knows that being whose body is verily water (in general), whose eye is the intellect, whose light is the mind, and who is the chief support of all bodies and organs, is indeed a knower, O Yājñavalkya.' 'I do know that being who, as you say, is the chief support

of all bodies and organs. It is this being who is in (particular volumes of) water. Ask more, S'ākalya.' 'Who is his deity?' 'Varuṇa[1] (rain)', said Yājñavalkya.

[[1] The water of reservoirs etc. comes from rain. Rain is therefore the cause of such water.]

रेत एव यस्यायतनम्, हृदयं लोकः, मनोज्योतिः, यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणम्, स वै वेदिता स्याद्याज्ञवल्क्य। वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणं यमात्थ; य एवायं पुत्रमयः पुरुषः स एषः, वदैव शाकल्य; तस्य का देवतेति; प्रजापतिरिति होवाच ॥१७॥

रेत: The seed; पुत्रमय: identified with the son, प्रजापति: Prajāpati (the father). (Rest as before.)

17. 'He who knows that being who inhabits the seed, whose eye is the intellect, whose light is the mind, and who is the chief support of all bodies and organs, is indeed a knower, O Yājñavalkya.' 'I do know that being who, as you say, is the chief support of all bodies and organs. It is this being[1] who is identified with the son. Ask more, S'ākalya.' 'Who is his deity?' 'Prajāpati (the father)', said Yājñavalkya.

[[1] That is, the bones, marrow and seed that are derived from the father.]

शाकल्येति होवाच याज्ञवल्क्यः, त्वां स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥ १८ ॥

याज्ञवल्क्यः Yājñavalkya उवाच ह said, शाकल्य S'ākalya इति, त्वाम् you स्वित् forsooth इमे these ब्राह्मणाः Brāhmaṇas अङ्गार-अवक्षयणम् (their) tongs for burning charcoal अक्रता३ have made इति.

18. 'S'ākalya', said Yājñavalkya, 'have these Brāhmaṇas forsooth made you their tongs for burning charcoal?'[1]

[Five forms of the universe, divided according to the directions, are being presented to show how they are all unified in the mind.

[1] 'Have they made you their cat's paw, so to say?']

याज्ञवल्क्येति होवाच शाकल्यः, यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः, किं ब्रह्म विद्वानिति; दिशो वेद सदेवाः सप्रतिष्ठा इति; यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ १९ ॥

शाकल्यः S'ākalya उवाच ह said, याज्ञवल्क्य Yājñavalkya इति, यत् that कुरुपञ्चालानाम् of Kuru and Pañcāla ब्राह्मणान् Brāhmaṇas इदम् thus अत्यवादीः (you) have decried, किम् is it ब्रह्म Brahman विद्वान् after knowing इति; सदेवाः with (presiding) deities सप्रतिष्ठाः with supports दिशः the

directions वेद (I) know इति ; यत् if सदेवाः सप्रतिष्ठाः दिशः वेत्थ (you) know—

19. 'Yājñavalkya', said S'ākalya, 'is it after having known Brahman that you have thus decried these Brāhmaṇas of Kuru and Pañcāla?' 'I know[1] the directions with their deities and their supports.' 'If you know the directions with their deities and supports—

[[1] That is, the meditations regarding the directions. He meant that his mind, divided in five forms, was identified with the directions and through them with the universe. Through meditation one attains identity with the deity meditated upon.]

किंदेवतोऽस्यां प्राच्यां दिश्यसीति; आदित्यदेवत इति; स आदित्यः कस्मिन् प्रतिष्ठित इति; चक्षुषीति; कस्मिन्नु चक्षुः प्रतिष्ठितमिति; रूपेष्विति, चक्षुषा हि रूपाणि पश्यति; कस्मिन्नु रूपाणि प्रतिष्ठितानीति; हृदय इति होवाच, हृदयेन हि रूपाणि जानाति, हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीति; एवमेवैतद्याज्ञवल्क्य ॥ २० ॥

किं-देवतः Identified with which deity अस्याम् this प्राच्याम् eastern दिशि in direction असि (are you) इति ; आदित्य-देवतः with the deity sun इति; सः that आदित्यः sun कस्मिन् on what प्रतिष्ठितः rests इति ; चक्षुषि on the eye इति ; कस्मिन् नु

on what चक्षुः the eye प्रतिष्ठितम् rests इति; रूपेषु in colours इति, चक्षुषा with the eye हि for रूपाणि colours पश्यति (one) sees; कस्मिन् नु on what रूपाणि colours प्रतिष्ठितानि rest इति; हृदये on the heart (mind) इति उवाच ह said (Yājñavalkya), हृदयेन through the heart (mind) हि for रूपाणि colours जानाति (one) knows, हृदये हि in the heart एव verily रूपाणि colours प्रतिष्ठितानि established भवन्ति are इति; याज्ञवल्क्य Yājñavalkya एतत् it एवम् (is) so एव indeed.

20. 'What deity are you identified with in this eastern direction?' 'With the deity sun.' 'On what does that sun rest?' 'On the eye.'[1] 'On what does the eye rest?' 'On colours,[2] for one sees colours with the eye.' 'On what do colours rest?' 'On the heart (mind)', said Yājñavalkya, 'for one knows colours through the heart;[3] (hence) colours verily rest on the heart.'[4] 'It is indeed so, Yājñavalkya.'

[[1] *Ṛg-Veda* X. xc. 13 and *Ai. U.* I. 4 speak of the sun being produced from the eye of the Lord.

[2] The eye is produced by colours and cannot help perceiving them. The sun, the eye, the east and whatever is visible there all rest on colour, that is, represent it.

[3] And it is modified into them.

[4] Because one remembers through the mind colours that lie as impressions.]

किंदेवतोऽस्यां दक्षिणायां दिश्यसीति; यमदेवत इति; स यमः कस्मिन्प्रतिष्ठित इति; यज्ञ इति; कस्मिन्नु यज्ञः

प्रतिष्ठित इति; दक्षिणायामिति; कस्मिन्नु दक्षिणा प्रतिष्ठितेति; श्रद्धायामिति, यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति, श्रद्धायां ह्येव दक्षिणा प्रतिष्ठितेति; कस्मिन्नु श्रद्धा प्रतिष्ठितेति; हृदय इति होवाच, हृदयेन हि श्रद्धां जानाति, हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीति; एवमेवैतद्याज्ञवल्क्य ॥ २१ ॥

दक्षिणायाम् Southern; यम-देवत: identified with the deity Yama (the god of death); यज्ञे in the sacrifice; दक्षिणायाम् on remuneration (of priests); श्रद्धायाम् on faith; यदा एव whenever हि for श्रद्धत्ते (a man) has faith अथ then दक्षिणाम् remuneration ददाति (he) offers, हृदयेन through the heart हि for श्रद्धाम् faith जानाति (one) knows. (Rest as before.)

21. 'What deity are you identified with in this southern direction?' 'With the deity Yama.' 'On what does that Yama rest? 'On the sacrifice.'[1] 'On what does the sacrifice rest?' 'On remuneration[2] (of priests).' 'On what does remuneration rest?' 'On faith,[3] for whenever a man has faith, he offers remuneration to priests; (hence) remuneration verily rests on faith.' 'On what does faith rest?' 'On the heart',[4] said Yājñavalkya, 'for one knows faith through the heart; (hence) faith

verily rests on the mind.' 'It is indeed so, Yājñavalkya.'

[[1] The sacrificer redeems the sacrifice from the priests who perform them by giving them remuneration. Thereby he wins the south together with its presiding deity, Yama. Hence Yama, being the effect of the sacrifice, rests on it.

[2] Because it is redeemed by remuneration.

[3] In the Scriptures; this prompts liberality.

[4] Because faith is a quality of the heart.]

किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति; वरुणदेवत इति; स वरुणः कस्मिन्प्रतिष्ठित इति; अप्स्विति; कस्मिन्न्वापः प्रतिष्ठिता इति; रेतसीति; कस्मिन्नु रेतः प्रतिष्ठितमिति; हृदय इति, तस्मादपि प्रतिरूपं जातमाहुः, हृदयादिव सृप्तः, हृदयादिव निर्मित इति, हृदये ह्येव रेतः प्रतिष्ठितं भवतीति; एवमेवैतद्याज्ञवल्क्य ॥ २२ ॥

प्रतीच्याम् Western; वरुण-देवत: identified with the deity Varuṇa (the god of rain); अप्सु on water; आपः water, रेतसि on the seed; रेत: the seed; तस्मात् अपि therefore प्रतिरूपम् with strong resemblance (to his father) जातम् of (a newly) born (child) आहु: (people) say, हृदयात् from (his father's) heart इव as it were सृप्तः (he) has emanated, निर्मित: has been created इति. (Rest as before.)

22. 'What deity are you identified with in this western direction?' 'With the deity

Varuṇa.' 'On what does that Varuṇa rest?' 'On water.'[1] 'On what does water rest?' 'On the seed.'[2] 'On what does the seed rest?' 'On the heart.[3] Therefore people say of a new-born child with strong resemblance (to his father), that he has emanated from (his father's) heart, as it were—has been created from (his father's) heart, as it were; (hence) the seed verily rests on the heart.' 'It is indeed so, Yājñavalkya.'

[[1] 'Faith is water' (*Tai. Saṁ.* I. VI. viii. 1), and according to another S'ruti, 'He created Varuṇa from faith'. Hence Varuṇa rests on water.

[2] 'Water was produced from the seed' (*Ai. U.* I. I. 4).

[3] Because sex desire is a quality of the heart, and it starts the seed.]

किंदेवतोऽस्यामुदीच्यां दिश्यसीति; सोमदेवत इति; स सोमः कस्मिन्प्रतिष्ठित इति; दीक्षायामिति; कस्मिन्नु दीक्षा प्रतिष्ठितेति; सत्य इति, तस्मादपि दीक्षितमाहुः सत्यं वदेति, सत्ये ह्येव दीक्षा प्रतिष्ठितेति; कस्मिन्नु सत्यं प्रतिष्ठितमिति; हृदय इति होवाच, हृदयेन हि सत्यं जानाति, हृदये ह्येव सत्यं प्रतिष्ठितं भवतीति; एवमेवैतद्याज्ञवल्क्य ॥ २३ ॥

उदीच्याम् Northern; सोम-देवत: identified with the deity moon; दीक्षायाम् on initiation; दीक्षा initiation, सत्ये on truth; तस्मात् अपि therefore दीक्षितम् to one initiated आहु: (people) say, सत्यम् the truth वद speak इति; सत्ये on truth. (Rest as before.)

23. 'What deity are you identified with in this northern direction?' 'With the deity moon.' 'On what does that moon rest?' 'On initiation.'[1] 'On what does initiation rest?' 'On truth.[2] Therefore they say to the initiated one, "Speak the truth"; for initiation verily rests on truth.' 'On what does truth rest?' 'On the heart', said Yājñavalkya, 'for one knows truth through the heart; (hence) truth rests on the heart.' 'It is indeed so, Yājña-valkya.'

[[1] The initiated sacrificer buys the Soma creeper, performs sacrifices with it, meditates and becomes one with the north, which is presided over by the moon.

[2] Because breach of truth spoils the initiation.]

किंदेवतोऽस्यां ध्रुवायां दिश्यसीति; अग्निदेवत इति; सोऽग्निः कस्मिन्प्रतिष्ठित इति; वाचीति; कस्मिन्नु वाक् प्रतिष्ठितेति; हृदय इति; कस्मिन्नु हृदयं प्रतिष्ठित-मिति ॥ २४ ॥

ध्रुवायाम् Fixed; अग्नि-देवतः identified with the deity fire; वाचि in (the organ of) speech; वाक् (the organ of) speech. (Rest as before.)

24. 'What deity are you identified with in this fixed direction (overhead)?' 'With the deity fire.' 'On what does the fire rest?' 'On the organ of speech.' 'On what does speech rest?' 'On the heart.'[1] 'On what does the heart rest?'

[[1] In paragraph 20, colour together with the east, the sun, etc. has been stated to merge in Yājñavalkya's heart. In paragraphs 21-24, actions with or without meditation, together with the south, west and north, their deities, etc. have also been shown to merge there. Now name also is shown to do the same through speech. So Yājñavalkya's heart now embraces the whole universe, which only consists of name, colour (form) and action.]

अहल्लिकेति होवाच याज्ञवल्क्यः, यत्रैतदन्यत्रास्मन्मन्यासै, यद्ध्येतदन्यत्रास्मत्स्यात्, श्वानो वैनदद्युः, वयांसि वैनद्विमथ्नीरन्निति ॥ २५ ॥

याज्ञवल्क्यः Yājñavalkya उवाच ह said, अहल्लिक O ghost (lit. what disappears by day) इति, यत्र when मन्यासै (you) think एतत् it (the heart) अस्मत् from us (the body) अन्यत्र (is) elsewhere, यत् if हि indeed एतत् it अस्मत् from us अन्यत्र elsewhere स्यात् be, श्वानः dogs वा either एतत् this (body)

अद्युः would eat, वयांसि birds वा or एनत् it विमथ्नीरन् would tear to pieces इति.

25. 'You ghost', said Yājñavalkya, 'when you think the heart (mind) is elsewhere from us,[1] were it indeed elsewhere from us, then dogs would eat this body, or birds tear it to pieces.'[2]

[[1] From the body.

[2] If it were not in the body, the latter would die. So the heart must be understood to rest on the body. The body, again, as consisting of name, form and action, rests on the heart.]

कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति ; प्राण इति ; कस्मिन्नु प्राणः प्रतिष्ठित इति ; अपान इति ; कस्मिन्न्वपानः प्रतिष्ठित इति ; व्यान इति ; कस्मिन्नु व्यानः प्रतिष्ठित इति ; उदान इति ; कस्मिन्नूदानः प्रतिष्ठित इति ; समान इति ; स एष नेति नेत्यात्मा, अगृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यते, असङ्गो न हि सज्यते, असितो न व्यथते, न रिष्यति । एतान्यष्टावायतनानि, अष्टौ लोकाः, अष्टौ देवाः, अष्टौ पुरुषाः ; स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्, तं त्वौपनिषदं पुरुषं पृच्छामि ; तं चेन्मे न विवक्ष्यसि, मूर्धा ते विपतिष्यतीति । तं ह न मेने शाकल्यः ; तस्य ह मूर्धा

विपपात, अपि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्य-मानाः ॥ २६ ॥

कस्मिन् नु On what त्वं च you (the body) आत्मा the heart (mind) च and प्रतिष्ठितौ resting स्थः are इति; प्राणे on the Prāṇa इति; प्राणः the Prāṇa, अपाने on the Apāna; अपानः the Apāna, व्याने on the Vyāna; व्यानः the Vyāna, उदाने on the Udāna; उदानः the Udāna, समाने on the Samāna. (The rest is similar.) एषः This आत्मा self सः (is) That इति न (which has been described as) not this इति न not this, अगृह्यः (It is) imperceptible, न not हि for गृह्यते (It is) percieved, अशीर्यः unshrinking, न हि शीर्यते for (It) does not shrink, असङ्गः unattached, न हि सज्यते for (It) is not attached, असितः untrammelled, न व्यथते (It) does not suffer, न रिष्यति (It) does not perish; एतानि these (are) अष्टौ the eight आयतनानि bodies, अष्टौ लोकाः instruments of vision, अष्टौ देवाः deities अष्टौ पुरुषाः beings; सः He यः who तान् those पुरुषान् beings निरुह्य projecting (out of Himself) प्रत्युह्य (and) withdrawing (into Himself) अत्यक्रामत् transcends (them), औपनिषदम् to be known only from the Upaniṣads तम् that पुरुषम् Being त्वा you पृच्छामि (I) ask; तम् of Him मे to me न not विवक्ष्यसि (you) will clearly tell चेत् if, ते your मूर्धा head विपतिष्यति will fall off इति; शाकल्यः S'ākalya तं ह Him न not मेने knew; तस्य his मूर्धा head विपपात ह fell off; अपि also परिमोषिणः robbers अस्य his अस्थीनि bones (body) अन्यत् something else (treasure) मन्यमानाः supposing (them) अपजह्रुः took away.

26. 'On what do the body and the heart (mind) rest?' 'On the Prāna.' 'On what does the Prāṇa rest?' 'On the Apāna.' 'On what does the Apāna rest?' 'On the Vyāna.' 'On what does the Vyāna rest?' 'On the Udāna.' 'On what does the Udāna rest?' 'On the Samāna.'[1] This self is That which has been described[2] as 'Not this, not this'. It is imperceptible, for It is not perceived;[3] unshrinking, for It does not shrink; unattached, for It is not attached; untrammelled, It does not suffer, nor perish. 'These are the eight bodies, the eight instruments of vision, the eight deities and the eight beings.[4] I ask you of that Being who is to be known only from the Upaniṣads, and who projects these beings, withdraws them and (again) transcends them.[5] If you cannot clearly tell me of Him, your head shall fall off.' S'ākalya did not know Him. His head fell off; and robbers took away his bones, supposing them to be something else.

[[1] From the specific functions of these five forms of the vital force, given in notes 5-9 on I. v. 3, it will be clear how they are interrelated. The Prāṇa would exhaust itself through the mouth and nostrils, if it were

not held back by the Apāna. The Apāna too would go out through the lower orifice, as the Prāṇa would in front, if both were not checked by the Vyāna from its central position. Again, these three would go out in different directions, if they were not fixed to the Udāna. And all the four rest on the Samāna.

[2] In the first two chapters, the co-ordination of the functions of the body, mind and vital force points to the existence of an extra-corporeal being for whose sake all those exist. This is what we know as the individual self. But its real nature is transcendent. Stripped of the limiting adjuncts that are superimposed by nescience, the individual self is identical with the Supreme Self.

[3] Only material things, which are effects and have dimensions, come within the range of the organs, but not the Self. Similarly It is beyond all other characteristics of limited objects such as decay, relationship, bondage, pain and death.

[4] Mentioned in paragraphs 10-17.

[5] That is, who is both conditioned and unconditioned, Īs'vara as also the Supreme Brahman.]

अथ होवाच, ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु, सर्वे वा मा पृच्छत, यो वः कामयते तं वः पृच्छामि, सर्वान्वा वः पृच्छामीति ; ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥

अथ Then उवाच ह (Yājñavalkya) said, भगवन्तः venerable ब्राह्मणाः Brāhmaṇas वः amongst you यः who कामयते wishes

सः he मा me पृच्छतु let (him) ask, सर्वे all वा or मा me पृच्छत ask, वः amongst you यः who कामयते wishes वः amongst you तम् him पृच्छामि (I may) ask, वः of you सर्वान् all वा or पृच्छामि (I may) ask इति; ते ह those ब्राह्मणाः Brāhmaṇas न not दधृषुः dared.

27. Then Yājñavalkya said, 'Venerable Brāhmaṇas, any one amongst you who wishes may question me, or all of you may do so. Or I may question any one amongst you who (so) wishes, or I may ask all of you'. The Brāhmaṇas did not dare.

तान् हैतैः श्लोकैः पप्रच्छ—

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ॥
तस्य लोमानि पर्णानि त्वमस्योत्पाटिका बहिः ॥१॥

तान् ह Them एतैः with these श्लोकैः verses पप्रच्छ (he) asked—यथा as (is) वनस्पतिः वृक्षः a big tree तथा so एव indeed पुरुषः (is) man, अमृषा (this is) true; तस्य his लोमानि hairs पर्णानि (are its) leaves, अस्य his त्वक् skin (is) बहिः (its) outer उत्पाटिका bark.

28. (1) He questioned them with these verses: 'As is a big tree, so indeed is man. (This is) true. His hairs are its leaves, his skin its outer bark.

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः ।।
तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाहतात् ।। २ ।।

अस्य His त्वचः from skin एव only रुधिरम् blood प्रस्यन्दि flowing (भवति is), त्वचः from the bark उत्पटः sap; तस्मात् therefore आहतात् hit वृक्षात् from a tree रसः sap इव like आतृण्णात् from a wounded (person) तत् that (blood) प्रैति issues.

(2) 'It is from his skin that blood flows; sap (too exudes) from the bark. Therefore blood issues from a wounded person, like sap from a tree that is hit.

मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरम् ।।
अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ।। ३ ।।

अस्य His मांसानि flesh शकराणि (is its) inner bark, स्नाव (his) sinews किनाटम् (its) innermost layer of bark, तत् it (is) स्थिरम् firm; अस्थीनि (his) bones अन्तरतः (lying) within दारूणि (are its) wood, मज्जा the marrow (of one) मज्जा-उपमा similar to the pith (of the other) कृता (is) made.

(3) 'His flesh is its inner bark; his sinews are its innermost layer of bark: it is firm. His bones, which lie within (the sinews), are its wood, and his marrow is made similar to its pith.

यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः ॥
मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ ४ ॥

यत् If वृक्ष: a tree वृक्ण: (is) felled, पुन: again मूलात् from (its) root नवतर: newer रोहति (it) sprouts ; मर्त्यः स्वित् a mortal मृत्युना by death वृक्ण: cut down कस्मात् मूलात् from what root प्ररोहति does spring up ?

(4) 'If a tree is felled, it sprouts again from its root in a newer form. From what root does man spring up after he is cut down by death ?

रेतस इति मा वोचत जीवतस्तत्प्रजायते ॥
धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य संभवः ॥ ५ ॥

रेतस: From the seed इति this मा do not वोचत say, तत् (for) it जीवतः (only) in a living man प्रजायते is produced ; वृक्षः a tree वै indeed धानारुहः sprouts from the seed इव (an expletive) ; प्रेत्य after it is felled अञ्जसा certainly संभव: (there is) springing up (for it).

(5) ' Do not say, " From the seed ", (for) it is produced (only) in a living man. A tree indeed sprouts from the seed.[1] After it is dead, it certainly springs up again.

[[1] As well as from the stem.]

यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ॥
मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥६॥

यत् If वृक्षम् a tree समूलम् with (its) root आवृहेयुः (they) pull out, पुनः again न not आभवेत् (it) springs up. (Rest as in stanza 4.)

(6) 'If they pull a tree out with its roots, it does not spring again. From what root does man sprout after he is cut down by death?

जात एव न जायते को न्वेनं जनयेत्पुनः ॥
विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्
तिष्ठमानस्य तद्विद इति ॥ ७ ॥ २८ ॥
इति नवमं ब्राह्मणम् ॥ इति तृतीयोऽध्यायः ॥

जातः एव (If you think he is) born for ever, न (I say) no, जायते (he) is born; कः नु who एनम् him पुनः again जनयेत् should produce? विज्ञानम् Absolute Intelligence आनन्दम् Absolute Bliss ब्रह्म Brahman, रातिः (रातेः) of wealth दातुः of the bestower तत्-विदः (as also) of the knower of That तिष्ठमानस्य (of one) who lives (in It) परायणम् the ultimate resort इति.

(7) 'If you think he is born for ever, I say, no, he is born again.[1] Now who should again produce him?' It is[2] Brahman, which is Absolute Intelligence and Bliss, the ultimate

resort of the bestower of wealth,[3] as also of the knower of Brahman who lives in It.

[[1] Otherwise it is to be taken for granted that a man obtains the result of works never done by him, and misses that of works actually done.

[2] The Brāhmaṇas could not answer this question. So they were defeated, and Yājñavalkya took away the cows. The story is ended. Now the S'ruti directly points ont the root of the universe.

[3] That is, a man engaged in rites.]

CHAPTER FOUR

SECTION ONE

ॐ। जनको ह वैदेह आसाञ्चक्रे, अथ ह याज्ञवल्क्य आवव्राज। तं होवाच, याज्ञवल्क्य किमर्थमचारीः, पशूनिच्छन्, अण्वन्तानिति। उभयमेव सम्राडिति होवाच ॥१॥

ॐ Om. जनकः Janaka वैदेहः Emperor of Videha आसाञ्चक्रे took (his) seat ह it is said, अथ ह just then याज्ञवल्क्यः Yājñavalkya आवव्राज arrived. तम् To him उवाच ह (the Emperor) said, याज्ञवल्क्य Yājñavalkya किमर्थम् with what object अचारीः have (you) come, पशून् (some) cattle इच्छन् wishing, अण्वन्तान् (or some questions) for subtle decisions इति. उभयम् Both एव indeed सम्राट् O Emperor इति उवाच ह said (he).

1. Om. Janaka, Emperor of Videha, took his seat (to give audience), when Yājñavalkya arrived. The Emperor said to him, 'Yājñavalkya, with what object have you come? Desiring some cattle, or some questions for subtle decisions?' 'Both indeed, O Emperor', said (he).

[In this and the next section further instructions are being given about the Supreme Being by prescribing meditation on the deities of speech etc. as Brahman.]

यत्ते कश्चिदब्रवीत्तच्छृणवामेति; अब्रवीन्मे जित्वा शैलिनिः वाग्वै ब्रह्मेति; यथा मातृमान्पितृमानाचार्यवान् ब्रूयात्, तथा तच्छैलिनिरब्रवीद्वाग्वै ब्रह्मेति, अवदतो हि किं स्यादिति; अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम्? न मेऽब्रवीदिति; एकपाद्वा एतत्सम्राडिति; स वै नो ब्रूहि याज्ञवल्क्य। वागेवायतनम्, आकाशः प्रतिष्ठा, प्रज्ञेत्येनदुपासीत। का प्रज्ञता याज्ञवल्क्य? वागेव सम्राडिति होवाच। वाचा वै सम्राड्बन्धुः प्रज्ञायते, ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितम्, अयं च लोकः, परश्च लोकः, सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते; वाग्वै सम्राट् परमं ब्रह्म; नैनं वाग्जहाति, सर्वाण्येनं भूतान्यभिक्षरन्ति, देवो भूत्वा देवानप्येति, य एवं विद्वानेतदुपास्ते। हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः। स होवाच याज्ञवल्क्यः, पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥

कश्चित् Any one ते you यत् which अब्रवीत् may have told तत् that शृणवाम let (me) hear इति; जित्वा Jitvan शैलिनिः the

son of S'ilina मे me अब्रवीत् has told वाक् speech (the presiding deity of the organ of speech : fire) वै verily ब्रह्म (is) Brahman इति ; मातृमान् one having a mother पितृमान् one having a father आचार्यवान् one having a teacher यथा as ब्रूयात् should say, तथा so शैलिनि: the son of S'ilina तत् that अब्रवीत् has said 'वाक् वै ब्रह्म' इति, अवदत: to one who cannot speak हि for किम् what स्यात् may come इति ; तस्य तु but its (of that Brahman) आयतनम् abode (body) प्रतिष्ठाम् support ते you अब्रवीत् did (he) tell ? मे To me न अब्रवीत् (he) did not tell इति ; सम्राट् O Emperor एतत् it (this Brahman) एकपात् वै (is) one-footed इति ; याज्ञवल्क्य Yājña-valkya सः वै you who are such नः us ब्रूहि tell ; वाक् the organ of speech एव indeed आयतनम् (is its) abode (body), आकाश: the ether (the Unmanifested) प्रतिष्ठा (is its) support ; एतत् it प्रज्ञा इति as intelligence उपासीत (one) should meditate upon ; याज्ञवल्क्य Yājñavalkya का what प्रज्ञता (is) intelligence ? उवाच ह (he) said, सम्राट् O Emperor वाक् the organ of speech एव itself इति ; सम्राट् O Emperor वाचा through the organ of speech (fire) वै verily बन्धु: a friend प्रज्ञायते is known, ऋग्वेद: . . . व्याख्यानानि (as in II. iv. 10) इष्टम् sacrifices हुतम् pouring libations (in the fire) आशितम् offering food पायितम् offering drink अयं च this लोक: life पर: च the next लोक: life सर्वाणि all च and भूतानि beings सम्राट् O Emperor वाचा by speech एव alone प्रज्ञायन्ते are known ; सम्राट् वाक् speech (fire) वै verily परमम् (is) the Supreme ब्रह्म Brahman ; य: who एवम् thus विद्वान् knowing एतत् it उपास्ते meditates upon, वाक् speech (its deity, fire)

एनम् him न not जहाति leaves, सर्वाणि all भूतानि beings एनम् him अभिक्षरन्ति seek, देवः a god भूत्वा becoming देवान् the gods अप्येति (he) is merged in. जनकः Janaka वैदेहः Emperor of Videha उवाच ह said, हस्ति-ऋषभम् with an elephant-like bull सहस्रम् a thousand (cows) ददामि (I) give, offer (you) इति. सः That याज्ञवल्क्यः Yājñavalkya उवाच ह said, मे my पिता father अमन्यत believed अननुशिष्य without fully instructing न not हरेत (one) should accept (gifts from a pupil) इति.

2. 'Let me hear what any one may have told you.' 'Jitvan, the son of S'ilina, has told me that the organ[1] of speech (fire) is verily Brahman.' 'As one who has had a mother, a father and a teacher[2] should say, so has the son of S'ilina said this—that the organ of speech is verily Brahman, for what can a speechless person attain? But did he tell you about its body and support?' 'He did not tell me.' 'This Brahman has only one foot,[3] O Emperor.' 'So you tell us, Yājñavalkya.' 'The organ of speech is indeed its body, and the Undifferentiated[4] its support. It should be meditated upon as intelligence.' 'What constitutes intelligence, Yājñavalkya?' 'The organ of speech itself, O Emperor', said Yājñavalkya; 'verily through the organ of

speech, O Emperor, a friend is known; the *Ṛg-Veda*, *Yajur-Veda*, *Sāma-Veda*, *Atharva-Veda*, history, mythology, arts, Upaniṣads, Mantra verses, aphorisms, elucidations, explanations,[5] (the results of) sacrifices, (of) fire-offerings and (of) gifts of food and drink, this life, the next life and all beings are known through the organ of speech alone, O Emperor. The organ of speech, O Emperor, is verily the Supreme Brahman. The organ of speech does not leave him who, knowing thus, meditates upon it; all beings seek him (with presents); and becoming a god (here), he is merged in the gods (after death).' Janaka, Emperor of Videha, said, 'I offer you a thousand cows with an elephant-like bull'. Yājñavalkya replied, 'My father believed that one should not accept (gifts from a pupil) without fully instructing (him)'.

[[1] That is, the presiding deity of the organ. So throughout this and the next six paragraphs, except when it is the body of the deity.

[2] To school him in childhood, early boyhood and thereafter, respectively.

[3] Out of the four; hence it is of no use.

[4] The rudimentary substance out of which the universe has been produced; the cause of Hiraṇyagarbha.

[5] These terms also occur in II. iv. 10. For their meanings see the notes thereon.]

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति; अब्रवीन्म उदङ्कः शौल्बायनः, प्राणो वै ब्रह्मेति; यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्, तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेति, अप्राणतो हि किं स्यादिति; अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम्? न मेऽब्रवीदिति; एकपाद्वा एतत्सम्राडिति; स वै नो ब्रूहि याज्ञवल्क्य; प्राण एवायतनम्, आकाशः प्रतिष्ठा, प्रियमित्येनदुपासीत; का प्रियता याज्ञवल्क्य? प्राण एव सम्राडिति होवाच, प्राणस्य वै सम्राट् कामायायाज्यं याजयति, अप्रतिगृह्यस्य प्रतिगृह्णात्यपि, तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट् कामाय; प्राणो वै सम्राट् परमं ब्रह्म; नैनं प्राणो जहाति, सर्वाण्येनं भूतान्यभिक्षरन्ति, देवो भूत्वा देवानप्येति, य एवं विद्वानेतदुपास्ते; हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः; स होवाच याज्ञवल्क्य, पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥

यत् एव Whatever; उदङ्कः Udaṅka शौल्बायनः the son of S'ulba; प्राणः the vital force (its presiding deity, Vāyu); अप्राणतः to one who does not live; प्रियम् dear; प्रियता

dearness; सम्राट् O Emperor प्राणस्य of the vital force वै verily कामाय for the sake अयाज्यम् one for whom sacrifices should not be performed याजयति performs sacrifices for, अप्रतिगृह्यस्य from one from whom presents should not be accepted अपि even प्रतिगृह्णाति accepts presents, सम्राट् O Emperor याम् whichever दिशम् direction एति (one) goes तत्र there प्राणस्य of the vital force एव alone कामाय for the sake वधाशङ्कम् risk of death भवति there is. (Rest as before.)

3. 'Let me hear whatever any one may have told you.' 'Udaṅka, the son of S'ulba, has told me that the vital force (Vāyu) is verily Brahman.' 'As one who has had a mother, a father and a teacher should say, so has the son of S'ulba said this—that the vital force is verily Brahman, for what can a lifeless person attain? But did he tell you about its body and support?' 'He did not tell me.' 'This Brahman has only one foot, O Emperor.' 'So you tell us, Yājñavalkya.' 'The vital force is its body, and the Undifferentiated its support. It should be meditated upon as dear.' 'What constitutes dearness, Yājñavalkya?' 'The vital force itself, O Emperor', said Yājñavalkya; 'verily for the sake of the vital force, O Emperor, one performs sacrifices for an unqualified person and even accepts

presents from an unworthy man; and for the sake of the vital force alone, O Emperor, one exposes oneself to the risk of death in any direction one may go to. The vital force, O Emperor, is verily the Supreme Brahman. The vital force does not leave him who, knowing thus, meditates upon it, all beings seek him (with presents) and becoming a god (here), he is merged in the gods (after death).' Janaka, Emperor of Videha, said, 'I offer you a thousand cows with an elephant-like bull'. Yājñavalkya replied, 'My father believed that one should not accept (gifts from a pupil) without fully instructing (him)'.

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति; अब्रवीन्मे बर्कु-र्वार्ष्णः, चक्षुर्वै ब्रह्मेति; यथा मातृमान्पितृमानाचार्यवान् ब्रूयात्, तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेति, अपश्यतो हि किं स्यादिति; अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम्? न मेऽब्रवीदिति; एकपाद्वा एतत्सम्राडिति; स वै नो ब्रूहि याज्ञवल्क्य; चक्षुरेवायतनम्, आकाशः प्रतिष्ठा, सत्यमित्ये-नदुपासीत; का सत्यता याज्ञवल्क्य? चक्षुरेव सम्राडिति होवाच, चक्षुषा वै सम्राट् पश्यन्तमाहुरद्राक्षीरिति, स

आहाद्राक्षमिति, तत्सत्यं भवति; चक्षुर्वै सम्राट् परमं ब्रह्म; नैनं चक्षुर्जहाति, सर्वाण्येनं भूतान्यभिक्षरन्ति, देवो भूत्वा देवानप्येति, य एवं विद्वानेतदुपास्ते; हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः; स होवाच याज्ञवल्क्यः, पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥

बर्कुः Barku वार्ष्णः the son of Vṛṣṇa; चक्षुः the eye (its deity, sun); अपश्यतः to one who does not see; सत्यम् truth; सत्यता the essence of truth; चक्षुषा by the eye वै indeed पश्यन्तम् to one who has seen आहुः (they) say अद्राक्षीः have (you) seen इति; सः (and) he आह says, replies अद्राक्षम् (I) have seen इति; (then) तत् it सत्यम् true भवति is. (Rest as before.)

4. 'Let me hear whatever any one may have told you.' 'Barku, the son of Vṛṣṇa, has told me that the eye (sun) verily is Brahman.' 'As one who has had a mother, a father and a teacher should say, so has the son of Vṛṣṇa said this—that the eye is verily Brahman, for what can a sightless person attain? But did he tell you about its body and support?' 'He did not tell me.' 'This Brahman has only one foot, O Emperor.' 'So you tell us, Yājñavalkya.' 'The eye is its body, and the Undifferentiated its support. It should

be meditated upon as truth.' 'What constitutes the essence of truth, Yājñavalkya?' 'The eye itself, O Emperor', said Yājñavalkya; 'verily if they say to a person who has seen with his own eyes, "Did you see?" and he replies, "I did", then it is true.[1] The eye, O Emperor, is verily the Supreme Brahman. The eye does not leave him who, knowing thus, meditates upon it; all beings seek him (with presents); and becoming a god (here), he is merged in the gods (after death).' Janaka, Emperor of Videha, said, 'I offer you a thousand cows with an elephant-like bull' Yājñavalkya replied, 'My father believed that one should not accept (gifts from a pupil) without fully instructing (him)'.

[[1] Whereas what has only been heard of may not always be so.]

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति; अब्रवीन्मे गर्दभीविपीतो भारद्वाजः, श्रोत्रं वै ब्रह्मेति; यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्, तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेति, अशृण्वतो हि किं स्यादिति; अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम्? न मेऽब्रवीदिति; एकपाद्वा एतत्स-

म्राडिति; स वै नो ब्रूहि याज्ञवल्क्य; श्रोत्रमेवायतनम्; आकाशः प्रतिष्ठा, अनन्त इत्येनदुपासीत; कानन्तता याज्ञवल्क्य? दिश एव सम्राडिति होवाच, तस्माद्वै सम्राडपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छति, अनन्ता हि दिशः; दिशो वै सम्राट् श्रोत्रम्, श्रोत्रं वै सम्राट् परमं ब्रह्म; नैनं श्रोत्रं जहाति, सर्वाण्येनं भूतान्यभिक्षरन्ति, देवो भूत्वा देवानप्येति, य एवं विद्वानेतदुपास्ते; हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः; स होवाच याज्ञवल्क्यः, पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥

गर्दभीविपीतः Gardabhīvipīta भारद्वाजः a descendant of Bharadvāja, श्रोत्रम् the ear (the directions); अशृण्वतः to one without hearing; अनन्तः infinite; अनन्तता infinity; दिशः the directions; तस्मात् therefore वै verily यां कां अपि च whatever दिशम् direction गच्छति (one) goes to अस्याः its अन्तम् end न not एव indeed गच्छति (one) reaches, दिशः the directions हि hence अनन्ताः (are) infinite; दिशः the directions वै verily श्रोत्रम् (are) the ear. (Rest as before.)

5. 'Let me hear whatever any one may have told you.' 'Gardabhīvipīta, a descendant of Bharadvāja, has told me that the ear (the directions) is verily Brahman.' 'As one who

has had a mother, a father and a teacher should say, so has the descendant of Bharadvāja said this—that the ear is verily Brahman, for what can a person who is devoid of hearing attain? But did he tell you about its body and support?' 'He did not tell me.' 'This Brahman has only one foot, O Emperor.' 'So you tell us, Yājñavalkya.' 'The ear is its body, and the Undifferentiated its support. It should be meditated upon as infinite.' 'What constitutes infinity, Yājñavalkya?' 'The directions alone, O Emperor', said Yājñavalkya; 'therefore, O Emperor, to whatever direction one may go, one never reaches its end. Hence the directions are infinite. The directions, O Emperor, are verily the ear. The ear, O Emperor, is verily the Supreme Brahman. The ear does not leave him who, knowing thus, meditates upon it; all beings seek him (with presents); and becoming a god (here), he is merged in the gods (after death).' Janaka, Emperor of Videha, said, 'I offer you a thousand cows with an elephant-like bull'. Yājñavalkya replied, 'My father believed that one should not accept (gifts from a pupil) without fully instructing (him)'.

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति; अब्रवीन्मे सत्यकामो जाबालः, मनो वै ब्रह्मेति; यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्, तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेति, अमनसो हि किं स्यादिति; अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम्? न मेऽब्रवीदिति; एकपाद्वा एतत्सम्राडिति; स वै नो ब्रूहि याज्ञवल्क्य; मन एवायतनम्, आकाशः प्रतिष्ठा, आनन्द इत्येनदुपासीत; कानन्दता याज्ञवल्क्य? मन एव सम्राडिति होवाच, मनसा वै सम्राट् स्त्रियमभिहार्यते, तस्यां प्रतिरूपः पुत्रो जायते, स आनन्दः; मनो वै सम्राट् परमं ब्रह्म; नैनं मनो जहाति, सर्वाण्येनं भूतान्यभिक्षरन्ति, देवो भूत्वा देवानप्येति, य एवं विद्वानेतदुपास्ते; हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः; स होवाच याज्ञवल्क्यः, पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ६ ॥

सत्यकाम: Satyakāma जाबाल: the son of Jabālā, मन: the mind; अमनस: of one having no mind; आनन्द: bliss; आनन्दता the essence of bliss; मनसा with the mind वै verily स्त्रियम् a woman अभिहार्यते (one) woos, तस्याम् of her प्रतिरूप: resembling (him) पुत्र: a son जायते is born, स: (and) he आनन्द: (is the source of) bliss. (Rest as before.)

6. 'Let me hear whatever any one may have told you.' 'Satyakāma, the son of Jabālā, has told me that the mind (moon) is verily Brahman.' 'As one who has had a mother, a father and a teacher should say, so has the son of Jabālā said this—that the mind is verily Brahman, for what can a person attain who has no mind? But did he tell you about its body and support?' 'He did not tell me.' 'This Brahman has only one foot, O Emperor.' 'So you tell us, Yājñavalkya.' 'The mind is indeed its body, and the Undifferentiated its support. It should be meditated upon as bliss.' 'What constitutes the essence of bliss, Yājñavalkya?' 'The mind itself, O Emperor', said Yājñavalkya; 'verily through the mind, O Emperor, a man (desires and) woos a woman; a son resembling him is born of her, and he is the source of bliss. The mind, O Emperor, is verily the Supreme Brahman. The mind does not leave him who, knowing thus, meditates upon it; all beings seek him (with presents); and becoming a god (here), he is merged in the gods (after death).' Janaka, Emperor of Videha, said, 'I offer you a thousand cows with an elephant-like

bull'. Yājñavalkya replied, 'My father believed that one should not accept (gifts from a pupil) without fully instructing (him)'.

यदेव ते कश्चिदब्रवीत्तच्छृणवामेति ; अब्रवीन्मे विदग्धः शाकल्यः, हृदयं वै ब्रह्मेति ; यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्, तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेति, अहृदयस्य हि किं स्यादिति ; अब्रवीत्तु ते तस्यायतनं प्रतिष्ठाम्? न मेऽब्रवीदिति ; एकपाद्वा एतत्सम्राडिति, स वै नो ब्रूहि याज्ञवल्क्य ; हृदयमेवायतनम्, आकाशः प्रतिष्ठा, स्थितिरित्येनदुपासीत ; का स्थितता याज्ञवल्क्य? हृदयमेव सम्राडिति होवाच, हृदयं वै सम्राट् सर्वेषां भूतानामायतनम्, हृदयं वै सम्राट् सर्वेषां भूतानां प्रतिष्ठा, हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति ; हृदयं वै सम्राट् परमं ब्रह्म ; नैनं हृदयं जहाति, सर्वाण्येनं भूतान्यभिक्षरन्ति, देवो भूत्वा देवानप्येति, य एवं विद्वानेतदुपास्ते ; हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः ; स होवाच याज्ञवल्क्यः, पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ७ ॥ इति प्रथमं ब्राह्मणम् ॥

विदग्ध: Vidagdha शाकल्य: the son of S'akala, हृदयम् the heart (Hiraṇyagarbha) ; अहृदयस्य of one who has no heart ;

स्थितिः stability ; स्थितता stability ; हृदयम् the heart वै verily सर्वेषाम् भूतानाम् of all beings आयतनम् abode, प्रतिष्ठा support, हृदये in the heart हि for एव verily सर्वाणि all भूतानि beings प्रतिष्ठितानि established भवन्ति are. (Rest as before.)

7. 'Let me hear whatever any one may have told you.' 'Vidagdha, the son of S'akala, has told me that the heart (Hiraṇyagarbha) is verily Brahman.' 'As one who has had a mother, a father and a teacher should say, so has the son of S'akala said this—that the heart is verily Brahman, for what can a person attain who has no heart? But did he tell you about its body and support?' 'He did not tell me.' 'This Brahman has only one foot, O Emperor.' 'So you tell us, Yājñavalkya.' 'The heart is indeed its body, and the Undifferentiated its support. It should be meditated upon as stability.' 'What constitutes stability, Yājñavalkya?' 'The heart itself, O Emperor', said Yājñavalkya; 'the heart, O Emperor, is verily the abode of all beings, the heart, O Emperor, is verily the support of all beings, for it is in the heart, O Emperor, that all beings are established.[1] The heart, O Emperor, is verily the Supreme Brahman.

The heart does not leave him who, knowing thus, meditates upon it; all beings seek him (with presents); and becoming a god (here), he is merged in the gods (after death).' Janaka, Emperor of Videha, said, 'I offer you a thousand cows with an elephant-like bull'. Yājñavalkya replied, 'My father believed that one should not accept (gifts from a pupil) without fully instructing (him)'.

[[1] See the note on III. IX. 24.]

SECTION TWO

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच, नमस्तेऽस्तु याज्ञवल्क्य, अनु मा शाधीति; स होवाच, यथा वै सम्राण्महान्तमध्वानमेष्यन् रथं वा नावं वा समाददीत, एवमेवैताभिरुपनिषद्भिः समाहितात्मासि; एवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क गमिष्यसीति; नाहं तद्भगवन्वेद यत्र गमिष्यामीति; अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति; ब्रवीतु भगवानिति ॥ १ ॥

जनकः Janaka वैदेहः ह Emperor of Videha कूर्चात् from (his) lounge उपावसर्पन् humbly approaching उवाच said,

याज्ञवल्क्य Yājñavalkya ते to you नमः salutation अस्तु be, मा me अनुशाधि teach इति; सः he उवाच ह said, सम्राट् O Emperor महान्तम् a long अध्वानम् way एष्यन् wishing to go यथा वै as रथं वा a chariot नावम् a boat वा or समाददीत (one) would take, एवम् एव even so एताभिः उपनिषद्भिः with these secret names (of Brahman) समाहित-आत्मा controlled in mind असि (you) are; एवम् likewise वृन्दारकः honoured आढ्यः wealthy अधीत-वेदः erudite in the Vedas उक्त-उपनिषत्कः (one) instructed in the Upaniṣads सन् being इतः from this (body) विमुच्यमानः being dissociated क्व where गमिष्यसि will (you) go इति; भगवन् venerable sir यत्र where गमिष्यामि (I) shall go तत् that अहम् I न not वेद know इति; अथ वै then यत्र where गमिष्यसि (you) will go तत् that अहम् I ते you वक्ष्यामि shall tell इति; भगवान् (may) your reverence ब्रवीतु tell (me) इति.

1. Janaka, Emperor of Videha, (rose) from his lounge (and) humbly approaching (Yājña-valkya) said, 'Salutation to you, Yājñavalkya, kindly teach me'. Yājñavalkya said, 'As one wishing to go a long way, O Emperor, should take a chariot or a boat, even so you have controlled your mind through these secret names (of Brahman). You are likewise honoured and wealthy, and you have studied the Vedas and been instructed in the Upaniṣads. But where will you go when you are disso-ciated from this body?' 'I do not know,

venerable sir, where I shall go.' 'Then I shall tell you where you will go.' 'Be pleased to tell me, venerable sir.'

इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषः; तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव; परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥

अयम् This यः who पुरुषः the being दक्षिणे (is) in the right अक्षन् eye एषः he ह वै verily इन्धः Indha (radiant) नाम (is) called; इन्धम् Indha सन्तम् although being तम् that एतम् this (being) वै verily परोक्षेण एव indirectly इन्द्रः Indra इति as आचक्षते (they) speak of; देवाः the gods हि for परोक्षप्रियाः (are) fond of indirect names इव as it were प्रत्यक्षद्विषः (and) averse to direct names.

2. 'This being[1] who is in the right eye is verily called Indha. Though he is Indha, they indirectly call him Indra, for the gods are, as it were, fond of indirect names and averse to direct names.

[[1] The waking self (Vis'va) is being described here He has been referred to in IV. I. 4.]

अथैतद्वामेऽक्षणि पुरुषरूपमेषास्य पत्नी विराट्; तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाशः; अथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डः; अथैनयोरेतत्प्रावरणं यदेत-

दन्तर्हृदये जालकमिव; अथैनयोरेषा सृतिः संचरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति; यथा केशः सहस्रधा भिन्न एवम्; अस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्ति, एताभिर्वा एतदास्रवदास्रवति; तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः ॥ ३ ॥

अथ Now वामे अक्षणि in the left eye एतत् this पुरुषरूपम् human form अस्य of his एषा this पत्नी (is) wife विराट् Virāj (matter); यः which एषः this आकाशः space अन्तः-हृदये (is) within the heart एषः this तयोः (is) their संस्तावः place of union; अथ यः एषः अन्तः-हृदये लोहितपिण्डः mass of blood एनयोः of these two एतत् this अन्नम् (is) food अथ यत् which (is) एतत् this अन्तः-हृदये जालकम् a net इव like, एतत् एनयोः प्रावरणम् covering; अथ या which एषा this नाडी nerve हृदयात् from the heart ऊर्ध्वा upward उच्चरति rises एषा this एनयोः of the two संचरणी for the moving सृतिः (is) the passage; यथा as सहस्रधा a thousandfold भिन्नः split केशः (is) a hair एवम् (it is) so; अस्य of this (body) एताः these हिताः Hitā नाम called नाड्यः nerves अन्तः-हृदये within the heart प्रतिष्ठिताः rooted भवन्ति are; एताभिः through these वै verily एतत् this (essence of food) आस्रवत् while moving आस्रवति passes; तस्मात् hence एषः this (subtle body) अस्मात् शारीरात् आत्मनः than the gross body प्रविविक्त-आहार-तरः what has got finer food इव as it were एव indeed भवति is.

3. 'And this human form that is in the left eye is his wife, Virāj (matter). This space

that is within the heart is their place of union.[1] The mass of blood[2] which is in the heart is their food. What looks like a net within the heart is their covering. The nerve that rises upward from the heart is their passage for moving;[3] it is like a hair split into a thousand parts. (Numerous) nerves of this body, called Hitā are rooted in the heart.[4] It is through these that the essence of food passes when it moves. Hence the subtle body has finer food than the gross body.[5]

[[1] In the dream state. For the sake of meditation, one and the same deity Vais'vānara (Virāj) is put forward as two: Indra and his consort, the active and the passive principle. Vais'vānara pervades the universe as both the experiencing subject and the experienced objects. The above twofold form is meant to point this out. Vais'vānara becomes Virāj in the individual during the waking state, Taijasa in the dream state, and Prājña in the state of dreamless sleep.

[2] Into which the food that is eaten is changed, and which sustains the subtle body.

[3] From the dream state to the waking state.

[4] That is, they branch out from the heart all over the body.

[5] Which takes that part of the food which is of medium fineness.]

तस्य प्राची दिक् प्राञ्चः प्राणाः, दक्षिणा दिग्दक्षिणे प्राणाः, प्रतीची दिक् प्रत्यञ्चः प्राणाः, उदीची दिगुदञ्चः प्राणाः, ऊर्ध्वा दिगूर्ध्वाः प्राणाः, अवाची दिगवाञ्चः प्राणाः, सर्वा दिशः सर्वे प्राणाः; स एष नेति नेत्यात्मा; अगृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यते, असङ्गो न हि सज्यते, असितो न व्यथते न रिष्यति; अभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः। स होवाच जनको वैदेहः, अभयं त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे; नमस्तेऽस्तु; इमे विदेहाः, अयमहमस्मि ॥ ४ ॥

इति द्वितीयं ब्राह्मणम् ॥

तस्य Of him (the sage identified with the Prājña) प्राची the eastern दिक् direction (is) प्राञ्चः the eastern प्राणाः vital force, दक्षिणा the southern दिक् दक्षिणे the southern प्राणाः, प्रतीची the western दिक् प्रत्यञ्चः the western प्राणाः, उदीची the northern दिक् उदञ्चः the northern प्राणाः, ऊर्ध्वा overhead दिक् ऊर्ध्वाः the upper प्राणाः, अवाची the below दिक् अवाञ्चः the lower प्राणाः, सर्वाः all दिशः the directions सर्वे all प्राणाः the vital forces; सः एषः . . . न रिष्यति (as in III. IX. 26.) जनक O Janaka अभयम् the fearless (Brahman) वै verily प्राप्तः possessed of असि (you) are इति this याज्ञवल्क्यः Yājñavalkya उवाच ह said. सः That वैदेहः Emperor of Videha जनकः Janaka उवाच ह said, भगवन् venerable याज्ञवल्क्य Yājñavalkya अभयम् the fearless (Brahman) त्वा you गच्छतात्

may reach यः who नः us अभयम् the fearless (Brahman) वेदयसे help to know ; ते to you नमः salutation अस्तु be ; इमे विदेहाः this empire of Videha अयम् (as also) this अहम् I अस्मि am (at your disposal).

4. 'Of the sage (identified with the Prājña), the eastern direction is the vital force in the east, the southern direction the vital force in the south, the western direction the vital force in the west, the northern direction the vital force in the north, the direction overhead the vital force that is above, the direction below is the vital force that is below, and all the directions are all the vital forces.' This self is That which has been described as "Not this, not this". It is imperceptible for It is not perceived; unshrinking, for It does not shrink ; unattached, for It is not attached ; untrammelled, It does not suffer, nor perish.[2] 'You have attained the fearless (Brahman), O Janaka', said Yājñavalkya. Janaka, Emperor of Videha, said, 'May the fearless (Brahman) reach you, venerable Yājñavalkya, who have made us know the fearless (Brahman). Salutation to you; here is the empire of Videha as also myself (at your disposal)'.

[[1] In the state of profound sleep, after having passed through identification with the Taijasa in the dream state. The Prājña corresponds to Hiraṇyagarbha on the cosmic scale. Hence the description of the sage as identified with the cosmic vital force.

[2] See III. ix. 26. This is the transcendent state which the sage next attains by realising that the individual self is none other than the Supreme Self.]

SECTION THREE

जनकं ह वैदेहं याज्ञवल्क्यो जगाम; स मेने न वदिष्य इति; अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते, तस्मै ह याज्ञवल्क्यो वरं ददौ; स ह कामप्रश्नमेव वव्रे, तं हास्मै ददौ; तं ह सम्राडेव पूर्वं पप्रच्छ॥१॥

याज्ञवल्क्यः Yājñavalkya जनकम् to Janaka वैदेहम् Emperor of Videha जगाम went ह it is said; सः he मेने thought न not वदिष्ये (I) shall say (anything) इति; अथ now ह once यत् when जनकः Janaka वैदेहः च Emperor of Videha याज्ञवल्क्यः Yājñavalkya च and अग्निहोत्रे on the Agnihotra समूदाते had talked, याज्ञवल्क्यः Yājñavalkya तस्मै ह him वरम् a boon ददौ had offered; सः ह he कामप्रश्नम् (the right of) asking any question at will एव alone वव्रे had chosen तं ह it अस्मै to him ददौ (Yājñavalkya) granted: सम्राट् the Emperor एव himself तं ह him पूर्वम् first पप्रच्छ questioned.

1. Yājñavalkya went to Janaka, Emperor of Videha. He thought, 'I shall not say anything'. Now Janaka and Yājñavalkya had once talked on the Agnihotra,[1] when Yājñavalkya had offered him a boon.[2] Janaka had chosen the right of asking him any question at will, and Yājñavalkya had granted it to him. So it was the Emperor who first questioned him.

[In the preceding section the transcendent self was briefly indicated through scriptural testimony, by a reference to the three states of consciousness. Here it is being supported, by a further reference to those very states, through reasoning so as to eliminate misconceptions.

[1] The ceremony of offering libations of milk in the fire every morning and evening.

[2] Being pleased with his grasp of the subject.]

याज्ञवल्क्य किंज्योतिरयं पुरुष इति । आदित्यज्योतिः सम्राडिति होवाच, आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ; एवमेवैतद्याज्ञवल्क्य ॥ २ ॥

याज्ञवल्क्य Yājñavalkya अयम् this पुरुषः man किं-ज्योतिः (is) possessed of what light इति. उवाच ह (He) said, सम्राट् O Emperor आदित्यज्योतिः possessed of the light that is the sun इति, अयम् he आदित्येन through the sun ज्योतिषा as light

एव indeed आस्ते sits पल्ययते goes out कर्म work कुरुते does विपल्येति comes back इति; याज्ञवल्क्य Yājñavalkya एतत् it एवम् (is) so एव indeed.

2. 'What serves as a light for a man?' Yājñavalkya said, 'The light of the sun, O Emperor. It is by the light of the sun that he sits, goes out, works and comes back'. 'It is indeed so, Yājñavalkya.'

अस्तमित आदित्ये याज्ञवल्क्य, किंज्योतिरेवायं पुरुष इति; चन्द्रमा एवास्य ज्योतिर्भवतीति, चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति; एवमेवैतद्याज्ञवल्क्य ॥ ३ ॥

आदित्ये On the sun अस्तमिते having set; चन्द्रमाः the moon एव indeed अस्य his ज्योतिः light भवति becomes, चन्द्रमसा through the moon. (Rest as before.)

3. 'After the sun has set, Yājñavalkya, what serves as a light for a man?' 'The moon indeed serves as his light. It is through the light of the moon that he sits, goes out, works and comes back.' 'It is indeed so, Yājñavalkya.'

अस्तमित आदित्ये याज्ञवल्क्य, चन्द्रमस्यस्तमिते, किंज्योतिरेवायं पुरुष इति; अग्निरेवास्य ज्योतिर्भवतीति,

अग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ; एवमेवैतद्याज्ञवल्क्य ॥ ४ ॥

चन्द्रमसि On the moon ; अग्निः fire, अग्निना through the fire. (Rest as before.)

4. 'After the sun has set, and the moon has set, what serves as a light for a man?' 'The fire indeed serves as his light. It is through the light of the fire that he sits, goes out, works and comes back.' 'It is indeed so, Yājñavalkya.'

अस्तमित आदित्ये याज्ञवल्क्य, चन्द्रमस्यस्तमिते, शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति ; वागेवास्य ज्योतिर्भवतीति, वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ; तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायते, अथ यत्र वागुच्चरति, उपैव तत्र न्येतीति ; एवमेवैतद्याज्ञवल्क्य ॥ ५ ॥

अग्नौ On the fire शान्ते having gone out ; वाक् speech (sound) वाचा through sound ; सम्राट् O Emperor तस्मात् therefore वै verily यत्र when स्वः one's own पाणिः hand अपि even न not विनिर्ज्ञायते is distinctly perceived, अथ then यत्र where वाक् sound उच्चरति issues, तत्र there उपन्येति (one) reaches एव indeed इति. (Rest as before.)

5. 'After the sun and the moon have both set, and the fire has gone out, Yājñavalkya, what serves as a light for a man?' 'Sound[1] indeed serves as his light. It is through the light of sound that he sits, goes out, works and comes back. Therefore, O Emperor, even when one's own hand is not distinctly perceived, if a sound[2] issues anywhere, one can reach there.' 'It is indeed so, Yājñavalkya.'

[[1] Sound stimulates the ear. This produces discrimination in the mind, which impels a man to action. Thus sound also serves as a light.

[2] This is suggestive of odour etc., which also stimulate their respective organs, and through them the mind.]

अस्तमित आदित्ये याज्ञवल्क्य, चन्द्रमस्यस्तमिते, शान्तेऽग्नौ, शान्तायां वाचि किंज्योतिरेवायं पुरुष इति; आत्मैवास्य ज्योतिर्भवतीति, आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ६ ॥

वाचि On sound शान्तायाम् having been hushed; आत्मा the self, आत्मना through the self. (Rest as before.)

6. 'After the sun and the moon have both set, the fire has gone out, and sound is hushed, Yājñavalkya, what serves as a light for a man?' 'The self indeed serves as his light.

It is through the light of the self that he sits, moves about, works and comes back.'[1]

[[1] So far it has been shown that in the waking state, something external to the body serves as a light for a man. But in the states of dream and profound sleep, external lights are of no use. Yet in the dream state, activities go on, requiring some kind of light. Regarding profound sleep also, one remembers on awaking that one slept happily, and a light is needed as a witness of this experience. So Janaka asks what that internal light is. Yājñavalkya answers that it is the self. He means that this is a light different from the body, organs and mind, and yet their illuminer, but it is not itself illumined by anything. It is different from all material lights, and does not belong to the body, for it is absent in a dead body. It is not mental also, for the mind, being an object, cannot possess any light, just like the body. Therefore this light must be within the body, and it belongs to the self. External acts too are performed with the help of its light, which is self-effulgent and eternal. Janaka, however, does not immediately comprehend all this. Hence his next question.]

कतम आत्मेति; योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः; स समानः सन्नुभौ लोकावनुसञ्चरति, ध्यायतीव लेलायतीव; स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥

कतम: Which आत्मा (is) the self इति; अयम् this पुरुष: (infinite) entity य: which (is) विज्ञानमय: associated with or reflected in the intellect प्राणेषु amid the organs हृदि-अन्त: within the heart ज्योति: (self-effulgent) light; स: it समान: similar (to the intellect) सन् being उभौ the two (this and the next) लोकौ lives अनुसञ्चरति roams between, ध्यायति (it) thinks इव as it were लेलायति (it) quivers इव as it were; स: it हि for स्वप्न: the dream भूत्वा becoming मृत्यो: of death रूपाणि the forms इमम् this (waking) लोकम् world अतिक्रामति goes beyond.

7. 'Which is the self?'[1] 'This (infinite) entity which is reflected in the intellect,[2] which is amid[3] the organs, and which is the (self-effulgent) light[4] within the intellect.[5] Simulating the intellect,[6] it roams between this and the next life; it thinks, as it were, and quivers, as it were.[7] For being one with dreams,[8] it goes beyond this (waking) world,[9] which represents the forms of death (ignorance and its offshoots).

[[1] Which particular entity in this aggregate of body, organs and mind, in which so many things have revealing properties?

[2] The suffix *mayaṭ* in the word 'Vijñānamaya' does not denote modification, for the self is not a modification of the intellect. It only means that the self assumes

the characteristics of the intellect, as light reflected in a glass globe assumes the shape, colour, etc. of the latter.

[3] Hence different from them.

[4] The self successively illumines with its own light the mind, organs, body and external objects, just as light within a glass globe illumines the globe and things that are inside and outside.

[5] And therefore distinct from the intellect.

[6] Because the self is pure, it is coloured by the intellect, which is next to it, as a crystal is by a red rose placed near it.

[7] Though the self is absolutely inactive, it appears to think and quiver, because the intellect does so.

[8] When the intellect is transformed into dreams. The Mādhyandina text reads '*Sadhīḥ*' instead of '*Sa hi*'.

[9] That is, the body, organs, etc. operating in the waking state.]

स वा अयं पुरुषो जायमानः — शरीरमभिसम्पद्यमानः — पाप्मभिः संसृज्यते ; स उत्क्रामन् — म्रियमाणः — पाप्मनो विजहाति ॥ ८ ॥

सः वै That अयम् this पुरुषः entity (the individual self) जायमानः while being born — शरीरम् a body अभिसम्पद्यमानः assuming — पाप्मभिः with evils संसृज्यते is connected ; सः he म्रियमाणः while dying, उत्क्रामन् departing from the body, पाप्मनः (those) evils विजहाति gives up.

8. 'This entity (the individual self), mentioned above, at the time of birth, or assuming

a body, is connected with evils;[1] and at the time of death, or departing from the body, it gives up those evils.[2]

[[1] The body and organs, which are the cause of evils, being the support of righteousness and unrighteousness.

[2] This association with the gross body and the dissociation from it are due to the identification of the self with the intellect, just like its association with and dissociation from the body during the waking and the dream state respectively. Both these show that the self is different from the body.]

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवतः—इदं च परलोकस्थानं च; सन्ध्यं तृतीयं स्वप्नस्थानं; तस्मिन् सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यति—इदं च परलोकस्थानं च। अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनन्दांश्च पश्यति; स यत्र प्रस्वपिति, अस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य, स्वयं निर्माय, स्वेन भासा, स्वेन ज्योतिषा प्रस्वपिति; अत्रायं पुरुषः स्वयं ज्योतिर्भवति ॥ ९ ॥

तस्य Above-mentioned वै very एतस्य this पुरुषस्य of entity (individual self) द्वे two एव only स्थाने places भवतः there are—इदं च this परलोक-स्थानम् the place that is the next life च and; तृतीयम् the third स्वप्न-स्थानम् the dream

state सन्ध्यम् (is) at the junction ; तस्मिन् that सन्ध्ये situated at the junction स्थाने in place तिष्ठन् staying एते these उभे both स्थाने places पश्यति (it) sees—इदं च this परलोकस्थानम् the place that is the next life च and ; अथ now अयम् it परलोकस्थाने for the next life यथा-आक्रमः possessed of whatever support भवति is तम् that आक्रमम् support आक्रम्य betaking himself to पाप्मनः sins (miseries) आनन्दान् joys च and उभयान् both पश्यति (it) sees ; सः it (the self) यत्र when प्रस्वपिति dreams अस्य this सर्वावतः all-sustaining लोकस्य of aggregate of body, organs, etc. मात्राम् a little अपादाय taking away स्वयम् itself विहत्य killing, making insensible स्वयम् itself निर्माय creating स्वेन ज्योतिषा (illumined) by its own light स्वेन भासा through its own radiance प्रस्वपिति (it) dreams ; अत्र in this (state) अयम् this पुरुषः entity (the self) स्वयम् itself ज्योतिः the light भवति becomes.

9. 'This entity (the individual self) mentioned above has only two places, this life and the next life. The dream state, which is the third, is at the junction (of the two).[1] Staying in that place at the junction, it sees both places this life and the next.[2] Now whatever support[3] it may have for the next life, it betakes itself to that and sees both miseries[4] and joys. When it dreams, it takes away a little[5] of this all-sustaining[6] body, itself makes (the body) insensible and itself creates (a

dream body),[7] and dreams through its own radiance (illumined) by its own light.[8] In this state this entity (the self) itself becomes the light.[9]

[[1] So it is not an additional place.

[2] Dreams generally correspond to experiences of the waking state. But sometimes one dreams things neither experienced nor to be experienced in this life. And since dreams are not original experiences, the above must be attributed to experiences of another life.

[3] *Viz.*, meditations and actions of this life and impressions of those of previous lives (IV. IV. 2).

[4] The results of sins, sins themselves being imperceptible.

[5] That is, impressions gathered in this life.

[6] Which sustains all beings (see I. IV. 16). The body includes the organs, internal and external. The word 'Sarvāvat' may also be the same as 'Sarvavat', what is possessed of particles of all the elements and their offshoots, which cause attachment; that is, the aggregate of body, organs, etc.

[7] These phenomena are due to the resultant of the past work of a person. Hence the individual self is spoken of as their author.

[8] When the mind, dissociated in dream from external objects, takes the form of impressions of them, it is the self that manifests itself as those impressions. This is spoken of as 'its own radiance'. These impressions, again, are illumined in that state by the eternal vision of

the self as the detached witness. This is referred to as 'its own light'.

[9] Free from all contact with physical and external elements and their effects.]

न तत्र रथा न रथयोगा न पन्थानो भवन्ति, अथ रथान्रथयोगान्पथः सृजते; न तत्रानन्दा मुदः प्रमुदो भवन्ति, अथानन्दान् मुदः प्रमुदः सृजते; न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति, अथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते; स हि कर्ता ॥ १० ॥

तत्र In that (state) न neither रथाः chariots न nor रथ-योगाः animals hitched to the chariot न nor पन्थानः roads भवन्ति there are, अथ yet रथान् the chariots रथयोगान् animals hitched to the chariot पथः roads सृजते (the self) creates; तत्र in it आनन्दाः joys मुदः delights प्रमुदः raptures न not भवन्ति there are, अथ yet आनन्दान् joys मुदः delights प्रमुदः raptures सृजते (the self) creates; तत्र in it वेशान्ताः pools पुष्करिण्यः tanks स्रवन्त्यः rivers न not भवन्ति there are, अथ yet वेशान्तान् pools पुष्करिणीः tanks स्रवन्तीः rivers सृजते (the self) creates; सः it हि for कर्ता (is) the doer.

10. 'In that state there are neither chariots nor animals to be hitched to them, nor roads, yet it (the self) creates the chariots, animals and roads. There are no joys, delights or raptures in it, yet it creates the joys, delights

and raptures. There are no pools, tanks or rivers in it, yet it creates the pools, tanks and rivers. For it is the doer.'[1]

[[1] In dream it is the mind that is modified in the form of impressions of external things, under the stimulation of one's past actions. These actions are possible because of the reflection of the self-effulgent Ātman behind the body and organs that perform them. Hence the self is spoken of as creating the dream objects.]

तदेते श्लोका भवन्ति ।

स्वप्नेन शारीरमभिप्रहत्या-
सुप्तः सुप्तानभिचाकशीति ।
शुक्रमादाय पुनरैति स्थानं
हिरण्मयः पुरुष एकहंसः ॥ ११ ॥

तत् Regarding this एते these श्लोकाः Mantra verses भवन्ति there are: हिरण्मयः Effulgent एकहंसः travelling alone पुरुषः the infinite entity (the self) स्वप्नेन through dream शारीरम् the body अभिप्रहत्य making inert असुप्तः (itself) awake शुक्रम् a luminous (bit of the organs) आदाय (and) taking सुप्तान् (things) dormant अभिचाकशीति witnesses; पुनः again स्थानम् to (its) place (the waking state) एति (it) comes.

11. 'Regarding this[1] there are the following Mantra verses: "The effulgent, infinite entity that travels[2] alone makes the body inert

through dream, and itself awake and taking a luminous[3] bit of the organs, it witnesses[4] things that are dormant.[5] Again it comes to the waking state.[6]

[[1] Self-luminosity etc. of the self.

[2] Which travels between this life and the next life, the waking and dream states, etc.

[3] Because they reveal objects.

[4] Illumines them through its eternal vision.

[5] That appear in the mind as impressions of diverse internal and external objects.

[6] For the purpose of working.]

प्राणेन रक्षन्नवरं कुलायं
बहिष्कुलायादमृतश्चरित्वा ।
स ईयतेऽमृतो यत्र कामं
हिरण्मयः पुरुष एकहंसः ॥ १२ ॥

हिरण्मयः Effulgent एकहंसः travelling alone अमृतः (and) immortal पुरुषः infinite entity अवरम् the worthless कुलायम् nest (the body) प्राणेन through the vital force रक्षन् guarding कुलायात् बहिः outside the nest चरित्वा wandering सः that अमृतः immortal (entity) यत्र wherever (it may arise) कामम् (its) desire ईयते attains.

12. "The effulgent, infinite entity that travels alone and is immortal, guards[1] the

worthless nest (body) through the vital force, and wanders outside it.[2] That immortal entity attains its desire[3] wherever it may arise.

[[1] Otherwise it would be considered dead.

[2] Though in dream it stays in the body, yet it is, like the ether, unconnected with it. Hence it is spoken of as going outside.

[3] It gets anything it wants in the form of impressions standing out in the mind.]

स्वप्नान्त उच्चावचमीयमानो
रूपाणि देवः कुरुते बहूनि ।
उतेव स्त्रीभिः सह मोदमानो
जक्षदुतेवापि भयानि पश्यन् ॥ १३ ॥

देव: The effulgent entity स्वप्नान्ते in dream उच्च-अवचम् higher and lower (states) ईयमान: attaining बहूनि manifold रूपाणि forms कुरुते creates; उत either स्त्रीभि: with women सह in company मोदमानः rejoicing इव as it were, जक्षत् laughing उत or भयानि terrible (objects) अपि even पश्यन् seeing इव as it were.

13. "In dream the effulgent entity, attaining higher and lower states,[1] creates[2] manifold forms (as impressions): It seems to rejoice in the company of women, or laugh, or even see terrible objects.

[[1] Becoming gods etc., or animals etc.
[2] See the note on paragraph 10.]

आराममस्य पश्यन्ति न तं पश्यति कश्चन इति ॥

तं नायतं बोधयेदित्याहुः। दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते। अथो खल्वाहुः, जागरितदेश एवास्यैष इति; यानि ह्येव जाग्रत्पश्यति तानि सुप्त इति; अत्रायं पुरुषः स्वयं ज्योतिर्भवति; सोऽहं भगवते सहस्रं ददामि, अत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥ १४ ॥

अस्य Its आरामम् play पश्यन्ति (people) see, कश्चन any one तम् it न not पश्यति sees इति; तम् him (a sleeping man) आयतम् suddenly न not बोधयेत् (one) should rouse इति this आहुः (physicians etc.) say. यम् To whichever (organ) एषः it (the self) न प्रतिपद्यते does not get back, अस्मै to the body दुर्भिषज्यम् difficulty of doctoring भवति there is ह indeed; अथो खलु on the other hand आहुः (others) say, जागरित-देशः the waking state (is) एव itself अस्य its एषः this (dream) इति; यानि which एव only हि for जाग्रत् while awake पश्यति (it) sees तानि those (it sees) सुप्तः in dream इति; अत्र in this (dream state) अयम् this पुरुषः the infinite entity स्वयम् itself ज्योतिः the light भवति becomes; सः that अहम् I भगवते to your reverence सहस्रम् a thousand (cows) ददामि give. अतः than this ऊर्ध्वम् further विमोक्षाय about liberation ब्रूहि tell (me) इति.

14. "People see (only) its (fanciful) play, but none sees it." They say, "Do not rouse a man suddenly. (For) if it does not get back to the (proper) organ,[1] the body is difficult to doctor.[2] On the other hand, others say that the waking state itself is its dream state;[3] for one sees in dream only those objects that he sees in the waking state. (It is not so.) In the dream state this infinite entity itself becomes the light".'[4] 'I give you a thousand (cows), venerable sir. Please tell me beyond this about liberation.'

[[1] The particular outer organ through which the self left the body in the dream state.

[2] Because it may result in blindness, deafness, or any other serious defect.

[3] So there is no third place at the junction of this and the next life.

[4] Because the organs have ceased to function, and there is no external light.]

स वा एष एतस्मिन्सम्प्रसादे रत्वा चरित्वा, दृष्ट्वैव पुण्यं च पापं च, पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव; स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवति; असङ्गो ह्ययं पुरुष इति; एवमेवैतद्याज्ञवल्क्य, सोऽहं भगवते सहस्रं ददामि, अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥

सः That वै very एषः this (entity) रत्वा after rejoicing चरित्वा (and) wandering पुण्यं च (the results of) good पापम् (the results of) evil च and दृष्ट्वा seeing एव merely एतस्मिन् this सम्प्रसादे in profound sleep (lit. perfect serenity) (stays), पुनः again प्रतिन्यायम् in a reverse way to that of going प्रतियोनि to its previous state स्वप्नाय for the dream state एव itself आद्रवति (and) hastens back ; सः it तत्र there यत् किञ्चित् whatever पश्यति sees तेन by that अनन्वागतः unaffected भवति is ; अयं this हि for पुरुषः infinite entity असङ्गः (is) unattached इति ; याज्ञवल्क्य Yājñavalkya एतत् it एवम् (is) so एव indeed. (Rest as before.)

15. 'After rejoicing and wandering[1] (in dream), and merely seeing[2] (the results of) good and evil, that entity (stays) in the state of profound sleep,[3] and hastens back in a reverse way just to its previous state, the dream. It is unaffected[4] by whatever it sees in that state, for this infinite entity is unattached.' 'It is indeed so, venerable sir. I give you a thousand (cows). Please tell me beyond this about liberation itself.'

[[1] That is, experiencing the fatigue due to it.

[2] Not actually experiencing. The results are pleasure and pain respectively.

[3] Where there is no mental activity, but only the awareness of bliss.

[¹ Because in dream it is detached from the body and organs, it has no activity, and hence acquires neither good nor evil.]

स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा, दृष्ट्वैव पुण्यं च पापं च, पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव; स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवति, असङ्गो ह्ययं पुरुष इति; एवमेवैतद्याज्ञवल्क्य, सोऽहं भगवते सहस्रं ददामि, अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १६ ॥

स्वप्ने In dream, बुद्ध-अन्ताय to the waking state. (Rest as before.)

16. 'After rejoicing and wandering in dream, and merely seeing (the results of) good and evil, it hastens back in a reverse way just to its previous state, that of waking. It is unaffected by whatever it sees in that state, for this infinite entity is unattached.'[1] 'It is indeed so, Yājñavalkya. I give you a thousand (cows), venerable sir. Kindly tell me beyond this about liberation itself.'

[¹ If it were attached, or possessed of desire, it would experience the results of that evil in the waking state. But it does not. This shows that it was unattached in dream.]

स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा, दृष्ट्वैव पुण्यं च पापं च, पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥ १७ ॥

बुद्धान्ते in the waking state, स्वप्न-अन्ताय to the state of dream, or of dreamless sleep. (Rest as before.)

17. 'After rejoicing and wandering in the waking state, and merely seeing[1] (the results of) good and evil, it hastens back in a reverse way just to its previous state, that of dream (or dreamless sleep).

[[1] Even in the waking state the self has no agency. See the note on paragraph 10.]

तद्यथा महामत्स्य उभे कूलेऽनुसञ्चरति पूर्वं चापरं च, एवमेवायं पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं च ॥ १८ ॥

तत् यथा As महामत्स्यः a large fish पूर्वं च eastern अपरम् western च and उभे to both कूले the banks अनुसञ्चरति alternately swims, एवम् एव even so अयम् this पुरुषः infinite entity स्वप्नान्तं च to the dream state बुद्धान्तं to the waking state च and एतौ these उभौ two अन्तौ states अनुसञ्चरति alternately moves.

18. 'As a large fish swims alternately to both the banks (of a river), eastern and

western, even so does this infinite entity move alternately to both these states—those of dream and waking.

तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियते, एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति ॥ १९ ॥

तत् यथा As अस्मिन् in this आकाशे sky श्येनः वा a hawk सुपर्णः a falcon वा or विपरिपत्य flying variously श्रान्तः (is) exhausted पक्षौ the wings संहत्य (and) stretching संलयाय towards (its) nest (lit. place of perfect rest) एव only ध्रियते directs itself, एवम् एव even so अयम् this पुरुषः infinite entity एतस्मै अन्ताय for this state धावति hastens यत्र where सुप्तः (being) asleep कञ्चन any कामम् desire न not कामयते seeks, कञ्चन any स्वप्नम् dream न not पश्यति sees.

19. 'As a hawk or a falcon, flying variously in the sky, is exhausted, and stretching its wings directs itself towards its nest only, even so does this infinite entity hasten to the state where, falling asleep, it seeks no desire and sees no dream.[1]

[[1] In deep sleep the individual self, free from all relative attributes and devoid of all exertions, is united with the Supreme Self. Even waking experiences may

be classed as dreams, since in both there is misapprehension of the reality.]

ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति, शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा; अथ यत्रैनं घ्नन्तीव जिनन्तीव, हस्तीव विच्छाययति, गर्तमिव पतति, यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यते; अथ यत्र देव इव राजेव, अहमेवेदं सर्वोऽस्मीति मन्यते, सोऽस्य परमो लोकः ॥२०॥

अस्य Of a man ताः those, already mentioned वै very एताः these हिताः Hitā नाम called नाड्यः nerves यथा as सहस्रधा a thousandfold भिन्नः split केशः (is) a hair तावता so much अणिम्ना with fineness तिष्ठन्ति are, शुक्लस्य of white नीलस्य of blue पिङ्गलस्य of brown हरितस्य of green लोहितस्य of red (serums) पूर्णा (and) full; अथ now यत्र when एनम् him घ्नन्ति (they) are killing इव as it were जिनन्ति are overpowering इव as it were, हस्ती an elephant विच्छाययति is chasing इव as it were, गर्तम् into a pit पतति (he) is falling इव as it were, यत् एव whatever जाग्रत्-भयम् fear in the waking state पश्यति (one) sees तत् that अत्र at this time अविद्यया through ignorance मन्यते (one) fancies; अथ also यत्र when देवः (he is) a god इव as it were, राजा (or) a king इव as it were, अहम् I एव myself इदम् this (universe) सर्वः (and) all अस्मि am, इति this मन्यते (or) thinks, सः that (this last) अस्य his परमः highest लोकः (is) state.

20. 'In a man are those nerves called Hitā,[1] which are as fine as a hair split into a thousand parts, and full of white, blue, brown, green and red[2] serums. Now, when he feels as if somebody was killing him, or overpowered him, or an elephant was chasing him, or he was falling into a pit—(in short) fancies at the time through ignorance whatever fears he has experienced in the waking state, (that is dream). So also when he is a god, as it were,[3] or a king, as it were, or he thinks, "I am this universe and comprise all" This last is his highest state.[4]

[[1] These have been referred to in II. i. 19 and IV. ii. 3. These nerves are the seat of the subtle body, which is the repository of impressions. It is transparent, but on account of its contact with the serums, it manifests itself in dream, under the influence of a man's past work, as images which take various forms.

[2] The colours are due to the mixture of wind, bile and phlegm in varying proportions.

[3] A man who has attained sufficient purity of mind through meditation to feel identity with the gods etc., in the waking state, also feels the same in the dream state. Similarly, when he has been fortunate enough to eliminate his ignorance and realise Brahman, he feels in the dream state, too, that he is everything.

[4] His natural state of the Supreme Self.]

तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयं रूपम् । तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्, एवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्; तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् ॥ २१ ॥

तत् That एतत् this (is) वै indeed अस्य his अतिच्छन्दा transcending अपहत-पाप्मा bereft of evils (merits and demerits) अभयम् fearless रूपम् form. तत् यथा As (a man) प्रियया dear स्त्रिया by (his) wife सम्परिष्वक्तः fully embraced बाह्यम् external किञ्चन anything न neither वेद knows न nor आन्तरम् internal, एवम् एव even so अयम् this पुरुषः infinite entity प्राज्ञेन आत्मना by the Supreme Self सम्परिष्वक्तः . . . न आन्तरम् (as above); तत् that एतत् this (is) वै indeed अस्य his आप्त-कामम् with objects of desire realised आत्म-कामम् with objects of desire transformed into the self अकामम् devoid of desire शोक-अन्तरम् beyond grief रूपम् form.

21. 'That[1] indeed is his form which transcends desire, is bereft of merits and demerits, and is fearless.[2] As a man fully embraced by his dear wife knows nothing external or internal, even so this infinite entity[3] fully embraced by the Supreme Self knows nothing external or internal.[4] That indeed is his form—in which all objects of desire have

been realised, in which they have become the self,[5] and which is devoid of desire and beyond grief.

[[1] Identity with all as Brahman attained in deep sleep.

[2] The transcendent form of the self, which is free from nescience (Avidyā), desire and work, is directly felt in deep sleep. Nescience of course persists in that state, but it does not appear as manifested.

[3] The individual self.

[4] That one is happy and so on. This absence of all particular consciousness is due to the unity of the individual self with the Supreme Self in deep sleep. It is not that the self does not know itself.

[5] In the waking and dream states, objects are believed to be separate from the self; hence they are coveted. But in deep sleep that difference is gone; hence there is no desire.]

अत्र पितापिता भवति, मातामाता, लोका अलोकाः, देवा अदेवाः, वेदा अवेदाः । अत्र स्तेनोऽस्तेनो भवति, भ्रूणहाभ्रूणहा, चाण्डालोऽचाण्डालः, पौल्कसोऽपौल्कसः, श्रमणोऽश्रमणः, तापसोऽतापसः; अनन्वागतं पुण्येनानन्वागतं पापेन, तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति ॥ २२ ॥

अत्र In this (state of deep sleep) पिता a father अपिता no father भवति is, माता a mother अमाता no mother, लोकाः

worlds अलोकाः (are) no worlds, देवाः gods अदेवाः no gods, वेदाः the Vedas अवेदाः no Vedas. अत्र In this (state) स्तेनः a thief अस्तेनः no thief भवति is, भ्रूणहा the murderer of a worthy Brāhmaṇa (or of a child in the mother's womb) अभ्रूणहा no such murderer, चाण्डालः a caṇḍāla अचाण्डालः no caṇḍāla, पौल्कसः a Pulkasa अपौल्कसः no Pulkasa, श्रमणः a monk अश्रमणः no monk, तापसः a recluse अतापसः no recluse; पुण्येन by good action अनन्वागतम् (this form is) unaffected, पापेन by bad action अनन्वागतम् unaffected, तदा then हि for हृदयस्य of the heart (intellect) सर्वान् all शोकान् afflictions तीर्णः beyond भवति (the self) is.

22. 'In this state, a father is no more a father,[1] a mother no more a mother, worlds are no more worlds,[2] the gods[3] no more gods, the Vedas[4] no more Vedas. In this state, a thief is no more a thief, the murderer of a worthy Brāhmaṇa no more such a murderer;[5] a Caṇḍāla[6] is not a Caṇḍāla, a Pulkasa[7] no more a Pulkasa, a monk no more a monk,[8] a recluse no more a recluse.[9] This form is unaffected by good actions[10] and unaffected by bad actions;[11] for the self is then beyond all afflictions[12] of the heart.[13]

[[1] Because such conceptions are based on certain actions, from which the self is dissociated in deep sleep.

[2] Those already attained or yet to be attained through rites cease to be so owing to one's dissociation from those rites.

[3] Who are a part of rites.

[4] Which enjoin the means, end, etc.

[5] That is, one is beyond evil actions too.

[6] One born of a S'ūdra father and a Brāhmaṇa mother.

[7] One born of a S'ūdra father and a Kṣatriya mother.

[8] That is, one is beyond actions belonging to one's caste.

[9] In other words, one is beyond the duties attaching to one's order of life.

[10] Those prescribed by the Scriptures.

[11] Committing acts forbidden by the Scriptures as also the non-performance of prescribed actions.

[12] Which are thwarted desires.

[13] That is, the intellect, the seat of which is the heart.]

यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ॥ २३ ॥

यत् वै That तत्र then (in deep sleep) न not पश्यति (the self) sees, तत् then पश्यन् वै although seeing न not पश्यति sees, द्रष्टुः of the seer दृष्टेः of sight विपरिलोपः absence हि for न never भवति takes place अविनाशित्वात् owing to imperishablity (of the seer); ततः from it (entity) अन्यत् (as) other विभक्तम् separate यत् which पश्येत् (it) can see तत् that द्वितीयम् second तु but न not अस्ति there is.

23. 'That it does not (apparently) see in that state is because, although (really) seeing in that state, it does not see; for there cannot be any absence of the sight of the seer, since the latter is imperishable.[1] But there is not that second[2] entity differentiated from it which it can see.

[[1] As the fire never loses its property of burning, nor the sun its nature of shining, so the seer, the self, never loses its eternal power of sight. In fact the seer, and sight are identical. Particular acts of vision seem to take place under certain circumstances, because duality manifests itself under the influence of nescience. See note 3 on III. iv. 2.

[2] In deep sleep the individual self is united with the Supreme Self, and all duality is engulfed in nescience. See note 2 on paragraph 21.]

यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति, न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वात्; न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥

जिघ्रति Smells, जिघ्रत् वै although smelling; घ्रातुः on the part of the smeller घ्रातेः of smelling; जिघ्रेत् (it) can smell. (Rest as before.)

24. 'That it does not (apparently) smell in that state is because, although (really)

smelling in that state, it does not smell; for there cannot be any absence of smelling on the part of the smeller, since the latter is imperishable. But there is not that second entity differentiated from it which it can smell.

यद्वै तन्न रसयते रसयन्वै तन्न रसयते, न हि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वात्; न तु तद्-द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥ २५ ॥

रसयते Tastes, रसयन् वै although tasting; रसयितुः on the part of the taster रसयतेः of tasting; रसयेत् (it) can taste. (Rest as before.)

25. 'That it does not (apparently) taste in that state is because, although (really) tasting in that state, it does not taste; for there cannot be any absence of tasting on the part of the taster, since the latter is imperishable. But there is not that second entity differentiated from it which it can taste.

यद्वै तन्न वदति वदन्वै तन्न वदति, न हि वक्तुर्वक्ते-र्विपरिलोपो विद्यतेऽविनाशित्वात्; न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥

वदति Speaks, वदन् वै although speaking; वक्तुः on the part of the speaker वक्तेः of speaking; वदेत् (it) can sp
(Rest as before.)

26. 'That it does not (apparently) speak in that state is because, although (really) speaking in that state, it does not speak; for there cannot be any absence of speaking on the part of the speaker since the latter is imperishable. But there is not that second entity differentiated from it which it can speak.

यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति, न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वात्; न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २७ ॥

शृणोति Hears, शृण्वन् वै although hearing; श्रोतुः on the part of the hearer श्रुतेः of hearing; शृणुयात् (it) can h
(Rest as before.)

27. 'That it does not (apparently) hear in that state is because, although (really) hearing in that state, it does not hear; for there cannot be any absence of hearing on the part of the hearer, since the latter is imperishable. But there is not that second entity differentiated from it which it can hear.

यद्वै तन्न मनुते मन्वानो वै तन्न मनुते, न हि मन्तुर्मते-
र्विपरिलोपो विद्यतेऽविनाशित्वात्; न तु तद्द्वितीयमस्ति
ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥

मनुते Thinks, मन्वान: वै although thinking; मन्तु: on the part of the thinker मते: of thinking; मन्वीत (it) can think. (Rest as before.)

28. 'That it does not (apparently) think in that state is because, although (really) thinking in that state, it does not think; for there cannot be any absence of thinking on the part of the thinker, since the latter is imperishable. But there is not that second entity differentiated from it which it can think.

यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति, नहि स्प्रष्टुः
स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्; न तु तद्द्वितीय-
मस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत् ॥ २९ ॥

स्पृशति Touches, स्पृशन् वै although touching; स्प्रष्टु: on the part of the toucher स्पृष्टे: of touching; स्पृशेत् (it) can touch. (Rest as before.)

29. 'That it does not (apparently) touch in that state is because, although (really) touching in that state, it does not touch; for there cannot be any absence of touching on the part

of the toucher, since the latter is imperishable. But there is not that second entity differentiated from it which it can touch.

यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति, न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्; न तु तद्-द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥

विजानाति Knows, विजानन् वै although knowing; विज्ञातुः on the part of the knower विज्ञातेः of knowing; विजानीयात् (it) can know. (Rest as before.)

30. 'That it does not (apparently) know in that state is because, although (really) knowing in that state, it does not know; for there cannot be any absence of knowing on the part of the knower, since the latter is imperishable. But there is not that second entity differentiated from it which it can know.

यत्र वान्यदिव स्यात्, तत्रान्योऽन्यत्पश्येत्, अन्योऽन्यज्जिघ्रेत्, अन्योऽन्यद्रसयेत्, अन्योऽन्यद्वदेत्, अन्योऽन्यच्छृणुयात्, अन्योऽन्यन्मन्वीत, अन्योऽन्यत्स्पृशेत्, अन्योऽन्यद्विजानीयात् ॥ ३१ ॥

यत्र वै Where (in the waking state) अन्यत् a different thing इव as it were स्यात् there is, तत्र there अन्यः one

अन्यत् another पश्येत् can see, जिघ्रेत् can smell, रसयेत् can taste, वदेत् can speak, शृणुयात् can hear, मन्वीत can think, स्पृशेत् can touch, विजानीयात् can know. (The rest is similar. See II. iv. 14 and IV. v. 15.)

31. 'Where[1] there is a different thing, as it were, there one can see another, one can smell another, one can taste another, one can speak another, one can hear another, one can think another, one can touch another and one can know another.

[[1] That is, in the waking and dream states.]

सलिल एको द्रष्टाद्वैतो भवति, एष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्यः, एषास्य परमा गतिः, एषास्य परमा सम्पत्, एषोऽस्य परमो लोकः, एषोऽस्य परम आनन्दः; एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥ ३२ ॥

सलिलः (Like) water एकः one द्रष्टा the seer अद्वैतः free from duality भवति (the self) becomes; सम्राट् O Emperor एषः this (is) ब्रह्मलोकः the world (state) that is Brahman, एषा this (is) अस्य its परमा highest गतिः goal, एषा अस्य परमा सम्पत् glory, एषः this (is) अस्य its परमः highest लोकः world, एषः अस्य परमः आनन्दः bliss; अन्यानि other भूतानि beings एतस्य this एव very आनन्दस्य of bliss मात्राम् a particle

उपजीवन्ति live on, इति thus याज्ञवल्क्यः Yājñavalkya एनम् him अनुशशास ह taught.

32. 'It becomes (in deep sleep serene) like water, one, the seer and free from duality. This is the world that is Brahman, O Emperor', thus did Yājñavalkya teach Janaka; 'this is its highest goal, this is its highest glory,[1] this is its highest world,[2] this is its highest bliss;[3] all other beings live on a particle[4] of this very bliss.

[[1] Because this is natural to it, while other glories are adventitious.

[2] Because other worlds are attained by it as a result of work, and therefore impermanent.

[3] Because other joys are artificial and short-lived, but this bliss is everlasting (*Chā. U.* VII. xxiii. 1).

[4] Projected as an object of enjoyment by nescience through sense-contact.]

स यो मनुष्याणां राद्धः समृद्धो भवति, अन्येषामधिपतिः, सर्वैर्मानुष्यकैर्भोगैः सम्पन्नतमः, स मनुष्याणां परम आनन्दः; अथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दः; अथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दः; अथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवाना-

मानन्दः—ये कर्मणा देवत्वमभिसम्पद्यन्ते; अथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दः, यश्च श्रोत्रियोऽवृजिनोऽकामहतः; अथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दः, यश्च श्रोत्रियोऽवृजिनोऽकामहतः; अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दः, यश्च श्रोत्रियोऽवृजिनोऽकामहतः; अथैष एव परम आनन्दः, एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः; सोऽहं भगवते सहस्रं ददामि, अत ऊर्ध्वं विमोक्षायैव ब्रूहीति; अत्र ह याज्ञवल्क्यो बिभयाञ्चकार, मेधावी राजा सर्वेभ्यो मान्तेभ्य उदरौत्सीदिति ॥ ३३ ॥

मनुष्याणाम् Among men सः he यः who राद्धः physically perfect समृद्धः opulent, अन्येषाम् of others अधिपतिः lord, सर्वैः all मानुष्यकैः human भोगैः with enjoyments सम्पन्नतमः most endowed, सः he मनुष्याणाम् among men परमः maximum आनन्दः joy भवति is (represents); अथ now ये (those) which (are) शतम् one hundred मनुष्याणाम् of men आनन्दाः (measures of) joy जित-लोकानाम् who have won that world पितृणाम् of the manes सः that एकः (equal) one (measure of) आनन्दः joy; गन्धर्वलोके in the world of the celestial minstrels; कर्म-देवानाम् of the gods through action—ये who कर्मणा through action देवत्वम् godhead अभिसम्पद्यन्ते attain; आजान-देवानाम् of the gods by birth, यः (of one) who च and

श्रोत्रियः (is) erudite in the Vedas अवृजिनः taintless अकामहतः (and) unaffected by desire; प्रजापतिलोके in the world of Prajāpati (Virāj); ब्रह्मलोके in the world of Brahman (Hiraṇyagarbha). (The rest is similar.) अथ Hereafter एषः this (is) एव indeed परमः the supreme आनन्दः bliss, एषः this ब्रह्मलोकः (is) the world that is Brahman सम्राट् O Emperor, इति this याज्ञवल्क्यः Yājñavalkya उवाच ह said; सः that अहम् I भगवते to your reverence सहस्रम् a thousand (cows) ददामि give, अतः this ऊर्ध्वम् beyond विमोक्षाय about liberation एव itself ब्रूहि tell (me) इति; अत्र ह at this याज्ञवल्क्यः Yājñavalkya बिभयाञ्चकार was afraid, मेधावी the intelligent राजा Emperor मा me सर्वेभ्यः अन्तेभ्यः for all conclusions (of his questions) उदरौत्सीत् would press इति.

33. 'He who among men is physically perfect, opulent, the lord of others, and most endowed with all human enjoyments, represents the maximum joy[1] of men. One hundred measures of joy for men equal one measure of joy for the manes who have won their world. One hundred measures of joy for the manes who have won their world[2] equal one measure of joy in the world of the celestial minstrels. One hundred measures of joy in the world of the celestial minstrels equal one measure of joy for the gods through action—those who attain godhead through their actions.[3] One

hundred measures of joy for the gods through action equal one measure of joy for the gods by birth, as also for one who is erudite in the Vedas, taintless and unaffected by desire. One hundred measures of joy for the gods by birth equal one measure of joy in the world of Prajāpati (Virāj), as also for one who is erudite in the Vedas, taintless and unaffected by desire.[4] One hundred measures of joy in the world of Prajāpati equal one measure of joy in the world of Hiraṇyagarbha, as also for one who is erudite in the Vedas, taintless and unaffected by desire. Hereafter, this indeed is the supreme bliss,[5] this is the world that is Brahman, O Emperor', said Yājñavalkya. 'I give you a thousand (cows), venerable sir. Kindly tell me beyond this about liberation itself.' At this Yājñavalkya was afraid, thinking, 'the intelligent Emperor would press me for all conclusions (of his questions)'.

[[1] Here man, the enjoyer, is identified with joy to suggest that the joy is but another form of the self, the whole universe being an illusory projection of Brahman, the Bliss Absolute.

[2] Through the performance of obsequial rites etc.

[3] Such as the Agnihotra.

[4] Although these three epithets are repeated, we are to understand that it is the degree of the absence of desire that determines the elevation to a particular sphere.

[5] Here the process of multiplication has ceased, for it is the very embodiment of bliss.]

स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा, दृष्ट्वैव पुण्यं च पापं च, पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥ ३४ ॥

स्वप्नान्ते In the dream state. (Rest as in paragraph 16.)

34. 'This same individual self, after rejoicing and wandering and merely seeing (the results of) good and evil in the dream state,[1] hastens back in a reverse way just to its previous state—that of waking.

[[1] To which it has returned from the state of deep sleep.]

तद्यथानः सुसमाहितमुत्सर्जद्यायात्, एवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति, यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥

तत् यथा Just as सुसमाहितम् fully loaded अनः a cart उत्सर्जत् creaking यायात् moves on, एवम् एव even so अयम् this शारीरः dwelling in the body आत्मा self प्राज्ञेन आत्मना

by the Supreme Self अन्वारूढः presided over उत्सर्जत् groaning याति goes, यत्र when एतत् thus ऊर्ध्व-उच्छ्वासी struggling for breath भवति (it) is.

35. 'Just as a cart, fully loaded, moves on creaking, even so does the self that is in the body,[1] presided over by the Supreme Self,[2] depart[3] groaning when it characteristically struggles for breath.[4]

[The transition of the self from one body to another is like its passing from dream to the waking state.

[1] The individual self identified with the subtle body.

[2] That is, revealed by the Self, the eternal Seer.

[3] Strictly speaking, the self, being omnipresent, goes nowhere. But because its adventitious adjunct, the subtle body, of which the vital force is an important ingredient, leaves the body, the self too is spoken of as doing that.

[4] This description of the pain and helplessness of the departing soul is for instilling dispassion for transmigratory existence.]

स यत्रायमणिमानं न्येति—जरया वोपतपता वाणिमानं निगच्छति—तद्यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यते, एवमेवायं पुरुष एभ्योऽङ्गेभ्यः सम्प्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥ ३६ ॥

सः अयम् This (body) यत्र when अणिमानम् thinness न्येति has—जरया वा by old age उपतपता by disease वा or अणिमानम् thinness निगच्छति attains—तत् then यथा as आम्रं वा a mango उदुम्बरम् a fig वा or पिप्पलम् peepul fruit वा or बन्धनात् from (its) stalk प्रमुच्यते is separated, एवम् एव even so अयम् this पुरुषः infinite entity एभ्यः these अङ्गेभ्यः from parts (of the body) सम्प्रमुच्य completely separating (itself) पुनः again प्राणाय for (the special manifestation of) the vital force एव indeed प्रतिन्यायम् in the same way प्रतियोनि to particular bodies आद्रवति hastens back.

36. 'When this body grows thin—is worn out by old age or disease—then as a mango, or a fig, or a peepul fruit is separated from its stalk, so does this infinite entity[1] completely[2] separating itself from the parts of the body, again[3] hastens back[4] in the same way (as before) to particular bodies[5] for the special manifestation of the vital force.

[[1] The individual self identified with the subtle body.

[2] Not leaving the vital force behind to guard the body, as in deep sleep.

[3] This indicates that the self has transmigrated before this also from one body to another.

[4] To another body, as it did in previous births.

[5] According to his work, knowledge and previous impressions.

तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्ते, अयमायाति, अयमागच्छतीति, एवं हैवंविदं सर्वाणि भूतानि प्रतिकल्पन्ते, इदं ब्रह्मायाति, इदमागच्छतीति ॥ ३७ ॥

तत् यथा Just as प्रत्येनसः appointed to deal with different offences उग्राः Ugras सूत-ग्रामण्यः the Sūtas and the village heads आयान्तम् the coming राजानम् king अन्नैः with foods पानैः with drinks आवसथैः with residences प्रतिकल्पन्ते wait for (saying), अयम् (here) he आयाति comes, अयं (here) he आगच्छति comes इति, एवं ह even so सर्वाणि all भूतानि the elements एवंविदम् such a knower प्रतिकल्पन्ते wait for, इदम् (here) this ब्रह्म Brahman आयाति comes, इदम् (here) It आगच्छति comes इति.

37. 'Just as the Ugras[1] appointed to deal with different offences, the Sūtas[2] and the village heads wait for a king who is coming, with foods and drinks and residences ready, saying, "Here he comes, here he comes", even so do all the elements[3] wait[4] for a person[5] who knows the results of his actions, saying, "Here comes Brahman,[6] here It comes".

[[1] Those born of a Kṣatriya father and a Sūdra mother. The word may also mean, men of fierce deeds.

[2] Those born of a Kṣatriya father and a Brāhmaṇa mother.

[3] That are to build his body, together with the presiding deities of the organs.

[4] With materials for experiencing the results of his actions.

[5] The individual self that transmigrates.

[6] That makes use of us and directs us. The word 'Brahman' is used, because the individual self is essentially identical with Brahman.]

तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्राम-ण्योऽभिसमायन्ति, एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति, यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३८ ॥ इति तृतीयं ब्राह्मणम् ॥

प्रयियासन्तम् Wishing to depart अभिसमायन्ति gather round, एवम् एव even so अन्तकाले at the time of death सर्वे all प्राणाः the organs इमम् this आत्मानम् self अभिसमायन्ति gather round, यत्र when एतत् thus ऊर्ध्व-उच्छ्वासी struggling for breath भवति (it) is. (Rest as before.)

38. 'Just as the Ugras appointed to deal with different offences, the Sūtas and the village heads gather round a king who is about to depart, even so do all the organs gather[1] round this self at the time of death, when it characteristically struggles for breath.'

[[1] Under the influence of the past actions of the departing soul.]

SECTION FOUR

स यत्रायमात्माबल्यं न्येत्य संमोहमिव न्येति, अथैनमेते प्राणा अभिसमायन्ति; स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति; स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति ॥ १ ॥

सः Same अयम् this आत्मा self यत्र when अबल्यम् weakness न्येत्य attaining संमोहम् stupor न्येति attains इव as it were, अथ then एते these प्राणाः organs एनम् to it अभिसमायन्ति come; सः it एताः these तेजः-मात्राः particles of light (organs) समभ्याददानः completely withdrawing हृदयम् the heart एव only अन्ववक्रामति comes to; यत्र when सः same एषः this चाक्षुषः dwelling in the eye पुरुषः being (deity) पराङ् backward पर्यावर्तते turns from all sides, अथ then अरूपज्ञः unapprehensive of colour भवति (the dying man) is.

1. 'When this same self becomes weak and unconscious, as it were,[1] these organs come to it. The self, completely[2] withdrawing these particles of light,[3] comes to the heart.[4] When this being that is in the eye[5] turns back from all sides, the dying man is unapprehensive of colour.

[[1] The self, being really transcendent, never becomes weak or unconscious. It is the weakness and unconsciousness of the body that are attributed to the self

[2] This shows the distinction of death from a dream in which the organs are withdrawn only partially.

[3] That is, the organs, which reveal objects.

[4] Although the self is by nature inactive, the activities of the intellect etc. are superposed on it. These activities cease when the self comes to the heart, and only the intelligence of the self is manifested there.

[5] The presiding deity of the eye, that is, a portion of the sun, under the influence of a person's past work, helps his eye to function while he is alive, but it goes back to the sun when he dies. Similarly with the presiding deities of the other organs. These deities resume their seats when the person is born again.]

एकीभवति, न पश्यतीत्याहुः; एकीभवति, न जिघ्रतीत्याहुः; एकीभवति, न रसयत इत्याहुः; एकीभवति, न वदतीत्याहुः; एकीभवति, न शृणोतीत्याहुः; एकीभवति, न मनुत इत्याहुः ; एकीभवति, न स्पृशतीत्याहुः; एकीभवति, न विजानातीत्याहुः; तस्य हैतस्य हृदयस्याग्रं प्रद्योतते; तेन प्रद्योतेनैष आत्मा निष्क्रामति — चक्षुष्टो वा, मूर्ध्नो वा, अन्येभ्यो वा शरीरदेशेभ्यः; तमुत्क्रामन्तं प्राणोऽनूत्क्रामति; प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति; सविज्ञानो भवति, सविज्ञानमेवान्ववक्रामति । तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥२॥

एकीभवति (The eye) is united (with the subtle body), न not पश्यति (he) sees, इति this आहुः (people) say; एकीभवति (the nose) is united, न not जिघ्रति (he) smells इति आहुः; रसयते tastes; वदति speaks; शृणोति hears; मनुते thinks; स्पृशति touches; विजानाति knows. (The rest is similar.) तस्य ह Of same एतस्य this हृदयस्य of the heart अग्रम् the end प्रद्योतते lights up; तेन प्रद्योतेन by the help of that light एषः this आत्मा self निष्क्रामति departs—चक्षुष्टः वा through the eye मूर्ध्नः वा through the head अन्येभ्यः through other शरीर-देशेभ्यः parts of the body वा or; उत्क्रामन्तम् going out तम् it अनु following प्राणः the vital force उत्क्रामति goes out; उत्क्रामन्तम् going out प्राणम् the vital force अनु following सर्वे all प्राणाः the organs उत्क्रामन्ति go out; सविज्ञानः endowed with (particular) consciousness भवति (the self) is, सविज्ञानम् (the body) with (*i.e.*, lighted up by) that consciousness एव indeed अनु-अवक्रामति (and) afterwards passes on to. विद्या-कर्मणी Knowledge and work पूर्वप्रज्ञा previous impressions च and तम् it (the self) समन्वारभेते follow.

2. '(The eye) is united (with the subtle body); then people say, "He does not see". (The nose) is united; then they say, "He does not smell". (The tongue) is united; then they say, "He does not taste". (The vocal organ) is united; then they say, "He does not speak". (The ear) is united; then they say, "He does not hear. (The mind) is united; then they say, "He does not think". (The

skin) is united; then they say, "He does not touch". (The intellect) is united; then they say, "He does not know". The (upper) end[1] of the heart lights up.[2] By the help of that light this self departs, either through the eye, or through the head, or through other parts of the body.[3] When it goes out, the vital force accompanies it; when the vital force goes out, all the organs accompany it.[4] Then the self is endowed with particular consciousness,[5] and afterwards passes on to the body that is brought to light by that consciousness. Meditation, work and previous impressions[6] follow it.[7]

[[1] That is, the nerve-end at the orifice of the heart, which serves as the exit for the self.

[2] The lighting up consists in the self revealing impressions of the kind of body suitable for the results to be attained in the next birth.

[3] According to its past work.

[4] No sequence is meant. At the time of death the subtle body, including the vital force and the organs, goes out. This is spoken of as the departure of the individual self.

[5] Of the next body. This consciousness is determined by one's past work. Therefore one should be particularly carefui to do good work and avoid evil work,

as also to practise meditations etc., so that only good thoughts may arise at the time of death.

[6] The impressions left in the mind by previous experience.

[7] These are the assets of a dying man journeying to the next life.]

तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति, एवमेवायमात्मेदं शरीरं निहत्य, अविद्यां गमयित्वा, अन्यमाक्रममाक्रम्यात्मानमुपसंहरति ॥ ३ ॥

तत् यथा Just as तृण-जलायुका a leech dwelling in grass तृणस्य of the grass अन्तम् to the end गत्वा going अन्यम् another आक्रमम् support (grass) आक्रम्य catching आत्मानम् itself, the rest of its body उपसंहरति withdraws, एवम् एव even so अयम् this आत्मा self इदम् this शरीरम् body निहत्य setting aside—अविद्याम् insentiency गमयित्वा causing to attain—अन्यम् another आक्रमम् support (body) आक्रम्य taking up आत्मानम् itself उपसंहरति withdraws (there).

3. 'Just as a leech dwelling in grass goes to the end of the grass, catches another support and withdraws itself (there), so does this self set aside the present body—make it senseless[1]—take up a new body and withdraw itself (there).[2]

[[1] Give up identification with it.

[3] Create another body by extending its impressions, and identify itself with it, just as it does in dream. Under the influence of its past work, knowledge, etc. the organs join it and start functioning. A new gross body is also formed, into which the organs enter, together with their presiding deities.]

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्याणतरं रूपं तनुते, एवमेवायमात्मेदं शरीरं निहत्य, अविद्यां गमयित्वा, अन्यन्नवतरं कल्याणतरं रूपं कुरुते— पित्र्यं वा, गान्धर्वं वा, दैवं वा, प्राजापत्यं वा, ब्राह्मं वा, अन्येषां वा भूतानाम् ॥ ४ ॥

तत् यथा Just as पेशस्कारी a goldsmith पेशसः of gold मात्राम् a little quantity अपादाय taking apart नवतरम् newer कल्याणतरम् (and) better अन्यत् another रूपम् form तनुते moulds, एवम् एव . . . गमयित्वा (as in paragraph 3) नवतरं कल्याणतरम् अन्यत् रूपं कुरुते makes—पित्र्यं वा fit for the (world of the) manes गान्धर्वम् fit for the celestial minstrels वा or दैवम् fit for the gods वा or प्राजापत्यम् fit for Prajāpati (Virāj) वा or ब्राह्मम् fit for Brahman (Hiraṇyagarbha) वा or अन्येषां भूतानाम् of other beings वा or.

4. 'Just as a goldsmith, taking apart a little quantity of gold, moulds another—a newer and better—form, even so does this self, setting this body aside—making it senseless—

create another—a newer and better—form[1] fit for the manes, or the celestial minstrels, or the gods, or Virāj, or Hiraṇyagarbha, or other beings.

[[1] The individual self goes to the next world surrounded by fine particles of the five gross elements, which serve as the material for building the new body.]

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय अकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति; यथाकारी यथाचारी तथा भवति—साधुकारी साधुर्भवति, पापकारी पापो भवति; पुण्यः पुण्येन कर्मणा भवति, पापः पापेन। अथो खल्वाहुः काममय एवायं पुरुष इति; स यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत्कर्म कुरुते, यत्कर्म कुरुते तदभिसम्पद्यते ॥ ५ ॥

सः That अयम् this आत्मा self वै verily ब्रह्म (is) Brahman विज्ञानमयः associated with the intellect मनोमयः associated with the mind प्राणमयः associated with the vital force चक्षुर्मयः associated with the eyes श्रोत्रमयः associated with the ears पृथिवीमयः associated with earth आपोमयः associated with water वायुमयः associated with the air आकाशमयः associated with the ether तेजोमयः associated with fire

अतेजोमयः associated with what is not fire काममयः associated with desire अकाममयः associated with want of desire क्रोधमयः associated with anger अक्रोधमयः associated with the absence of anger धर्ममयः associated with righteousness अधर्ममयः associated with unrighteousness सर्वमयः associated with all; तत् एतत् this (is proved) यत् that इदंमयः (the self is) associated with this (the perceptible) अदोमयः (and) associated with that (the imperceptible or inferred) इति; यथाकारी as (it) does, यथाचारी as (it) acts, तथा so भवति (it) becomes—साधुकारी the doer of good साधुः good भवति becomes, पापकारी the doer of evil पापः evil भवति becomes; पुण्येन कर्मणा by a good act पुण्यः virtuous भवति (it) becomes, पापेन by a vicious (act) पापः (it becomes) vicious. अथो खलु However आहुः (others) say, अयम् this पुरुषः infinite entity, self काममयः (is) associated with desire एव alone इति; सः it यथाकामः possessed of whatever desire भवति is तत्-क्रतुः of that resolve भवति (it) is; यत्-क्रतुः of whatever resolve भवति (it) is तत् that कर्म work कुरुते (it) does; यत् what कर्म work कुरुते (it) does तत् that अभिसम्पद्यते (it) attains.

5. 'This same self[1] is verily Brahman, as also associated with the intellect, with the mind, with the vital force, with the eyes, with the ears, with earth,[2] with water, with the air, with the ether, with fire and with what is other than fire, with desire and with want of desire, with anger and with the absence of anger, with

righteousness and with unrighteousness and with all.[3] Thus it is (proved) that it is associated with what is perceived and with what is inferred.[4] As it does[5] and as it acts,[6] so it becomes: The doer of good becomes good, and the doer of evil becomes evil; it becomes virtuous through a virtuous act and vicious through a vicious act.[7] Others, however, say that the self is identified with desire alone.[8] It resolves as it desires; it does the work that it resolves; and it attains the results of the work it does.

[[1] The transmigrating self under discussion. In reality it is Brahman. But prior to realisation it is apparently identified with the intellect. So at times with the rest. See note 2 on IV. III. 7.

[2] When the results of past work tend to lead to a body preponderating in earth. Similarly with the rest.

[3] The universe being the product of righteousness and unrighteousness.

[4] The mind has infinite modifications, and the self reflected in them also resembles them. By noticing the external effects, outsiders conclude that the self is associated with anger, for instance, or with righteousness.

[5] Following scriptural injunctions and prohibitions.

[6] Naturally, in matters neither enjoined nor forbidden by the Scriptures.

[7] Not habitual performance but even a single deed affects the doer. Repetition only intensifies the relation.

[8] They think that although virtue and vice lead to the taking of a body, yet it is desire that prompts virtuous and vicious actions. So desire alone is the cause of transmigration. If a man of realisation does some work without any motive, it does not produce any virtue or vice to cause a new birth.]

यदेष श्लोको भवति ।

तदेव सक्तः सह कर्मणैति
लिङ्गं मनो यत्र निषक्तमस्य ।
प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् ।
तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणे ॥

इति नु कामयमानः; अथाकामयमानः—योऽकामो निष्काम आप्तकाम आत्मकामो—न तस्य प्राणा उत्क्रामन्ति, ब्रह्मैव सन्ब्रह्माप्येति ॥ ६ ॥

तत् Regarding this एषः this श्लोकः Mantra verse भवति there is: सक्तः Being attached कर्मणा सह together with work तत् that एव alone एति reaches यत्र where अस्य its (of the self) लिङ्गम् subtle body मनः the mind निषक्तम् (is) set; अयम् it (this self) यत् किं च whatever इह in this world करोति does तस्य कर्मणः of that work अन्तम् end, exhaustion प्राप्य attaining पुनः again कर्मणे for (new) work तस्मात्

लोकात् from that world अस्मै लोकाय to this world ऐति comes; इति नु thus कामयमानः (the man) with craving (transmigrates); अथ but अकामयमानः (the man) who has no craving—यः who अकामः (is) without desires निष्कामः whom desires have left आप्तकामः whose objects of desire have been realised आत्मकामः whose object of desire is only the self—तस्य his प्राणाः organs न not उत्क्रामन्ति go out, ब्रह्म Brahman एव itself सन् being ब्रह्म Brahman अप्येति is merged in.

6. 'Regarding this there is this Mantra verse: "Being attached, (the transmigrating self) together with work attains that on which its subtle body or mind[1] is set.[2] Experiencing (in the other world) the end[3] of whatever work it does in this life, it comes from that world again to this world[4] for (new) work." Thus does the man with craving (transmigrate). But of a man who has no craving—who is without desires,[5] whom desires have left, whose objects of desire have been realised, whose only object of desire is the Self—the organs do not go out. (Ever) being Brahman Itself, he is merged in Brahman.[6]

[[1] The mind is equated with the subtle body, since it is its principal part. The word 'Liṅga' also means an index; the mind is so designated, because it indicates the self, and through it the self is realised.

[2] Attachment of the mind to results is the cause of an action, and of consequent transmigration.

[3] That is, exhausting its results.

[4] Which is *the* place for work.

[5] Among these four epithets, each succeeding item is the cause of the preceding one.

[6] Liberation is not a thing to be attained through action etc. It is eternally there, being the very essence of the self. For a man of realisation there is no going or coming nor taking a new body. This is what is meant by mergence in Brahman.

तदेष श्लोको भवति ।

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥

तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत, एवमेवेदं शरीरं शेते, अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव; सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥ ७ ॥

तत् On this (theme) एष: this श्लोक: Mantra verse भवति there is : अस्य हृदि In his heart (intellect or mind) ये which कामा: desires श्रिताः abide, सर्वे (they) all यदा when प्रमुच्यन्ते have totally left, अथ then मर्त्य: the mortal (man) अमृत: immortal भवति becomes, अत्र here (in this very body) ब्रह्म Brahman समश्नुते realises इति ; तत् यथा just as मृता lifeless

अहि-निर्ल्वयनी the slough of a snake वल्मीके in the ant-hill प्रत्यस्ता (being) cast off शयीत lies, एवम् एव even so इदम् this शरीरम् body शेते lies; अथ then अयम् this (self) अशरीरः (becomes) disembodied अमृतः immortal प्राणः Prāṇa (the Supreme Self) ब्रह्म Brahman एव itself तेजः the light (of Intelligence) एव itself; जनकः Janaka वैदेहः Emperor of Videha उवाच ह said, सः that अहम् I भगवते to your reverence सहस्रम् a thousand (cows) ददामि give इति.

7. 'On this theme there is the following Mantra verse: "When all the desires that abide in the intellect of a man have totally left, then the mortal man becomes immortal[1] and realises Brahman in this very body."[2] Just as the lifeless slough of a snake lies, cast off in the ant-hill (etc.), even so lies this body.[3] Then the self becomes disembodied[4] and immortal, the Supreme Self, Brahman, the Light of Pure Intelligence.' Emperor Janaka of Videha said, 'For this I give you a thousand (cows), venerable sir'.

[[1] Desires are but forms of death. Hence on their cessation together with their root (ignorance) immortality is attained.

[2] Liberation, therefore, does not require going to any world and so on.

[3] Discarded as non-self.

[4] No longer identifies itself with the body, although living in it.]

तदेते श्लोका भवन्ति ।

अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव ।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥

तत् Regarding this एते these श्लोकाः Mantra verses भवन्ति there are : अणुः Subtle, difficult of comprehension विततः extensive पुराणः ancient पन्थाः path माम् me स्पृष्टः is in contact with, मया by me एव alone अनुवित्तः realised ; धीराः illumined ब्रह्मविदः knowers of Brahman तेन by that (way) विमुक्ताः (being) emancipated इतः ऊर्ध्वम् after (release from) this (body) स्वर्गं लोकम् the realm of heaven (liberation) अपियन्ति reach.

8. 'Regarding this there are these Mantra verses:

"The subtle,[1] outstretched,[2] ancient,[3] path[4] is in contact with me.[5] (Nay) I have realised[6] it myself.[7] By that way, illumined knowers of Brahman becoming emancipated (in this very life), reach the realm of liberation after release from the body.

[[1] The Mādhyandina reading is 'Vitara', which means 'effectively leading (to liberation)'.

[2] Because it relates to the infinite Brahman.

[3] Because it is revealed by the Vedas, which are eternal.

[4] The path of knowledge leading to liberation.

[5] That is, I have reached it.

[6] Attained it to its furthest limit, which is a sense of complete blessedness.

[7] This emphasis only means that realisation is an experience which requires no other testimony except one's own. But it is accessible to all qualified persons.]

तस्मिञ्छुक्लमुत नीलमाहुः
पिङ्गलं हरितं लोहितं च ।
एष पन्था ब्रह्मणा हानुवित्तः
तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ ९ ॥

तस्मिन् Of it आहुः (some) speak शुक्लम् as white उत or नीलम् as blue पिङ्गलम् as grey हरितम् as green लोहितम् as red च and; एषः ह this पन्था path (of knowledge) ब्रह्मणा by a Brāhmaṇa identified with Brahman अनुवित्तः (is) realised, पुण्यकृत् a doer of good deeds ब्रह्मवित् who is a knower of Brahman तैजसः who is one with the Supreme Light च and तेन by that (path) एति (also) travels.

9. "Some speak of it as white, or blue, or grey, or green or red.[1] This way is realised

by a knower of Brahman. Any other person who has done good deeds, has become a knower of Brahman,[2] and is one with the Supreme Light, also travels by this path.

[[1] They are wrong, for the path of knowledge can have no colour. The colours experienced by seekers are really those of Suṣumnā and other nerves referred to in IV. III. 20. Or they may be thinking of the variegated sun, described in *Chā. U.*, VIII. VI. 1, as that path.

[2] After giving up all desires.]

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥ १० ॥

ये Who अविद्याम् ignorance (rites) उपासते adore अन्धम् blinding तमः darkness प्रविशन्ति (they) enter; ये who उ again विद्यायाम् to knowledge, to ritual meditation रताः are attached ते they (enter) ततः than that भूयः greater तमः darkness इव as it were.

10. "Those who adore ignorance (rites[1]) enter blinding darkness. And those that are attached to (ritual) meditation[2] enter into greater darkness, as it were.[3]

[[1] Which are the outcome of ignorance.

[2] Meditation relating to the ceremonial portion of the Vedas only, that deals with injunctions and prohibitions

alone, denying the knowledge of Brahman inculcated in the Upaniṣads.

[3] This verse also occurs in *Īśa. U.* 9.]

अनन्दा नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः ॥ ११ ॥

अनन्दाः Cheerless नाम known as ते (there are) those लोकाः worlds अन्धेन तमसा by blinding darkness आवृताः covered; (ये who) अविद्वांसः (are) ignorant अबुधः (and) devoid of (Self-) knowledge जनाः people ते they प्रेत्य dying तान् to them अभिगच्छन्ति go.

11. "There are those worlds known as cheerless, which are covered with blinding darkness. People who are ignorant and devoid of (Self-) knowledge go to them after death.

[Compare *Īśa. U.* 3.]

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ १२ ॥

पूरुषः A man आत्मानम् the Supreme Self अयम् It अस्मि (I) am इति thus विजानीयात् knows चेत् if, किम् what इच्छन् desiring कस्य of whom कामाय for the purpose शरीरम् the body अनुसंज्वरेत् will (he) be afflicted in the wake of.

12. "If a man knows the Self as 'I am It', then desiring what[1] and for whose sake[2] will he be afflicted in the wake of the body?[3]

[[1] What object distinct from himself to be desired, he being all.

[2] For what person other than himself.

[3] Be affected by the troubles that pertain only to the body, from which he has completely dissociated himself.]

यस्यानुवित्तः प्रतिबुद्ध आत्मा-
स्मिन्सन्देह्ये गहने प्रविष्टः ।
स विश्वकृत् स हि सर्वस्य कर्ता
तस्य लोकः स उ लोक एव ॥ १३ ॥

अस्मिन् In this सन्देह्ये dangerous गहने inaccessible (body) प्रविष्टः (that) has penetrated आत्मा the Self यस्य by whom अनुवित्तः has been realised प्रतिबुद्धः (and) intimately known, सः he विश्वकृत् (is) the maker of the universe, सः he हि for सर्वस्य of all कर्ता (is) the maker, तस्य (all is) his लोकः Self, सः he उ again लोकः एव (is) the very Self (of all).

13. "He who has realised and intimately known the Supreme Self that has penetrated this dangerous and inaccessible[1] place (the body), is the maker of the universe.[2] For he is the maker of all, (all) is his Self, and he again is the very Self (of all).

[[1] Resisting discrimination in various ways.

[2] That is, perfectly satisfied with his achievement.]

इहैव सन्तोऽथ विद्मस्तद्वयम्
न चेदवेदिर्महती विनष्टिः ।
ये तद्विदुरमृतास्ते भवन्ति
अथेतरे दुःखमेवापियन्ति ॥ १४ ॥

इह In this (body) एव indeed सन्तः being अथ somehow वयम् we तत् It (Brahman) विद्मः have realised ; न चेत् if not, अवेदिः (I should have been) ignorant, महती great विनष्टिः havoc (and there would have been) ; ये who तत् It विदुः know ते those अमृताः immortal भवन्ति become, अथ while इतरे others दुःखम् misery एव alone अपियन्ति suffer.

14. "Being in this very body, we have somehow realised Brahman. Otherwise, (I should have been) ignorant, and (there would have been) great havoc. Those who know It become immortal, while others only suffer misery.

यदैतमनुपश्यत्यात्मानं देवमञ्जसा ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ १५ ॥

यदा When एतम् this देवम् effulgent, or dispensing (results) भूत-भव्यस्य of all that has been and will be ईशानम् the lord आत्मानम् Self अञ्जसा directly अनुपश्यति (one) sees according to (the instructions of a teacher), ततः from that, or thereafter न not विजुगुप्सते (he) wishes to hide (himself), or to criticise (others).

15. "When a man, according to (the instructions of a teacher), directly sees this effulgent[1] Self, the Lord of what has been and will be,[2] he no longer desires[3] particularly to hide[4] himself from It.

[[1] Or it may mean, 'That dispenses the results of actions'.

[2] That is, of the past, present and future.

[3] Because he is above fear.

[4] For not having acted up to the Scriptures. Or the meaning may be, 'to criticise others—because he sees all as his Self'.]

यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते ।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥ १६ ॥

यस्मात् अर्वाक् Beneath which संवत्सर: the year अहोभि: with (its) days परिवर्तते revolves, तत् that अमृतम् immortal ज्योतिषाम् of all luminaries ज्योति: the light देवा: the gods आयु: as longevity उपासते meditate upon.

16. "Beneath[1] which the year[2] with its days (and nights) revolves, upon that immortal Light of all lights the gods meditate as longevity.[3]

[[1] In a lower sphere, being unable to limit It.

[2] Representing time which limits everything that is born.

[2] Therefore he who desires long life should meditate upon It as such.]

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।
तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥

यस्मिन् On which पञ्च five पञ्चजनाः aggregates आकाशः the (unmanifested) ether च and प्रतिष्ठितः rest, तम् that आत्मानम् Self एव alone अमृतम् (to be) the immortal ब्रह्म Brahman मन्ये (I) believe ; विद्वान् knowing (It) अमृतः (I am) immortal.

17. "I believe that Self alone to be the immortal Brahman, on which the five aggregates[1] and the (unmanifested) ether[2] rest. Knowing (It) I am immortal.

[[1] The gods, manes, celestial minstrels, demons and Rākṣasas; or Brāhmaṇas, Kṣatriyas, Vais'yas, S'ūdras and Niṣādas; or the vital force, eye, ear, food (or light) and mind.

[2] By which the Sūtra or Hiraṇyagarbha is pervaded (III. VIII. 11).]

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत
श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः ।
ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥

ये Who प्राणस्य of the vital force प्राणम् the vital force उत and चक्षुषः of the eye चक्षुः the eye उत and श्रोत्रस्य of the

ear श्रोत्रम् the ear मनसः of the mind मनः the mind विदुः have known, ते they पुराणम् eternal अग्र्यम् primordial ब्रह्म Brahman निचिक्युः have realised with certainty.

18. "Those who have known[1] the vital force[2] of the vital force, the eye of the eye, the ear of the ear and the mind of the mind, have realised with certainty the eternal, primordial Brahman.[3]

[[1] Through inference. The organs, though inert, function because of the conscious self, which uses them as instruments. From this the existence of the inmost self is inferred.

[2] Because the vital force functions by the light of the self. So with the rest.

[3] Because the self is identical with Brahman.]

मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १९॥

मनसा Through the mind एव alone अनुद्रष्टव्यम् (Brahman) is to be known according to (the instructions of a teacher), इह in It नाना diverse किञ्चन anything न not अस्ति there is; यः who इह in It नाना (anything) diverse इव as it were पश्यति sees सः he मृत्योः from death मृत्युम् to death आप्नोति goes.

19. "Brahman is to be known by the mind in accordance with (the instructions of a

teacher). There is no diversity whatsoever[1] in it.[2] He who sees diversity, as it were, in It, goes from death to death.

[[1] Diversity due to things of the same group or of different groups as well as internally.

[2] Whatever diversity is perceived in It is only apparent, being superposed on It by ignorance.]

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ।
विरजः पर आकाशादज आत्मा महान्ध्रुवः ॥ २० ॥

एतत् It एकधा as one or homogeneous एव only अनुद्रष्टव्यम् is to be realised according to (the instructions of a teacher), अप्रमयम् (being) unknowable ध्रुवम् (and) unchangeable; आत्मा the self विरजः (is) free from impurities (good and evil) आकाशात् to (unmanifested) ether परः superior अजः unborn महान् infinite ध्रुवः (and) indestructible.

20. "It is to be realised in accordance with (the instructions of a teacher) only as homogeneous,[1] (for) It is unknowable,[2] unchangeable and free from impurities. The Self is superior to the (unmanifested) ether, unborn,[3] infinite and indestructible.

[[1] As Pure Intelligence.

[2] Through means such as perception and inference. But It can be known from the Upaniṣads, and that too

not by any positive attributes, but by the negation of all finite attributes.

[3] That is, devoid of birth, existence, growth, change, decay and death.]

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लापनं
हि तत् ॥ इति ॥ २१ ॥

धीरः The intelligent ब्राह्मणः seeker of Brahman तम् about It (the Self) एव alone विज्ञाय knowing प्रज्ञाम् realisation कुर्वीत should strive for; बहून् many शब्दान् words न not अनुध्यायात् (he) should reflect on, तत् it हि for वाचः to the vocal organ विग्लापनम् (is) exhausting इति.

21. "The intelligent seeker of Brahman, after knowing[1] about the Self alone, should strive for realisation.[2] He should not reflect on many words,[3] for it is exhausting to the vocal organ."

[[1] From a teacher and the Scriptures.

[2] That is, practise renunciation, calmness, self-control, withdrawal of the senses, fortitude and concentration.

[3] Only a few words bringing home the identity of the self and Brahman should be pondered on. Witness *Mu. U.* II. II. 6, 'Meditate on the Self by repeating Om'.]

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते, सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः; स न साधुना कर्मणा भूयान्, नो एवासाधुना कनीयान्; एष सर्वेश्वरः; एष भूताधिपतिः, एष भूतपालः, एष सेतुर्विधरण एषां लोकानामसम्भेदाय; तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन; एतमेव विदित्वा मुनिर्भवति। एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति। एतद्ध स्म वै तत् पूर्वे विद्वांसः प्रजां न कामयन्ते, किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति; ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति; या ह्येव पुत्रैषणा सा वित्तैषणा, या वित्तैषणा सा लोकैषणा, उभे ह्येते एषणे एव भवतः। स एष नेति नेत्यात्मा, अगृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यते, असङ्गो न हि सज्यते, असितो न व्यथते, न रिष्यति; एतमु हैवैते न तरत इति—अतः पापमकरवमिति, अतः कल्याणमकरवमिति; उभे उ हैवैष एते तरति, नैनं कृताकृते तपतः ॥ २२ ॥

सः That वै verily एषः this महान् infinite अजः birthless आत्मा self (previously described as the entity) यः अयम्

this which विज्ञानमयः (is) reflected in the intellect प्राणेषु (and is) amid the organs, यः which (is) एषः this अन्तः-हृदये within the heart आकाशः the Supreme Self तस्मिन् in that शेते lies; सर्वस्य of all वशी the controller सर्वस्य of all ईशानः the lord सर्वस्य of all अधिपतिः the ruler; सः It साधुना कर्मणा by good work न not भूयान् (is) magnified, असाधुना by evil (work) नो nor एव in the least कनीयान् (is) degraded; एषः It सर्व-ईश्वरः (is) the lord of all, एषः It भूतपालः (is) the protector of beings, एषां लोकानाम् of these worlds असम्भेदाय for keeping distinct from one another एषः It विधरणः (is) demarcating सेतुः bank; तम् that एतम् this (Self) ब्राह्मणाः the seekers of Brahman वेद-अनुवचनेन through regular reading of the Vedas यज्ञेन through sacrifices दानेन through charity अनाशकेन not leading to death तपसा through austerity विविदिषन्ति wish to realise; एतम् It एव alone विदित्वा knowing मुनिः a man of meditation भवति (one) becomes; प्रव्राजिनः monks एतम् this एव very लोकम् world (result) इच्छन्तः seeking प्रव्रजन्ति give up (their) homes; तत् (the reason for) that एतत् (is) this: पूर्वे The ancient विद्वांसः knowers (of the Self) प्रजाम् progeny ह वै verily न not कामयन्ते स्म desired, येषां नः we to whom अयम् this लोकः world (result) अयम् this आत्मा self (belongs), प्रजया with progeny किम् what करिष्यामः shall (we) do इति (thinking) this; ते ह they . . . चरन्ति स्म took up; या हि . . . भवतः (as in III. v. 1). सः एषः . . . रिष्यति (As in IV. ii. 4); अतः for this पापम् an evil act अकरवम् (I) did इति, अतः for this पुण्यम् a good act अकरवम् (I) did इति एते these two (thoughts) एतम् him न not उ ह एव indeed तरतः overtake — इति this

(is appropriate); एनः he एते these उभे उ ह both तरति एव goes beyond, कृत-अकृते (regular work) done or omitted एनम् him न not तपतः afflict.

22. 'That infinite, birthless self (previously described as the entity) which is reflected in the intellect and is amid the organs,[1] lies in the Supreme Self that is within the heart.[2] It[3] is the controller of all, the lord of all, the ruler of all. It is not magnified by good work nor degraded in the least by evil work.[4] It is the lord of all, the ruler of beings, the protector of beings. It is the demarcating bank for keeping these worlds distinct from one another. The seekers of Brahman wish to realise It through regular reading of the Vedas, sacrifices, charity and austerity not leading to death.[5] Knowing It alone one becomes a man of meditation. Seeking this world (of the Self) alone[6] monks give up their homes. (The reason) for this is this: The ancient knowers, it is said, did not desire progeny,[7] thinking, "What shall we do with progeny—we who have realised this world, this Self?" Giving up the desire for sons, for wealth and for worlds, they took up a wandering mendicant's

life. Since that which is the desire for sons is the desire for wealth, and that which is the desire for wealth is the desire for worlds, for both these are but desires. This self is That which has been described as "Not this, not this". It is imperceptible, for It is not perceived; unshrinking, for It does not shrink; unattached, for It is not attached; untrammelled—It does not suffer nor perish. (It is appropriate that) the knower is never overtaken by these two thoughts, "For this[8] I did an evil act", and "For this[9] I did a good act". He goes beyond both these. (Regular work) done or omitted does not afflict him.

[[1] As the individual self. See IV. III. 7.

[2] In deep sleep. See II. I. 17.

[3] As identified with Brahman as a result of Self-realisation.

[4] Good and evil work is that enjoined and forbidden, respectively, by the Scriptures. The self is not connected with any work, and therefore acquires no merit or demerit by its performance.

[5] That is, moderation in living, not total abstinence or too hard penances. The four activities enumerated here stand for all the regular rites, which too indirectly lead to Self-knowledge, and therefore liberation, by purifying the mind. So the entire Vedas, with the

exception of the portion dealing with optional rites, have the same end in view.

[6] Not the three external worlds mentioned in I. v. 16.

[7] So seekers of today also should do the same. 'Progeny' is suggestive of rites and meditation also.

[8] For maintaining the body, for example.

[9] With a view to attaining its results.]

तदेतदृचाभ्युक्तम् ।

एष नित्यो महिमा ब्राह्मणस्य
न वर्धते कर्मणा नो कनीयान् ।
तस्यैव स्यात्पदवित् तं विदित्वा
न लिप्यते कर्मणा पापकेन ॥ इति ।

तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति, सर्वमात्मानं पश्यति; नैनं पाप्मा तरति, सर्वं पाप्मानं तरति; नैनं पाप्मा तपति, सर्वं पाप्मानं तपति; विपापो विरजोऽविचिकित्सो ब्राह्मणो भवति; एष ब्रह्मलोकः सम्राट्, एनं प्रापितोऽसीति होवाच याज्ञवल्क्यः; सोऽहं भगवते विदेहान् ददामि, मां चापि सह दास्यायेति ॥ २३ ॥

तत् एतत् This same thing ऋचा by the Mantra hymn अभ्युक्तम् is stated: ब्राह्मणस्य of a knower of Brahman एषः this (is) नित्यः eternal महिमा glory; कर्मणा on account of

work न neither वर्धते (it) increases न nor कनीयान् decreases; तस्य of that (glory) एव alone पदवित् a knower of the nature स्यात् (one) should be; तम् It विदित्वा knowing पापकेन कर्मणा by evil work न not लिप्यते (one) is affected इति; तस्मात् therefore एवंवित् one who knows as above शान्तः self-controlled दान्तः serene उपरतः free from desires तितिक्षुः possessed of fortitude समाहितः concentrated भूत्वा becoming आत्मनि एव in his own self (body) आत्मानम् the Self पश्यति sees, सर्वम् everything आत्मानम् as the Self पश्यति (he) sees; पाप्मा evil एनम् him न not तरति overtakes, सर्वम् all पाप्मानम् evil तरति (rather he) goes beyond; पाप्मा evil एनम् him न not तपति afflicts, सर्वम् all पाप्मानम् evil तपति (he) burns; विपापः free from evils विरजः free from impurities (desires) अविचिकित्सः free from doubts ब्राह्मणः (and) a true Brāhmaṇa (knower of Brahman) भवति (he) becomes; सम्राट् O Emperor एषः this ब्रह्मलोकः (is) the world that is Brahman, एनम् It प्रापितः helped to attain असि (you) are इति so याज्ञवल्क्यः Yājñavalkya उवाच ह said; सः that अहम् I भगवते to your reverence विदेहान् the dominion of Videha ददामि give, माम् myself च and अपि too सह with (it) दास्याय for (your) service इति.

23. 'This has been stated by this Mantra hymn: "This[1] is the eternal[2] glory of a knower of Brahman, (for) it neither increases nor decreases on account of work. (Hence) one should know the nature of that glory alone. Knowing it one is not affected by evil

work."[3] Therefore one who knows as above becomes self-controlled, serene, free from desires, possessed of fortitude and concentrated, and sees the Supreme Self in his own self (body); he sees everything as the Self. Evil does not overtake him; (rather) he goes beyond all evil. Evil does not afflict him; (rather) he burns all evil. He becomes free from evils, desires and doubts, and a (true) Brāhmaṇa (a knower of Brahman). This is the world that is Brahman, O Emperor, and you have been helped to It', said Yājñavalkya. (Janaka replied), 'Venerable sir, I give you the dominion of Videha, and myself too with it for your service'.

[[1] What is expressed in the sentence, 'This self is That' etc. in the preceding paragraph.

[2] Being natural, not due to work.

[3] It includes good work, which too is evil in the eyes of a seer. So also elsewhere in this paragraph.]

स वा एष महानज आत्मान्नादो वसुदानः; विन्दते वसु य एवं वेद ॥ २४ ॥

सः Same वै very एषः this महान् infinite अजः birthless आत्मा Self अन्न-अदः (is) the eater of (all) foods वसु-दानः (and) the bestower of wealth (the results of work); यः

who एवम् as above वेद knows (It) वसु wealth (the results of work) विन्दते (he) obtains.

24. That infinite, birthless self is the eater of all foods[1] and the bestower of the results of work. He who knows (It) as above obtains the results of (everybody's) work.[2]

[[1] By dwelling in all beings.
[2] As also eats all foods.]

स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म; अभयं वै ब्रह्म; अभयं हि वै ब्रह्म भवति य एवं वेद ॥२५॥ इति चतुर्थं ब्राह्मणम् ॥

सः वै एषः महान् अजः (As before) अजरः undecaying अमरः indestructible अमृतः immortal अभयः fearless आत्मा Self ब्रह्म (is) Brahman; ब्रह्म Brahman वै indeed अभयम् (is) devoid of fear; यः who एवम् as above वेद knows (It) अभयम् the fearless ब्रह्म Brahman हि वै indeed भवति (he) becomes.

25. That infinite, birthless, undecaying, indestructible,[1] immortal and fearless[2] self is Brahman. Brahman is indeed fearless. He who knows (the Self) as above indeed becomes the fearless Brahman.

[This paragraph sums up the gist of the whole Upaniṣad.

[1] Because It is birthless and undecaying.

[2] Because It is free from all modifications and their effects, in short, beyond nescience.]

SECTION FIVE

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः—मैत्रेयी च कात्यायनी च; तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव, स्त्रीप्रज्ञैव तर्हि कात्यायनी; अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥

अथ Now ह it is said याज्ञवल्क्यस्य of Yājñavalkya द्वे two भार्ये wives बभूवतुः there were—मैत्रेयी च Maitreyī कात्यायनी Kātyāyanī च and; तयोः of these two मैत्रेयी Maitreyī ब्रह्मवादिनी in the habit of discussing Brahman बभूव ह was; तर्हि then कात्यायनी Kātyāyanī स्त्री-प्रज्ञा (was) possessed of feminine views एव only; अथ ह one day याज्ञवल्क्यः Yājñavalkya अन्यत् another (the monastic) वृत्तम् life उपाकरिष्यन् wishing to embrace—

1. Yājñavalkya, it is said, had two wives, Maitreyī and Kātyāyanī. Of these, Maitreyī was in the habit of discussing Brahman, but Kātyāyanī then held only feminine views. One day Yājñavalkya wishing to embrace another kind of life—

मैत्रेयीति होवाच याज्ञवल्क्यः, प्रव्रजिष्यन्वा अरेऽह-मस्मात्स्थानादस्मि, हन्त तेऽनया कात्यायन्यान्तं कर-वाणीति ॥ २ ॥

याज्ञवल्क्यः Yājñavalkya उवाच ह said, अरे my dear मैत्रेयि Maitreyī इति this, अहम् I अस्मात् स्थानात् from this life प्रव्रजिष्यन् वै going to take up monasticism अस्मि am, हन्त . . . इति (see II. iv. 1).

2. 'Maitreyī', said Yājñavalkya, 'I am going to take up monasticism forthwith, leaving this (householder's) life, my dear. Well, let me end your relationship with Kātyāyanī.'

सा होवाच मैत्रेयी, यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्, स्यां न्वहं तेनामृताहो३ नेति; नेति होवाच याज्ञवल्क्यः, यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात्, अमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ३ ॥

तेन By it अहम् I अमृता immortal स्यां नु shall become आहो or न not इति. (Rest as in II. iv. 2.)

3. At this Maitreyī said, 'Even if this whole earth replete with wealth be mine, venerable sir, shall I become immortal by it

or not?' 'No', said Yājñavalkya, 'your life will be exactly like that of people well provided with materials, but there is no prospect of immortality through wealth.'

सा होवाच मैत्रेयी, येनाहं नामृता स्यां किमहं तेन कुर्याम्? यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ४ ॥

(See II. iv. 3.)

4. Maitreyī replied, 'What shall I do with that through which I cannot be immortal? Tell me, venerable sir, of that alone which you know (to be the means of immortality)'.

स होवाच याज्ञवल्क्यः, प्रिया वै खलु नो भवती सती प्रियमवृधत्, हन्त तर्हि भवत्येतद्व्याख्यास्यामि ते, व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥

सः That याज्ञवल्क्यः Yājñavalkya उवाच ह said, भवती you नः to me प्रिया dear वै खलु indeed सती having been प्रियम् (what is) dear (to me) अवृधत् have (now) increased; हन्त if you wish तर्हि then भवति madam एतत् it ते to you व्याख्यास्यामि (I) shall explain; व्याचक्षाणस्य तु मे while I explain (it) निदिध्यासस्व concentrate (upon it) इति।

5. Yājñavalkya said, 'You have indeed (always) been dear to me, and now you have

increased what is dear to me. If you wish, my dear, I shall explain it to you. But while I explain it, please concentrate upon it'.

स होवाच, न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवति, आत्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति, आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति, आत्मनस्तु कामाय वित्तं प्रियं भवति। न वा अरे पशूनां कामाय पशवः प्रिया भवन्ति, आत्मनस्तु कामाय पशवः प्रिया भवन्ति। न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति, आत्मनस्तु कामाय ब्रह्म प्रियं भवति। न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति, आत्मनस्तु कामाय क्षत्रं प्रियं भवति। न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति, आत्मनस्तु कामाय लोकाः प्रिया भवन्ति। न वा अरे देवानां कामाय देवाः प्रिया भवन्ति, आत्मनस्तु कामाय देवाः प्रिया भवन्ति। न वा अरे वेदानां कामाय वेदाः प्रिया भवन्ति, आत्मनस्तु कामाय वेदाः प्रिया भवन्ति। न वा अरे भूतानां

कामाय भूतानि प्रियाणि भवन्ति, आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः—श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि; आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् ॥ ६ ॥

पशूनाम् Of animals, पशवः animals ; वेदानाम् of the Vedas, वेदाः the Vedas ; अरे my dear आत्मनि the Self खलु indeed दृष्टे being realised श्रुते (by) being heard of मते (by) being reflected on विज्ञाते (and by) being meditated upon इदम् this सर्वम् all विदितम् is known. (Rest as in II. IV. 5.)

6. Yājñavalkya said, 'Verily the husband is dear (to the wife) not for the sake of the husband, my dear, but it is for her own sake that he is dear. Verily the wife is dear (to the husband) not for the sake of the wife, my dear, but it is for his own sake that she is dear. Verily sons are dear (to parents) not for the sake of sons, my dear, but it is for the sake of parents that they are dear. Verily wealth is dear not for the sake of wealth, my dear, but it is for one's own sake that it is dear. Verily animals are dear not for the sake of animals,

my dear, but it is for one's own sake that they are dear. Verily the Brāhmaṇa is dear not for the sake of the Brāhmaṇa, my dear, but it is for one's own sake that he is dear. Verily the Kṣatriya is dear not for the sake of the Kṣatriya, my dear, but it is for one's own sake that he is dear. Verily worlds are dear not for the sake of worlds, my dear, but it is for one's own sake that they are dear. Verily the gods are dear not for the sake of the gods, my dear, but it is for one's own sake that they are dear. Verily the Vedas are dear not for the sake of the Vedas, my dear, but it is for one's own sake that they are dear. Verily beings are dear not for the sake of beings, my dear, but it is for one's own sake that they are dear. Verily all is dear not for the sake of all, my dear, but for one's own sake that all is dear. The Self, my dear Maitreyī, should verily be realised: should be heard of, reflected on and meditated upon. When only the Self, my dear, is realised by being heard of, reflected on and meditated upon, all this is known.

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं तं परा-
दाद्योऽन्यत्रात्मनः क्षत्रं वेद, लोकास्तं परादुर्योऽन्यत्रात्मनो

लोकान्वेद, देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद, वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान्वेद, भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद; इदं ब्रह्म, इदं क्षत्रम्, इमे लोकाः, इमे देवाः, इमे वेदाः, इमानि भूतानि, इदं सर्वं यदयमात्मा ॥ ७ ॥

वेदाः The Vedas, वेदान् the Vedas. (Rest as in II. iv. 6.)

7. 'The Brāhmaṇa rejects him who knows the Brāhmaṇa to be different from the Self. The Kṣatriya rejects him who knows the Kṣatriya to be different from the Self. Worlds reject him who knows worlds to be different from the Self. The gods reject him who knows the gods to be different from the Self. The Vedas reject him who knows the Vedas to be different from the Self. Beings reject him who knows beings to be different from the Self. All rejects him who knows all to be different from the Self. This Brāhmaṇa, this Kṣatriya, these worlds, these gods, these Vedas, these beings and this all are only the Self.

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय, दुन्दुभेस्तु ग्रहणेन — दुन्दुभ्याघातस्य वा — शब्दो गृहीतः ॥ ८ ॥

(See II. iv. 7.)

8. 'As one is not able to grasp by themselves the particular notes of a drum that is being beaten, but it is only by grasping the general note of the drum, or the general effect of particular strokes on it, that those notes are grasped;

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय, शङ्खस्य तु ग्रहणेन—शङ्खध्मस्य वा—शब्दो गृहीतः ॥ ९ ॥

(See II. iv. 8.)

9. 'As one is not able to grasp by themselves the particular notes of a conch that is being blown, but it is only by grasping the general note of the conch, or the general effect of particular blowings on it, that those notes are grasped;

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय, वीणायै तु ग्रहणेन—वीणावादस्य वा—शब्दो गृहीतः ॥ १० ॥

(See II. iv. 9.)

10. 'As one is not able to grasp by themselves the particular notes of a lute that is

being played on, but it is only by grasping the general note of the lute, or the general effect of particular playings on it, that those notes are grasped;

स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्ति, एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितम्, अयं च लोकः, परश्च लोकः, सर्वाणि च भूतानि; अस्यैवैतानि सर्वाणि निःश्वसितानि ॥ ११ ॥

इष्टम् Sacrifices हुतम् oblations in the fire आशितम् food पायितम् drink अयं च this लोकः world परः च the next लोकः world सर्वाणि all भूतानि beings च and ; सर्वाणि all. (Rest as in II. iv. 10.)

11. 'As various kinds of smoke proceed from fire kindled with damp fuel, even so, my dear (Maitreyī), the *Ṛg-Veda*, *Yajur-Veda*, *Sāma-Veda*, *Atharvāṅgirasa*, history, mythology, arts, Upaniṣads, Mantra verses, aphorisms, elucidations, explanations, sacrifices, oblations in the fire, food, drink, this life, the next life and all beings are the breath (as it were) of this limitless Reality. These are all (like) the breath of It alone.

स यथा सर्वासामपां समुद्र एकायनम्, एवं सर्वेषां स्पर्शानां त्वगेकायनम्, एवं सर्वेषां गन्धानां नासिके एकायनम्, एवं सर्वेषां रसानां जिह्वैकायनम्, एवं सर्वेषां रूपाणां चक्षुरेकायनम्, एवं सर्वेषां शब्दानां श्रोत्रमेकायनम्, एवं सर्वेषां सङ्कल्पानां मन एकायनम्, एवं सर्वासां विद्यानां हृदयमेकायनम्, एवं सर्वेषां कर्मणां हस्तावेकायनम्, एवं सर्वेषामानन्दानामुपस्थ एकायनम्, एवं सर्वेषां विसर्गाणां पायुरेकायनम्, एवं सर्वेषामध्वनां पादावेकायनम्, एवं सर्वेषां वेदानां वागेकायनम् ॥ १२ ॥

(See II. iv. 11.)

12. 'As the sea is the one merging place of all sorts of water, as the skin is the one merging place of all kinds of touch, as the nostrils are the one merging place of all odours, as the tongue is the one merging place of all savours, as the eye is the one merging place of all colours, as the ear is the one merging place of all sounds, as the mind is the one merging place of all deliberations, as the intellect is the one merging place of all kinds of knowledge, as the hands are the one merging place of all actions, as the organ of

generation is the one merging place of all pleasures, as the anus is the one merging place of all excretions, as the feet are the one merging place of all kinds of walking, as the organ of speech is the one merging place of all Vedas.

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव, एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव; एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १३ ॥

सः यथा As सैन्धवघनः a lump of salt अनन्तरः (is) without inside अबाह्यः without outside कृत्स्नः complete रसघनः a mass of taste, homogeneous एव only, अरे my dear एवं वै even so अयम् this आत्मा self अनन्तरः अबाह्यः कृत्स्नः प्रज्ञानघनः a mass of conciousness एव only. (Rest as in II. IV. 12.)

13. 'As a lump of salt has neither inside nor outside and is but a homogeneous mass of taste, even so this self, my dear, has neither inside nor outside and is but a homogeneous mass of consciousness throughout. On account of these elements, (the self) stands out (separately), and as soon as these are destroyed, (its separate existence) is also destroyed.

After attaining (isolation) it has no (particular) consciousness. This is what I say, my dear', so said Yājñavalkya.

सा होवाच मैत्रेयी, अत्रैव मा भगवान्मोहान्तमापीपिपत्, न वा अहमिमं विजानामीति; स होवाच, न वा अरेऽहं मोहं ब्रवीमि, अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा ॥ १४ ॥

सा That मैत्रेयी Maitreyī उवाच ह said, अत्र here एव just भगवान् your reverence मा me मोहान्तम् into the midst of confusion आपीपिपत् have thrown, अहम् I इमम् it (the self) न not वै at all विजानामि understand इति; सः he उवाच ह said, अरे my dear अहम् I न not वै of course मोहम् anything confusing ब्रवीमि am saying, अरे my dear अयम् this आत्मा self (is) वै indeed अविनाशी (here) unchangeable अनुच्छित्तिधर्मा of indestructible nature.

14. Maitreyī said, 'Just here,[1] venerable sir, you have thrown me into the midst of confusion. I do not at all understand it'.[2] Yājñavalkya replied, 'Of course, I am not saying anything confusing, my dear. This self, my dear, is indeed unchangeable and indestructible.

[[1] By saying that the self, which is homogeneous consciousness, has no consciousness.

[2] How it loses consciousness when it is free from the body and organs.]

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, तदितर इतरं जिघ्रति, तदितर इतरं रसयते, तदितर इतरमभिवदति, तदितर इतरं शृणोति, तदितर इतरं मनुते, तदितर इतरं स्पृशति, तदितर इतरं विजानाति; यत्र त्वस्य सर्वमात्मैवाभूत्, तत्केन कं पश्येत्, तत्केन कं जिघ्रेत्, तत्केन कं रसयेत्, तत्केन कमभिवदेत्, तत्केन कं शृणुयात्, तत्केन कं मन्वीत, तत्केन कं स्पृशेत्, तत्केन कं विजानीयात्? येनेदं सर्वं विजानाति तं केन विजानीयात्? स एष नेति नेत्यात्मा, अगृह्यो न हि गृह्यते, अशीर्यो न हि शीर्यते, असङ्गो न हि सज्जते, असितो न व्यथते, न रिष्यति; विज्ञातारमरे केन विजानीयात्, इत्युक्तानुशासनासि मैत्रेयि, एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥ १५ ॥

इति पञ्चमं ब्राह्मणम् ॥

रसयते Tastes, स्पृशति touches, रसयेत् (one) should taste, स्पृशेत् (one) should touch; सः एषः . . . रिष्यति (as in III. IX. 26); मैत्रेयि Maitreyi इति thus उक्ता-अनुशासना apprised of the instruction असि (you) are, अरे my dear एतावत् this much खलु indeed अमृतत्वम् (is the means of) immortality

इति this उक्त्वा ह saying याज्ञवल्क्यः Yājñavalkya विजहार left home. (For the rest see II. IV. 14.)

15. 'For when there is duality, as it were, then one sees another, one smells another, one tastes another, one speaks of another, one hears another, one thinks of another, one touches another, one knows another. But when all has become the very self of the knower of Brahman, then what should one see and through what, what should one smell and through what, what should one taste and through what, what should one speak of and through what, what should one hear and through what, what should one think of and through what, what should one touch and through what, what should one know and through what? Through what should one know That because of which all this is known? This self is That which has been described as "Not this, not this". It is imperceptible, for It is not perceived; unshrinking, for It does not shrink; unattached, for It is not attached; untrammelled, It does not suffer, nor perish. Through what, my dear, should one know the Knower? Thus you have been given the instruction, Maitreyī. This much[1] is indeed (the means of)

immortality, my dear'. Saying this Yājña-valkya left home.

[[1] Knowledge of the Self, the One without a second.]

SECTION SIX

अथ वंशः—पौतिमाष्यो गौपवनात्, गौपवनः पौतिमाष्यात्, पौतिमाष्यो गौपवनात्, गौपवनः कौशिकात्, कौशिकः कौण्डिन्यात्, कौण्डिन्यः शाण्डिल्यात्, शाण्डिल्यः कौशिकाच्च गौतमाच्च, गौतमः ॥ १ ॥

(See the translation.)

1. Now the line (of teachers): Pautimāṣya (received this knowledge) from Gaupavana, Gaupavana from (another) Pautimāṣya, (this) Pautimāṣya from (another) Gaupavana, (this) Gaupavana from Kaus'ika, Kaus'ika from Kauṇḍinya, Kauṇḍinya from S'āṇḍilya, S'āṇḍilya from Kaus'ika and Gautama, Gautama—

आग्निवेश्यात्, आग्निवेश्यो गार्ग्यात्, गार्ग्यो गार्ग्यात्, गार्ग्यो गौतमात्, गौतमः सैतवात्, सैतवः पाराशर्यायणात्, पाराशर्यायणो गार्ग्यायणात्, गार्ग्यायण उद्दालकायनात्, उद्दालकायनो जाबालायनात्, जाबालायनो माध्यन्दि-

नायनात्, माध्यन्दिनायनः सौकरायणात्, सौकरायणः काषायणात्, काषायणः सायकायनात्, सायकायनः कौशिकायनेः, कौशिकायनिः ॥ २ ॥

(See the translation.)

2. From Āgnives'ya, Āgnives'ya from Gārgya, Gārgya from (another) Gārgya, (this) Gārgya from Gautama, Gautama from Saitava, Saitava from Pārās'aryāyaṇa, Pārās'aryāyaṇa from Gārgyāyaṇa, Gārgyāyaṇa from Uddālakāyana, Uddālakāyana from Jābālāyana, Jābālāyana from Mādhyandināyana, Mādhyandināyana from Saukarāyaṇa, Saukarāyaṇa from Kāṣāyaṇa, Kāṣāyaṇa from Sāyakāyana, Sāyakāyana from Kaus'ikāyani, Kaus'ikāyani—

घृतकौशिकात्, घृतकौशिकः पाराशर्यायणात्, पाराशर्यायणः पाराशर्यात्, पाराशर्यो जातूकर्ण्यात्, जातूकर्ण्य आसुरायणाच्च यास्काच्च, आसुरायणस्त्रैवणेः, त्रैवणिरौपजन्धनेः, औपजन्धनिरासुरेः, आसुरिर्भारद्वाजात्, भारद्वाज आत्रेयात्, आत्रेयो माण्टेः, माण्टिर्गौतमात्, गौतमो गौतमात्, गौतमो वात्स्यात्, वात्स्यः शाण्डिल्यात्, शाण्डिल्यः कैशोर्यात्काप्यात्, कैशोर्यः काप्यः कुमार-

हारितात्, कुमारहारितो गालवात्, गालवो विदर्भी-कौण्डिन्यात्, विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवात्, वत्सनपाद्बाभ्रवः पथः सौभरात्, पन्थाः सौभरोऽयास्यादाङ्गिरसात्, अयास्य आङ्गिरस आभूतेस्त्वाष्ट्रात्, आभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्रात्, विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम्, अश्विनौ दधीच आथर्वणात्, दध्यङ्ङाथर्वणोऽथर्वणो दैवात्, अथर्वा दैवो मृत्योः प्राध्वंसनात्, मृत्युः प्राध्वंसनः प्रध्वंसनात्, प्रध्वंसन एकर्षेः, एकर्षिर्विप्रचित्तेः, विप्रचित्तिर्व्यष्टेः, व्यष्टिः सनारोः, सनारुः सनातनात्, सनातनः सनगात्, सनगः परमेष्ठिनः, परमेष्ठी ब्रह्मणः; ब्रह्म स्वयम्भु, ब्रह्मणे नमः ॥ ३ ॥ इति षष्ठं ब्राह्मणम् ॥ इति चतुर्थोऽध्यायः ॥

(See the translation.)

3. From Ghṛtakaus'ika, Ghṛtakaus'ika from Pārās'aryāyaṇa, Pārās'aryāyaṇa from Pārās'arya, Pārās'arya from Jātūkarṇya, Jātūkarṇya from Āsurāyaṇa and Yāska, Āsurāyaṇa from Traivaṇi, Traivaṇi from Aupajandhani, Aupajandhani from Āsuri, Āsuri from Bhāradvāja, Bhāradvāja from Ātreya, Ātreya from Māṇṭi, Māṇṭi from Gautama, Gautama from (another)

Gautama, (this) Gautama from Vātsya, Vātsya from S'āṇḍilya, S'āṇḍilya from Kais'orya Kāpya, Kais'orya Kāpya from Kumārahārita, Kumārahārita from Gālava, Gālava from Vidarbhīkauṇḍinya, he from Vatsnapāt Bābhrava, he from Pathin Saubhara, he from Ayāsya Āṅgirasa, he from Ābhūti Tvāṣṭra, he from Vis'varūpa Tvāṣṭra, he from the two As'vins, the As'vins from Dadhyac Ātharvaṇa, he from Atharvan Daiva, he from Mṛtyu Prādhvaṁsana, he from Pradhvaṁsana, Pradhvaṁsana from Ekarṣi, Ekarṣi from Vipracitti, Vipracitti from Vyaṣṭi, Vyaṣṭi from Sanāru, Sanāru from Sanātana, Sanātana from Sanaga, Sanaga from Parameṣṭhin (Virāj), Parameṣṭhin from Brahman (Hiraṇyagarbha). Brahman is eternal. Salutation to Brahman.

CHAPTER FIVE

SECTION ONE

ॐ । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ खं ब्रह्म । खं पुराणम् ; वायुरं खमिति ह स्माह कौरव्यायणीपुत्रः ; वेदोऽयं ब्राह्मणा विदुः ; वेदैनेन यद्वेदितव्यम् ॥ १ ॥ इति प्रथमं ब्राह्मणम् ॥

ॐ Om ; अदः That (Brahman) पूर्णम् (is) infinite, इदम् this (universe) पूर्णम् (is) infinite, पूर्णात् from the infinite पूर्णम् the infinite उदच्यते emanates ; पूर्णस्य of the infinite पूर्णम् (here) the infinitude आदाय taking, assimilating पूर्णम् the infinite एव only अवशिष्यते is left.

ॐ Om खं ब्रह्म (is) the ether-Brahman — पुराणम् the eternal खम् ether ; कौरव्यायणीपुत्रः the son of Kauravyāyaṇī आह स्म ह said, वायुरम् containing air खम् the ether इति ; अयम् it (Om) वेदः (is) the means of knowing (or the Vedas) — ब्राह्मणाः the seekers of Brahman विदुः have known ; यत् which वेदितव्यम् (is) to be known एनेन through it वेद (one) knows (that).

1. Om. That (Brahman) is infinite, this (universe) too is infinite.[1] The infinite (universe) emanates from the infinite (Brahman).[1] Assimilating[2] the infinitude of the infinite (universe), the infinite (Brahman) alone is left.

Om is the ether-Brahman—the ether that is eternal.[3] 'The ether containing air',[4] said the son of Kauravyāyaṇī. The seekers of Brahman have known that Om is the means of knowing (It), (for) through it one knows That which is to be known.[5]

[[1] Because it is Brahman that appears as the universe without undergoing any change in Its nature.

[2] Realising it as identical with Itself.

[3] That is, the Supreme Self. Om is Its name, or Its symbol, by meditating on which one can realise Brahman.

[4] Not the Absolute Brahman, but the conditioned Brahman. In either case the position of Om is the same.

[5] Or the sentence may mean, 'The seekers of Brahman know that Om represents all the Vedas, and through it one knows whatever there is to know'. *Chā. U.* II. xxiii. 3 speaks of Om as permeating all words. In this interpretation the sentence is a eulogy on Om.]

SECTION TWO

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुः—देवा मनुष्या असुराः; उषित्वा ब्रह्मचर्यं देवा ऊचुः, ब्रवीतु नो भवानिति; तेभ्यो हैतदक्षरमुवाच द इति; व्यज्ञासिष्टा३ इति; व्यज्ञासिष्मेति होचुः, दाम्यतेति न आत्थेति; ओमिति होवाच, व्यज्ञासिष्टेति ॥ १ ॥

त्रया: Three (kinds of) प्राजापत्या: Prajāpati's sons — देवा: the gods मनुष्या: men असुरा: (and) demons — पितरि प्रजापतौ with (their) father Prajāpati ब्रह्मचर्यम् a student's life of continence ऊषु: lived; देवा: the gods ब्रह्मचर्यम् उषित्वा after living ऊचु: said, भवान् you नः us ब्रवीतु please teach इति; द Da इति एतत् this अक्षरम् syllable तेभ्य: them उवाच ह said (and asked), व्यज्ञासिष्टा३ (व्यज्ञासिष्ट) have you understood इति; ऊचु: (they) said, व्यज्ञासिष्म (we) have understood इति, दाम्यत control (yourselves) इति this न: to us आत्थ (you) said इति; उवाच ह (he) said, ओम् yes इति, व्यज्ञासिष्ट (you) have understood इति.

1. Three kinds of Prajāpati's sons—the gods, men and demons—lived with their father, Prajāpati (Virāj) as students, practising continence. After finishing their term, the gods said (to him), 'Please teach us'. He told them the syllable 'Da' (and asked),

'Have you understood?' They said, 'We have. You say to us: Control yourselves'. (He) said, 'Yes, you have understood'.

अथ हैनं मनुष्या ऊचुः, ब्रवीतु नो भवानिति; तेभ्यो हैतदेवाक्षरमुवाच द इति; व्यज्ञासिष्टा३ इति; व्यज्ञासिष्मेति होचुः, दत्तेति न आत्थेति; ओमिति होवाच, व्यज्ञासिष्टेति ॥ २ ॥

अथ ह Then **मनुष्याः** men; **एतत् एव** the very; **दत्त** be charitable. (Rest as before.)

2. Then men said (to him), 'Please teach us'. He told them the very syllable 'Da' (and asked), 'Have you understood?' They said, 'We have. You say to us: Be charitable'. (He) said, 'Yes, you have understood'.

अथ हैनमसुरा ऊचुः, ब्रवीतु नो भवानिति; तेभ्यो हैतदेवाक्षरमुवाच द इति; व्यज्ञासिष्टा३ इति; व्यज्ञासिष्मेति होचुः, दयध्वमिति न आत्थेति; ओमिति होवाच, व्यज्ञासिष्टेति; तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति—दाम्यत दत्त दयध्वमिति; तदेतत्त्रयं शिक्षेत्—दमं दानं दयामिति ॥ ३ ॥ इति द्वितीयं ब्राह्मणम् ॥

असुराः Demons ; दयध्वम् be merciful तत् that एतत् एव this very (instruction) एषा this दैवी heavenly वाक् voice स्तनयित्नुः the thunder-cloud अनुवदति repeats द द द as Da Da Da इति—दाम्यत control (yourselves) दत्त be charitable दयध्वम् be merciful इति ; तत् therefore दमम् self-control दानम् charity दयाम् (and) mercy इति एतत् this त्रयम् triad शिक्षेत् (one) should learn. (Rest as before.)

3. Then demons said (to him), 'Please teach us'. He told them the very syllable 'Da' (and asked), 'Have you understood?' They said, 'We have. You say to us: Be merciful'. (He) said, 'Yes, you have understood'. That very instruction this heavenly voice in the form of the thunder-cloud repeats as 'Da, Da, Da': 'Control yourselves', 'Be charitable', 'Be merciful'. Therefore one should learn these three—self-control, charity and mercy.[1]

[[1] The three words, 'gods', 'men' and 'demons' can very well apply to different sections of men according to their dominant tendencies and characteristics. Those who lack self-control but are otherwise possessed of good qualities are the gods; those who are very greedy are men; while those who are aggressively cruel are demons. Hence all the three disciplines should be practised by men.]

SECTION THREE

एष प्रजापतिर्यद्धृदयम्; एतद्ब्रह्म, एतत्सर्वम्; तदेतत् त्र्यक्षरम्—हृदयमिति; हृ इत्येकमक्षरम्; अभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद; द इत्येकमक्षरम्; ददत्यस्मै स्वाश्चान्ये च य एवं वेद; यमित्येकमक्षरम्; एति स्वर्गं लोकं य एवं वेद ॥ १ ॥ इति तृतीयं ब्राह्मणम् ॥

एषः This प्रजापतिः (is) Prajāpati—यत् which हृदयम् (is) the heart (the intellect seated in the heart); एतत् it ब्रह्म (is) Brahman, एतत् it सर्वम् (is) all; तत् same एतत् this हृदयम् (name) 'Hṛdaya' (intellect) इति त्र्यक्षरम् (is) of three syllables; हृ इति 'Hṛ' (is) एकम् one अक्षरम् syllable; यः who एवम् thus वेद knows अस्मै to him स्वाः च (his) own (people) अन्ये others च and अभिहरन्ति bring (presents); द 'Da' (to give) इति (is) एकम् another अक्षरम् syllable; यः who एवम् thus वेद knows अस्मै to him स्वाः च (his) own people अन्ये others च and ददति give (their powers); यम् 'Ya' इति (is) एकम् another अक्षरम् syllable; यः (he) who एवम् thus वेद knows स्वर्गं लोकम् the world of heaven एति goes to.

1. This is Prajāpati (Virāj)—(that) which is the heart (intellect). It is Brahman; it is all. This (name) 'Hṛdaya' (intellect) consists of three syllables. 'Hṛ' is one syllable. To

him who knows thus, relatives and others bring (presents). 'Da' is another syllable. To him who knows thus, relatives and others give (their powers). 'Ya' is another syllable. He who knows thus goes to the heavenly world.

[This is a eulogy of the heart or intellect, which has been described in III. ix. 20-24 as absorbing name, colour (form) and action, and as being identified with all beings — in other words, as Prajāpati. By meditating on the syllables of the name one obtains results corresponding to their meanings. If meditation on the syllables of the name is so fruitful, how much more must be that on the intellect itself !]

SECTION FOUR

तद्वै तदेतदेव तदास—सत्यमेव; स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति, जयतीमाँल्लोकान्; जित इन्न्वसावसत्, य एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति; सत्यं ह्येव ब्रह्म ॥ १ ॥ इति चतुर्थं ब्राह्मणम् ॥

तत् That वै already known तत् that (intellect-Brahman) (is being described in another way): तत् that एतत् this एव verily आस was—सत्यम् Satya (Sat and Tyat: the gross and subtle elements) एव only; सः he यः who एतं ह this महत् vast यक्षम् adorable प्रथमजम् first-born सत्यं ब्रह्म

Satya-Brahman इति as वेद knows, इमान् these लोकान् worlds जयति wins; असौ that (his enemy) इत् नु similarly जितः (is) vanquished असत् (and becomes) a nonentity, यः who एवम् as above एतं महत् यक्षं प्रथमजं सत्यं ब्रह्म इति वेद (as above); सत्यम् Satya एव verily हि for ब्रह्म (is) Brahman.

1. That (intellect-Brahman) was verily this—Satya[1] only. He who knows this vast adorable, first-born (being) as the Satya-Brahman, wins these worlds, and (his enemy) is similarly[2] vanquished and becomes a nonentity—(of him) who knows this vast, adorable first-born being as the Satya-Brahman.[3] For, Satya is verily Brahman.

[Meditation on the intellect-Brahman as Satya is being enjoined here.

[1] Brahman as the five elements referred to in I. VI. 3.

[2] Just as the universe has been subjugated by Brahman.

[3] The repetition clinches the point.]

SECTION FIVE

आप एवेदमग्र आसुः, ता आपः सत्यमसृजन्त, सत्यं ब्रह्म, ब्रह्म प्रजापतिम्, प्रजापतिर्देवान्; ते देवाः सत्यमेवोपासते; तदेतत्त्र्यक्षरम्—सत्यमिति; स इत्येकमक्षरम्, तीत्येकमक्षरम्, यमित्येकमक्षरम्; प्रथमोत्तमे

अक्षरे सत्यम्, मध्यतोऽनृतम्; तदेतदनृतमुभयतः सत्येन परिगृहीतम्, सत्यभूयमेव भवति; नैवं विद्वांसमनृतं हिनस्ति ॥ १ ॥

इदम् This (universe) अग्रे in the beginning आपः water (liquid sacrificial offerings) एव only आसुः was; ताः that आपः water सत्यम् Satya असृजन्त created; सत्यम् Satya ब्रह्म (is) Brahman (lit. vast; Hiraṇyagarbha); ब्रह्म Brahman (created) प्रजापतिम् Prajāpati (Virāj), प्रजापतिः Prajāpati (created) देवान् the gods; ते those देवाः gods सत्यम् Satya एव alone उपासते meditate upon; तत् that एतत् this सत्यम् (name) Satya इति त्र्यक्षरम् (is) of three syllables; स 'Sa' इति (is) एकम् one अक्षरम् syllable, ति 'Ti' इति (is) एकम् another अक्षरम् syllable, यम् 'Ya' इति (is) एकम् another अक्षरम् syllable; प्रथम-उत्तमे the first and last अक्षरे syllables सत्यम् (are) truth, मध्यतः in the middle अनृतम् (is) untruth; तत् that एतत् this अनृतम् untruth उभयतः on both sides सत्येन by truth परिगृहीतम् (being) covered सत्यभूयम् predominant in truth एव alone भवति is; एवम् thus विद्वांसम् one who knows अनृतम् untruth न not हिनस्ति hurts.

1. This universe was only water[1] in the beginning. That water created Satya. Satya is Hiraṇyagarbha. Hiraṇyagarbha created Virāj, and Virāj created the gods. The gods meditate upon Satya alone.[2] This (name) 'Satya' consists of three syllables: 'Sa' is one

syllable, 'Ti' is another syllable, and 'Ya' is the third syllable. The first and last syllables are truth. The one in the middle is untruth. This untruth, being covered on both sides by truth, has a predominance of truth alone. Untruth[3] does not hurt one who knows thus.

[The Satya-Brahman is being eulogised in this paragraph.

[1] 'Water' here means the liquid offerings used in the Agnihotra and other rites, which, although comprising all the five elements, are mainly watery. After the rites are over, these elements remain in a subtle form, maintaining their connections with them, and later form the universe.

[2] These sentences show the relevancy of the epithets given to Satya in the previous sections. Satya is first-born, because he was created first. He is Brahman, because he is vast. He is vast, because he is the creator of all. He is adorable, because the gods meditate upon him in particular.

[3] Spoken inadvertently.]

तद्यत्तत्सत्यमसौ स आदित्यः—य एष एतस्मिन्मण्डले पुरुषः, यश्चायं दक्षिणेऽक्षन्पुरुषः; तावेतावन्योन्यस्मिन् प्रतिष्ठितौ; रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः, प्राणैरयममुष्मिन्; स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मण्डलं पश्यति; नैनमेते रश्मयः प्रत्यायन्ति ॥ २ ॥

तत् He यत् who (is) तत् that सत्यम् Satya सः he (is) असौ that आदित्यः sun — एतस्मिन् मण्डले in this orb यः who (is) एषः this पुरुषः being, दक्षिणे अक्षन् in the right eye यः who (is) च and अयम् this पुरुषः being; तौ these एतौ two अन्योन्यस्मिन् on each other प्रतिष्ठितौ rest; एषः this, the sun रश्मिभिः through (his) rays अस्मिन् on the latter प्रतिष्ठितः rest, अयम् this, the latter (rests) प्राणैः through (his) organs अमुष्मिन् on the former; सः it (the individual self) यदा when उत्क्रमिष्यन् about to depart भवति is, एतत् this मण्डलम् (solar) orb शुद्धम् clear, denuded of its rays एव only पश्यति (he) sees; एते these रश्मयः rays एनम् it न not प्रत्यायन्ति come to.

2. He who is that Satya is that sun—the being who is in that orb and the being who is in the right eye. These two rest on each other. The solar being rests on the ocular being through his rays,[1] and the ocular being rests on the solar being through his organs.[2] When the individual self is about to depart from the body, it sees the solar orb as denuded of its rays. Those rays no longer come to it.

[[1] Which help the other's sight. This mutual help shows that they are not different from each other.

[2] That reveal him.]

य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिरः; एकं शिरः, एकमेतदक्षरम्; भुव इति बाहू, द्वौ बाहू, द्वे

एते अक्षरे; स्वरिति प्रतिष्ठा; द्वे प्रतिष्ठे, द्वे एते अक्षरे; तस्योपनिषदहरिति; हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥

एतस्मिन् मण्डले In this (solar) orb यः who (is) एषः this पुरुषः being, तस्य his भूः 'Bhur' इति शिरः (is) head; शिरः the head एकम् (is) one, एतत् this अक्षरम् syllable एकम् (is) one; भुवः 'Bhuvar' इति बाहू (is) the arms; बाहू the arms द्वे (are) two, एते these अक्षरे syllables द्वे (are) two; स्वः 'Svar' इति प्रतिष्ठा (is) feet; प्रतिष्ठे the feet द्वे (are) two, एते these अक्षरे syllables द्वे (are) two; तस्य his उपनिषत् secret name अहः (is) 'Ahar' (day) इति; यः (he) who एवम् thus वेद knows पाप्मानम् evil हन्ति destroys जहाति shuns च and.

3. Of this being who is in this solar orb, 'Bhūr'[1] is the head, for there is one head, and there is this one syllable. 'Bhuvar' is his arms, for there are two arms, and there are these two syllables. 'Svar' is his feet, for there are two feet, and there are these two syllables. His secret name is 'Ahar'.[2] He who knows thus destroys and shuns evil.

[[1] 'Bhūr', 'Bhuvar' and 'Svar' are the three Vyāhṛtis (sacred formulae).

[2] This, as also 'Aham' of the next paragraph, is derived from the root 'Han' (to destroy) or 'Hā' (to shun).]

योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिरः; एकं शिरः, एकमेतदक्षरम्; भुव इति बाहू; द्वौ बाहू, द्वे एते अक्षरे; स्वरिति प्रतिष्ठा; द्वे प्रतिष्ठे, द्वे एते अक्षरे; तस्योपनिषदहमिति; हन्ति पाप्मानं जहाति च य एवं वेद ॥ ४ ॥ इति पञ्चमं ब्राह्मणम् ॥

दक्षिणे अक्षन् In the right eye; अयम् this; अहम् 'Aham' (I, the individual self). (Rest as before.)

4. Of this being who is in the right eye, 'Bhūr' is the head, for there is one head, and there is one syllable. 'Bhuvar' is his arms, for there are two arms, and there are these two syllables. 'Svar' is his feet, for there are two feet, and there are these two syllables. His secret name is 'Aham'. He who knows thus destroys and shuns evil.

SECTION SIX

मनोमयोऽय पुरुषो भाःसत्यस्तस्मिन्नन्तर्हृदये, यथा व्रीहिर्वा यवो वा; स एष सर्वस्येशानः, सर्वस्याधिपतिः, सर्वमिदं प्रशास्ति यदिदं किञ्च ॥ १ ॥ इति षष्ठं ब्राह्मणम् ॥

अयम् This पुरुषः being मनोमयः reflected in the mind भाः-सत्यः with radiance as his nature तस्मिन् अन्तः-हृदये (is

realised) in that interior of the heart, यथा as व्रीहिः वा (is) a grain of rice यवः a grain of barley वा or ; सः that एषः this (is) सर्वस्य of all ईशानः lord, सर्वस्य of all अधिपतिः the ruler, यत् इदं किं च whatever there is इदम् this सर्वम् all प्रशास्ति (he) rules.

1. This being reflected in the mind,[1] radiant by nature, (is realised) in the interior of the heart, like a grain of rice or barley in size.[2] He is the lord of all, the ruler of all: he rules whatever there is in the universe.[3]

[Another meditation on the same Satya-Brahman is being inculcated.

[1] For he is perceived in the mind and also perceives through it.

[2] This is his form according to limiting adjuncts. His infinite nature is being set forth in the next sentence.

[3] This meditation too yields such rulership.]

SECTION SEVEN

विद्युद्ब्रह्मेत्याहुः; विदानाद्विद्युत्; विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति; विद्युद्ध्येव ब्रह्म ॥ १ ॥ इति सप्तमं ब्राह्मणम् ॥

विद्युत् Lightning ब्रह्म (is) Brahman इति आहुः (sages) say ; विदानात् from dispelling (darkness) विद्युत् (it is called)

lightning; यः who एवम् thus विद्युत् lightning ब्रह्म (is) Brahman इति वेद knows, एनम् (set against) him पाप्मनः evils विद्यति dispels; विद्युत् lightning हि for ब्रह्म (is) Brahman एव verily.

1. They say that lightning is Brahman. Lightning is so called because it dispels (the darkness due to clouds). He who knows as above—that lightning is Brahman—dispels the evils that are set against him, for lightning is verily Brahman.

SECTION EIGHT

वाचं धेनुमुपासीत; तस्याश्चत्वारः स्तनाः—स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः; तस्यै द्वौ स्तनौ देवा उपजीवन्ति—स्वाहाकारं च वषट्कारं च, हन्तकारं मनुष्याः, स्वधाकारं पितरः; तस्याः प्राण ऋषभः, मनो वत्सः ॥ १ ॥ इत्यष्टमं ब्राह्मणम् ॥

वाचम् Upon speech धेनुम् as a cow उपासीत (one) should meditate; तस्याः her चत्वारः four स्तनाः teats स्वाहाकारः (are) the sound 'Svāhā' वषट्कारः the sound 'Vaṣaṭ' हन्तकारः the sound 'Hanta' स्वधाकारः (and) the sound 'Svadhā'; तस्यै her द्वौ two स्तनौ teats—स्वाहाकारं च the sound 'Svāhā' वषट्कारम् the sound 'Vaṣaṭ' च and देवाः the gods

उपजीवन्ति live on, मनुष्या: men हन्तकारम् on the sound 'Hanta', पितर: the manes स्वधाकारम् on the sound 'Svadhā'; प्राण: the vital force (is) तस्या: her ऋषभ: bull, मन: (and) the mind वत्स: (her) calf.

1. One should meditate upon the Vedas as a cow. Her four teats are the sounds 'Svāhā', 'Vaṣaṭ', 'Hanta' and 'Svadhā'. The gods live on two of her teats—the sounds 'Svāhā' and 'Vaṣaṭ',[1] men on the sound 'Hanta', and the manes on the sound 'Svadhā'. The vital force is her bull,[2] and the mind her calf.[3]

[[1] Because offerings are made to them by uttering these Vedic words. Similarly with the words 'Hanta' and 'Svadhā', which mean respectively, 'if you want', and 'food'.

[2] For the Vedas are fruitful only when they are uttered with the help of the vital force.

[3] Just as the calf stimulates the secretion of milk, so the Vedas are utilised only after the mind has thought over the subject. The result of this meditation is identity with the Veda-Brahman.]

SECTION NINE

अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे, येनेदमन्नं पच्यते यदिदमद्यते; तस्यैष घोषो भवति यमेतत्कर्णावपिधाय

शृणोति; स यदोत्क्रमिष्यन्भवति नैनं घोषं शृणोति ॥१॥
इति नवमं ब्राह्मणम् ॥

अन्तः पुरुषे Within a man यः which अयम् this अग्निः fire, येन by which इदम् this अन्नम् food—इदम् this यत् which अद्यते is eaten—पच्यते is digested, अयम् this वैश्वानरः (is) Vaiśvānara; तस्य its एषः this घोषः sound भवति is यम् that एतत् thus कर्णौ the ears अपिधाय closing शृणोति (one) hears; सः it (the individual self) यदा when उत्क्रमिष्यन् about to pass away भवति is, एनम् this घोषम् sound न not शृणोति (it) hears.

1. This fire which is within a person and digests the food that is eaten[1] is Vaiśvānara (Virāj).[2] It produces this sound that one hears thus by closing the ears. When the individual self is about to pass away, it does not hear this sound.

[This is another meditation on the Satya-Brahman.

[1] Not the fire that is a component element of the body, but the heat in the stomach.

[2] One should meditate upon this fire as Virāj. The result is identity with him.]

SECTION TEN

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति; तस्मै स तत्र विजिहीते यथा रथचक्रस्य खम्, तेन स ऊर्ध्वं

आक्रमते; स आदित्यमागच्छति, तस्मै स तत्र विजिहीते यथा लम्बरस्य खम्, तेन स ऊर्ध्व आक्रमते; स चन्द्रमसमागच्छति, तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम्, तेन स ऊर्ध्व आक्रमते; स लोकमागच्छत्यशोकमहिमम्, तस्मिन्वसति शाश्वतीः समाः ॥ १ ॥ इति दशमं ब्राह्मणम् ॥

यदा When वै verily पुरुषः a man अस्मात् लोकात् from this world प्रैति departs, सः he वायुम् to the (deity) air आगच्छति comes; सः he यथा as रथचक्रस्य of a chariot-wheel खम् (is) the hole तस्मै for him तत्र there (in his body) विजिहीते makes an opening; तेन through that सः he ऊर्ध्वः (being) upward आक्रमते proceeds; सः he आदित्यम् to the sun आगच्छति comes, लम्बरस्य of a tabor; चन्द्रमसम् to the moon, दुन्दुभेः of a drum; सः he अशोकम् free from grief अहिमम् free from cold लोकम् to a world आगच्छति comes; तस्मिन् there शाश्वतीः everlasting समाः years वसति (he) lives. (The rest is similar).

1. When a man departs from this world, he goes to the (deity) air, who makes for him an opening in his body like the hole of a chariot-wheel. He proceeds upward through that and comes to the sun, who makes for him an opening in his body like the hole of a tabor. He proceeds upward through that and comes to the moon, who makes an opening for

him in his body like the hole of a drum. He proceeds upward through that and comes to a world[1] where there is no grief or cold.[2] He lives there for everlasting years.[3]

[The route which a person versed in the foregoing meditations follows after death, and the goal he attains, are set forth in this section.

[1] The world of Hiraṇyagarbha.

[2] That is, neither mental nor physical sufferings.

[3] That is, up to the lifetime of Hiraṇyagarbha.]

SECTION ELEVEN

एतद्वै परमं तपो यद्व्याहितस्तप्यते, परमं हैव लोकं जयति य एवं वेद; एतद्वै परमं तपो यं प्रेतमरण्यं हरन्ति; परमं हैव लोकं जयति य एवं वेद; एतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति, परमं हैव लोकं जयति य एवं वेद ॥ १ ॥ इति एकादशं ब्राह्मणम् ॥

यत् That व्याहित: (a) diseased (person) तप्यते suffers, एतत् this वै verily परमम् great तप: (is) penance ; य: who एवम् thus वेद knows परमम् great लोकम् world ह एव indeed जयति (he) wins ; एतत् वै परमं तप: प्रेतम् (when) dead यम् whom अरण्यम् to the forest हरन्ति (they) carry , अग्नौ on the fire अभ्यादधति (they) lay. (The rest is similar.)

1. This is verily a great penance that a diseased person suffers. He who knows thus wins indeed a great world. This is verily a great penance that people carry a dead man to the forest. He who knows thus wins indeed a great world. This is verily a great penance that they lay a dead man on the fire. He who knows thus wins indeed a great world.

[Here a sick man is advised to look upon his suffering without grumbling, as a penance. So also should a dying man look upon the fact of his body being taken after death to the forest for cremation as also its being laid on the pyre. Such meditation destroys one's sins and produces corresponding results.]

SECTION TWELVE

अन्नं ब्रह्मेत्येक आहुः, तन्न तथा, पूयति वा अन्नमृते प्राणात्; प्राणो ब्रह्मेत्येक आहुः, तन्न तथा, शुष्यति वै प्राण ऋतेऽन्नात्; एते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतः; तद्ध स्माह प्रातृदः पितरम्, किं स्विदेवैवं विदुषे साधु कुर्याम्, किमेवास्मा असाधु कुर्यामिति; स ह स्माह पाणिना, मा प्रातृद, कस्त्वेनयो-रेकताभूयं भूत्वा परमतां गच्छतीति; तस्मा उ हैतदुवाच

वीति; अन्नं वै वि, अन्ने हीमानि सर्वाणि भूतानि विष्टानि; रमिति; प्राणो वै रम्, प्राणे हीमानि सर्वाणि भूतानि रमन्ते; सर्वाणि ह वा अस्मिन्भूतानि विशन्ति, सर्वाणि भूतानि रमन्ते, य एवं वेद ॥ १ ॥ इति द्वादशं ब्राह्मणम् ॥

एके Some (teachers) आहुः say, अन्नम् food ब्रह्म (is) Brahman इति; तत् it (is) तथा so न not, प्राणात् ऋते without the vital force अन्नम् food पूयति is decomposed वै indeed; एके some आहुः say, प्राणः the vital force ब्रह्म (is) Brahman इति, तत् that (is) तथा so न not, अन्नात् ऋते without food प्राणः the vital force शुष्यति dries up वै indeed; एते these two तु but देवते deities ह एव themselves एकधाभूयं भूत्वा being united परमताम् perfection (Brahmanhood) गच्छतः attain; तत् therefore ह indeed प्रातृदः Prātṛda पितरम् to (his) father आह स्म said, एवम् thus विदुषे to one who knows किम् what स्वित् एव indeed साधु good कुर्याम् can (I) do, अस्मै to him किम् what एव indeed असाधु evil offence कुर्याम् can (I) do इति; सः ह he पाणिना (silencing) with the hand आह स्म said, प्रातृद Prātṛda मा do not (say so), कः who तु indeed अनयोः with these two एकधाभूयं भूत्वा परमतां (as above) गच्छति attains इति; तस्मै to him एतत् this उ ह also उवाच (the father) said, वि (it is) 'Vi' इति; अन्नम् food वै indeed वि (is) 'Vi', इमानि these सर्वाणि all हि for भूतानि beings अन्ने in food (the body) विष्टानि dwell; रम् (it is) 'Ram' इति; प्राणः the vital force वै indeed रम् (is) 'Ram', इमानि सर्वाणि

हि भूतानि प्राणे (सति) if there is the vital force रमन्ते are happy ; यः who एवम् thus वेद knows, अस्मिन् in him सर्वाणि all भूतानि beings विशन्ति dwell ह वै verily, सर्वाणि भूतानि रमन्ते take delight.

1. Some say that food is Brahman. It is not so, for food is decomposed without the vital force. Others say that the vital force is Brahman. It too is not so, for the vital force dries up without food. But these two deities themselves being unified attain their perfection. For this very reason Prātṛda said to his father, 'What honour indeed can I do to one who knows as above, and what offence indeed can I do to him?'[1] The father (silencing him) with his hand said, 'Prātṛda, do not (say so), for who can attain perfection by being identified with these two?' He also said to him, 'It is "Vi". Food indeed is "Vi", for all these beings dwell in food (the body).[2] It is "Ram". The vital force indeed is "Ram", for all these beings are happy if there is the vital force.[3] In him who knows as above, all beings verily dwell, and all beings take delight'.

[[1] For he is perfectly satisfied with his realisation of the Self.

[2] Which is a product of the food that one eats.
[3] Thus a meditation on Brahman as possessed of the attributes of food and the vital force is enjoined.]

SECTION THIRTEEN

उक्थम्; प्राणो वा उक्थम्, प्राणो हीदं सर्वमुत्थापयति; उद्धास्मादुक्थविद्वीरस्तिष्ठति, उक्थस्य सायुज्यं सलोकतां जयति, य एवं वेद ॥ १ ॥

उक्थम् The Uktha; प्राणः the vital force (is) वै verily उक्थम्, प्राणः the vital force हि for इदम् this सर्वम् all उत्थापयति upholds; यः who एवम् thus वेद knows, अस्मात् from him उक्थवित् a knower of Uktha (the vital force) वीरः a son उत्तिष्ठति ह rises, is born, उक्थस्य with the Uktha सायुज्यम् union सलोकताम् (or) abode in the same world जयति wins.

1. (One should meditate upon the vital force as) the Uktha.[1] The vital force is verily the Uktha, for it upholds this universe.[2] From him who knows thus is born a son who is a knower of the vital force, and he wins union with, or[3] abode in the same world as the Uktha (vital force).

[[1] It is the most important among the laudatory hymns and is mainly used in the sacrifice called Mahāvrata.

[2] Also because the vital force is the most important among the organs.

[3] According to the intensity of the meditation.]

यजुः ; प्राणो वै यजुः, प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते ; युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय, यजुषः सायुज्यं सलोकतां जयति, य एवं वेद ॥ २ ॥

यजुः The Yajus ; इमानि these सर्वाणि हि for all भूतानि beings प्राणे (सति) if there is the vital force युज्यन्ते are joined ; अस्मै for him श्रैष्ठ्याय for (his) prominence, यजुषः with the Yajus. (Rest as before.)

2. (One should meditate upon the vital force as) the Yajus. The vital force is verily Yajus, for all these beings are joined if there is the vital force. For him who knows thus, all beings are joined to give him prominence, and he wins union with, or abode in the same world as, the Yajus (vital force).

साम ; प्राणो वै साम, प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि ; सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते, साम्नः सायुज्यं सलोकतां जयति, य एवं वेद ॥३॥

साम The Sāman ; सम्यञ्चि unite ; कल्पन्ते (and) are able, साम्नः with the Sāman. (Rest as before.)

3. (One should meditate upon the vital force as) the Sāman. It is verily the Sāman, for all these beings unite if there is the vital force. For him who knows thus, all beings unite and are able to give him prominence, and he wins union with, or abode in the same world as, the Sāman (vital force).

क्षत्त्रम्; प्राणो वै क्षत्त्रम्, प्राणो हि वै क्षत्त्रम्, त्रायते हैनं प्राणः क्षणितोः; प्र क्षत्त्रमत्रमाप्नोति, क्षत्त्रस्य सायुज्यं सलोकतां जयति, य एवं वेद ॥ ४ ॥ इति त्रयोदशं ब्राह्मणम् ॥

क्षत्त्रम् The Kṣattra (lit. which saves from wounds); प्राणः the vital force एनम् this (body) क्षणितोः from wounds त्रायते ह saves; यः who एवं thus वेद knows अत्रम् saviour-less क्षत्त्रम् the Kṣattra (vital force) प्राप्नोति (he) attains, क्षत्त्रस्य with the Kṣattra. (Rest as before.)

4. (One should meditate upon the vital force as) the Kṣattra. The vital force is the Kṣattra, for it is indeed the Kṣattra: The vital force saves this body from wounds. He who knows thus attains the Kṣattra (vital force) that needs no protector, and he wins union with, or abode in the same world as, the Kṣattra (vital force).

SECTION FOURTEEN

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराणि; अष्टाक्षरं ह वा एकं गायत्र्यै पदम्, एतदु हैवास्या एतत्; स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥

भूमिः Bhūmi, the earth अन्तरिक्षम् Antarikṣa द्यौः Dyaus, heaven इति these (make) अष्टौ eight अक्षराणि syllables; गायत्र्यै of the Gāyatrī एकम् one, the first पदम् foot अष्ट-अक्षरम् (are of) eight syllables ह वै verily; अस्याः its, of the Gāyatrī एतत् this (foot) एतत् (consists of) the above (three worlds) उ ह एव indeed; यः who अस्याः its एतत् this पदम् foot एवम् as above वेद knows, सः he यावत् whatever (there is) एषु these त्रिषु three लोकेषु in worlds तावत् ह all that जयति wins.

1. 'Bhūmi' (the earth), 'Antarikṣa' (sky) and 'Dyaus' (heaven) — these make eight syllables. The first foot of the Gāyatrī[1] (also) has verily eight syllables.[2] Hence this first foot of the Gāyatrī consists of those three worlds. He who knows the first foot of the Gāyatrī as above wins whatever there is in those three worlds.

[[1] The most sacred verse of the Vedas (*Ṛg-Veda*, III. LXII. 10), which reads as follows, '*Tat saviturvareṇyam, bhargo devasya dhīmahi, dhiyo yo naḥ pracodayāt*'

(We meditate on the adorable glory of the effulgent sun, the creator. May he guide our intellect!). It is in a metre which is also called Gāyatrī, has three feet of eight syllables each, and is the chief among Vedic metres.

[2] The syllable 'Ya' in the word 'Vareṇya' is to be detached to make up the eighth syllable.]

ऋचो यजूंषि सामानीत्यष्टावक्षराणि; अष्टाक्षरं ह वा एकं गायत्र्यै पदम्; एतदु हैवास्या एतत्; स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद॥ २॥

ऋचः Ṛcaḥ यजूंषि Yajūmṣi सामानि (and) Sāmāni; यावती as far as इयम् this त्रयी represented by the three Vedas विद्या knowledge (extends) तावत् ह so far. (Rest as before.)

2. 'Ṛcaḥ', 'Yajūmṣi' and 'Sāmāni'[1]—these make eight syllables. The second foot of the Gāyatrī (also) has verily eight syllables. Hence this foot of the Gāyatrī consists of those three Vedas. He who knows this foot of the Gāyatrī as above wins as far as the knowledge represented by the three Vedas extends.

[[1] Plural forms of the names of the three Vedas.]

प्राणोऽपानो व्यान इत्यष्टावक्षराणि; अष्टाक्षरं ह वा एकं गायत्र्यै पदम्; एतदु हैवास्या एतत्; स यावदिदं

प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेद; अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति; यद्वै चतुर्थं तत्तुरीयम्; दर्शतं पदमिति ददृश इव ह्येषः; परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपति; एवं हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ३ ॥

प्राण: Prāṇa अपान: Apāna व्यान: Vyāna इति . . . वेद (as before); स: he यावत् as many इदम् this प्राणि (totality of) creatures (is) तावत् ह so many जयति wins; अथ now अस्या: its तुरीयम् quaternary, fourth दर्शतम् (seemingly) visible परोरजा: supermundane पदम् foot एतत् (is) this एव indeed य: एष this who तपति shines; यत् which वै verily (is) चतुर्थम् fourth तत् that तुरीयम् (is) quaternary; दर्शतं पदम् इति, एष: he हि because ददृशे (is) visible इव as it were; परोरजा: इति, एष: हि एव alone सर्वम् on the entire उ verily रज: universe उपरि उपरि from on high तपति shines; य: . . . वेद (as before) एवं ह in the same way एव indeed श्रिया with magnificence यशसा with fame तपति (he) shines.

3. 'Prāṇa', 'Apāna' and 'Vyāna'[1]— these make eight syllables. The third foot of the Gāyatrī (also) has verily eight syllables. Hence the third foot of the Gāyatrī consists of those three forms of the vital force. He who knows the third foot of the Gāyatrī as above wins all creatures that exist in the universe. Now its

quaternary, (seemingly) visible, supermundane foot is indeed this—this (sun) that shines. That which is fourth is called 'quaternary'. (Seemingly) 'visible foot', because the solar being is visualised, as it were, (by Yogins). 'Supermundane', because he alone verily shines on the entire universe[2] from on high.[3] He who knows this foot of the Gāyatrī as above shines just like that with magnificence and fame.

[[1] The word 'Vyāna' should be read as three syllables to make up the number.

[2] Called 'Rajas' in the text, because it is the product of activity.

[3] That is, as its lord.]

सैषा गायत्र्येतस्मिंस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता; तद्वै तत्सत्ये प्रतिष्ठितम्; चक्षुर्वै सत्यम्, चक्षुर्हि वै सत्यम्; तस्माद्यदिदानीं द्वौ विवदमानावेयाताम्, अहमदर्शम्, अहमश्रौषमिति, य एवंब्रूयादहमदर्शमिति, तस्मा एव श्रद्दध्याम; तद्वै तत्सत्यं बले प्रतिष्ठितम्; प्राणो वै बलम्, तत्प्राणे प्रतिष्ठितम्; तस्मादाहुर्बलं सत्यादोगीय इति; एवं वैषा गायत्र्यध्यात्मं प्रतिष्ठिता; सा हैषा गयांस्तत्रे; प्राणा वै गयाः, तत्प्राणांस्तत्रे; तद्यद्गयांस्तत्रे

तस्माद्गायत्री नाम; स यामेवामूं सावित्रीमन्वाह, एषैव सा; स यस्मा अन्वाह तस्य प्राणांस्त्रायते ॥ ४ ॥

सा That एषा this गायत्री Gāyatrī एतस्मिन् this तुरीये fourth दर्शते (seemingly) visible परोरजसि supermundane पदे on foot (the sun) प्रतिष्ठिता rests; तत् वै तत् that (fourth foot, the sun) सत्ये on truth प्रतिष्ठितम् rests; चक्षुः वै the eye सत्यम् (is) truth, चक्षुः the eye हि for वै indeed सत्यम् (is) truth; तस्मात् therefore यत् if इदानीम् even now द्वौ two विवदमानौ disputants एयाताम् come (saying), अहम् I अदर्शम् saw, अहम् I अश्रौषम् heard इति, यः who एवम् thus ब्रूयात् says, अहम् I अदर्शम् saw इति, तस्मै him एव only श्रद्दध्याम (we) should believe; तत् वै तत् that सत्यम् truth बले on strength प्रतिष्ठितम् rests; प्राणः the vital force वै verily बलम् (is) strength, तत् hence प्राणे on the vital force प्रतिष्ठितम् (truth) rests; तस्मात् therefore आहुः (they) say, बलम् strength सत्यात् than truth ओगीयः (ओजीयः) (is) more vigorous इति; एवम् उ thus एषा this गायत्री Gāyatrī अध्यात्मम् (on the vital force) within the body प्रतिष्ठिता rests; सा ह that एषा this गयान् the Gayas तत्रे saved; प्राणाः the organs वै indeed गयाः (are) the Gayas, तत् hence प्राणान् the organs तत्रे (it) saved; तत् now यत् because गयान् the Gayas तत्रे saved, तस्मात् therefore गायत्री नाम (it is) called Gāyatrī; सः he (the teacher) याम् एव which अमूम् that सावित्रीम् Sāvitrī अन्वाह imparts (to the new initiate), सा that एषा (is) this एव only; सः he यस्मै to him अन्वाह imparts तस्य of him प्राणान् the organs त्रायते (it) saves.

4. That Gāyatrī[1] rests on this fourth, (seemingly) visible, supermundane foot (the sun).[2] That (again) rests on truth.[3] The eye is truth, for the eye is indeed truth. Therefore, even now, if two disputants come saying, 'I saw it', and 'I heard of it', we believe him alone who says, 'I saw it'. That truth rests on strength. The vital force is verily strength; hence truth rests on the vital force. Therefore they say, 'Strength is more vigorous than truth'. Thus does the Gāyatrī rest (on the vital force that is) within the body.[4] That very Gāyatrī saved the Gayas.[5] The organs are the Gayas; hence it saved the organs. And because it saved the organs, therefore it is called Gāyatrī. The Sāvitrī that the teacher imparts to his pupil is this very Gāyatrī. Gāyatrī saves the organs of the pupil to whom it is imparted.

[[1] Which, as we have seen, represents by its three feet the three worlds, the three Vedas and the vital force.

[2] Because the deity sun is the essence of the gross and the subtle universe (II. III. 3).

[3] Because the sun rests on the eye (III. IX. 20), which is truth.

[4] That is, it is identical with the vital force, and the vital force in its cosmic form as the Sūtra or

Hiraṇyagarbha encompasses the whole universe. Hence the Gāyatrī too is like that.

[5] Primarily, the organ of speech, which utters sounds. But all the organs are meant.]

तां हैतामेके सावित्रीमनुष्टुभमन्वाहुः; वागनुष्टुप्, एतद्वाचमनुब्रूम इति; न तथा कुर्यात्; गायत्रीमेव सावित्रीमनुब्रूयात्; यदि ह वा अप्येवंविद्बह्विव प्रतिगृह्णाति, न हैव तद्गायत्र्या एकञ्चन पदं प्रति ॥ ५ ॥

एके Some (well known in some other recensions of the Vedas) तां ह that एताम् this अनुष्टुभम् (that is) in the Anuṣṭubh metre सावित्रीम् Sāvitrī (hymn to the sun) अन्वाहुः impart (to the pupil, saying), अनुष्टुप् Anuṣṭubh वाक् (is) the goddess of speech, एतत् वाचम् this goddess of speech अनुब्रूमः (we) shall impart इति; तथा so न not कुर्यात् (one) should do; गायत्रीम् (which is) Gāyatrī एव only सावित्रीम् (that) Sāvitrī अनुब्रूयात् (one) should impart (to the pupil); यदि ह वै अपि even if एवंवित् one who knows as above बहु too much (gift) इव as it were प्रतिगृह्णाति accepts, तत् it गायत्र्याः of the Gāyatrī एकञ्चन even one पदम् foot प्रति for न ह एव not (enough).

5. Some impart (to the pupil) that Sāvitrī which is in the Anuṣṭubh metre,[1] saying, 'Anuṣṭubh is the goddess of speech;[2] (so) we shall impart this'. One should not do so; one should impart only that Sāvitrī which is

the Gāyatrī.[3] Even if one who knows as above accepts apparently too much[4] gift, it is not (enough) for even one foot of the Gāyatrī.

[[1] It reads as follows: '*Tat savitur vṛṇīmahe vayam devasya bhojanam śreṣṭham, sarvadhātamam turam bhagasya dhīmahi*' (*Ṛg-Veda* V. LXXXII. 1; also quoted in *Chā. U.* V. II. 7).

[2] Hence this is more suited to a newly initiated boy.

[3] Because the Gāyatrī is the vital force and therefore includes the goddess of speech and all.

[4] Since he is identified with the universe, there can be no such thing as too much gift for him.]

स य इमांस्त्रींल्लोकान्पूर्णान्प्रतिगृह्णीयात्, सोऽस्या एतत् प्रथमं पदमाप्नुयात्; अथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्, सोऽस्या एतद्द्वितीयं पदमाप्नुयात्; अथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्, सोऽस्या एतत्तृतीयं पदमाप्नुयात्; अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति, नैव केनचनाप्यम्; कुत उ एतावत्प्रतिगृह्णीयात् ॥ ६ ॥

सः He (the knower of the Gāyatrī) यः who पूर्णान् full (of wealth) इमान् these त्रीन् three लोकान् worlds (earth, sky and heaven) प्रतिगृह्णीयात् may accept, सः he अस्याः its एतत् this प्रथमम् first पदम् foot (*i.e.*, the results of knowing it) आप्नुयात् will receive; अथ now यावती इयं त्रयी विद्या तावत्

(see par. 2) द्वितीयम् second; अथ यावत् इदं प्राणि तावत् (see par. 3) तृतीयम् third; अथ while अस्याः . . . तपति (see par. 3), केनचन by anything न not एव at all आप्यम् to be obtained; एतावत् so much (wealth) कुतः how उ indeed प्रतिगृह्णीयात् could (one) accept? (The rest is similar.)

6. The knower of the Gāyatrī who accepts these three worlds full of wealth, will receive (the results of knowing) only the first foot of the Gāyatrī. The knower who accepts all that the knowledge represented by the three Vedas can bestow, will receive (the results of knowing) only the second foot of the Gāyatrī. The knower who accepts all creatures that exist in the world, will receive (the results of knowing) only the third foot of the Gāyatrī. While (the results of knowing) its fourth, (seemingly) visible, supermundane foot—this (sun) that shines, are not at all to be secured by anything. Indeed how could one accept so much gift (as any of the above)? [1]

[[1] They are mentioned only to eulogise the knowledge of Gāyatrī.]

तस्या उपस्थानम्—गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि, न हि पद्यसे। नमस्ते तुरीयाय दर्शताय

पदाय परोरजसे ; असावदो मा प्रापदिति ; यं द्विष्यात्, असावस्मै कामो मा समृद्धीति वा—न हैवास्मै स कामः समृद्ध्यते यस्मा एवमुपतिष्ठते—अहमदः प्रापमिति वा ॥ ७ ॥

तस्याः Its उपस्थानम् salutation—गायत्रि O Gāyatrī एकपदी one-footed द्विपदी two-footed त्रिपदी three-footed चतुष्पदी four-footed अपत् without foot असि (thou) art, न not हि for पद्यसे (thou) art attained ; तुरीयाय fourth दर्शताय (seemingly) visible परोरजसे supermundane पदाय (to) the foot ते to thee नमः salutation ; असौ that (enemy) अदः that (object) मा not प्रापत् may attain इति ; यम् whom द्विष्यात् (he) may hate, (against him he should say) असौ so and so (naming him) अस्मै to him कामः (his) desired object मा not समृद्धि prosper इति वा either—यस्मै against whom एवम् thus उपतिष्ठते (he) salutes (the Gāyatrī), अस्मै for him सः that कामः desired object न not ह एव at all समृद्धते prospers—अहम् I अदः that (object of his) प्रापम् may attain इति वा or (say).

